॥ *पदपाठः* ॥

यत्। मङ्गलम्। सु० पर्णस्यं। वि० नंता। अकल्पयत्।
पुरा। अमृत० अर्थं। प्र० यातस्य। तत्। मे। भवंतु। मङ्गलंम्॥

॥ *भाष्यम्* ॥

एषा अनुष्टुप्। मङ्गलं प्रास्थानिकं स्वस्त्ययनं अन्यच्च आचारप्राप्तम्। अकल्पयत्, प्रायुङ्क्त। शेषं निगदव्याख्यातम्।

सुपर्णाऽख्यानमैंकत्रिंशद्वर्गंसूक्तं वामदेंव ऋषिर्गरुडेंन्द्रताार्क्ष्य-
विनंता- कद्रूसर्पादेवा देवतास्त्रैष्टुंभं छन्दंः पर्वंण्यध्ययने
ब्रांह्मणाभिश्रावणे चं विनियोगः॥५॥

॥ *पदपाठः* ॥

सुपर्ण० आख्यानं। एकत्रिंशद्वर्ग० सूक्तं। वाम० देंवः। ऋषिंः।
गरुडेंन्द्र० ताार्क्ष्याः। विनंताकद्रूसर्पाः। देवाः। देवताः। त्रैस्तुंभं।
छन्दंः। पर्वंणि। अध्ययने। ब्राह्मण० अभि० श्रावणे। च। वि०नि० योगः॥

॥ *भाष्यम्* ॥

एतया सकलग्रन्थस्य ऋषिदैवच्छन्दो विनियोगान् प्रदर्शयितुमुपक्रमते।

एकेन अधिका त्रिंशत् एकत्रिंशत् तावन्तोः वर्गाः। येषु सूक्तेषु तानि एकत्रिंशद्वर्गाणि। एकत्रिंशद्वर्गाणि सूक्तानि यस्मिन् आख्याने तत् एकत्रिंशद्वर्गसूक्तं। अत्रासमाप्ति सूक्तानां समुदायो विवक्षितः। सर्वाणि सूक्तानि सम्भूय एकत्रिंशद्वर्गाः सन्ति एतादृशं सुपर्णाख्यानम्। अस्याख्यानस्य सामान्यतो वामदेव ऋषिर्द्रष्टा। विशेषतस्तु या ऋक् यस्य वाक्यं स तस्याः ऋषिः। गरुडादयः सप्त यथायथमृक्षु देवताः। तत्तद्व्याख्यानसमये विशदं वक्ष्यामः। अनादेशे त्रिष्टुप् छन्दः। यत्र तु छन्दोऽन्तरं तत्र वक्ष्यते। विनियोगस्तु पर्वणि पुण्यकाले दर्शपूर्णमासं

संक्रमणव्यतीपातादौ पापक्षयार्थे पुण्यार्थे वाऽध्ययने। तथा श्राद्धभुजां श्रावणे च पितृणां तृप्तये। इति प्रथमो वर्गः॥

॥ अथ द्वितीयो वर्गः ॥

द्यावा॑पृथि॒व्यौ भव॑तो भ॒गिन्यौ॒
ते मू॑र्ति॒म॒त्यौ चर॑त॒स्तु ल॒ोकान्।
द्यौरा॑सी॒त्तत्र॒ विन॑ता सुप॒र्णी
भूमि॒स्तु ना॒ग्य॑भवत् कद्रु॒ना॒मा॥६॥

॥ *पदपाठः* ॥

द्यावा॑पृथि॒व्यौ। भव॑तः। भ॒गिन्यौ॑। ते इति॑। मू॒र्ति॑०म॒त्यौ। चर॑तः।
तु। ल॒ोकान्। द्यौः। आ॒सी॒त्। तत्र॑। विन॑ता। सु॒०प॒र्णी। भूमिः॑।
तु। ना॒गी। अ॒भ॒व॒त्। क॒द्रु० ना॒मा।

॥ *भाष्यम्* ॥

द्यौश्च पृथिवी च। द्यावापृथिव्यौ। द्वन्द्वः। द्यौरन्तरिक्षं व्योम। एते उभे क्वचित्कल्पे केनापि शापादिना कारणेन अंगनावतारधारिण्यौ भगिन्यौ स्वसारौ दक्षदुहितरौ भवतो बभूवतुः। ते उभे मूर्तिमत्यौ जङ्गममूर्ती सत्यौ लोकान् ब्रह्माण्डान्तर्गतान् चरतः चेरतुः। तत्र तयोर्द्यावापृथिव्योर्मध्ये या द्यौः सा विनता आसीत्। कीदृशी विनता? सुपर्णी। सुष्ठु पर्णानि पिच्छानि, पक्षाः यस्याः सा सुपर्णी शोभनपिच्छा पक्षिणी आकाशगामिन्यासीत्। या भूमिः सा कद्रुनामा कद्रूनाम्नी नागी सर्पिणी अभवत्। ह्रस्वत्वं छान्दसम्।

ते दैव॑स॒त्रे अप॑राध्नुवन्त्यौ॒
ततो॑ दे॒वैर्ज॒पहो॑मैः प्र॒बाधि॑ते।
प्र प॑द्येता॒ तार्क्ष्य॒मृषि॑ं भय॒ार्ते
दृष्ट्वा॑क्षि क॒द्रूवा हुति॑भिर्वि॒नाशि॑तम्॥७।

॥ *पदपाठः* ॥

ते इति॑। दे॒व॰ स॒त्रे। अप॑राध्नुवन्त्यौ। तत॑ः। दे॒वैः। ज॒प॰
हो॑मैः। प्र॒बाधि॑ते॒ इति॑ प्र॰बाधि॑ते। प्र॰ प॑द्येता॑। तार्क्ष्य॑ं। ऋषि॑ं।
भ॒य॒ार्ते॑ इति॑ भय॰ आ॒र्ते॑। दृष्ट्वा॑। अ॒क्षि॒। क॒द्रूवाः॑। हुति॑०भिः॑।
वि॒०नाशि॑तम्।

॥ *भाष्यम्* ॥

अत्रापराध्नुवन्त्याविवतीदं क्रियापदं, ते विनताकद्रूवौ देवसत्रे देवानां सत्रे यज्ञे अपराध्नुवन्त्यौ। अपराधं कृतवत्यौ। यद्यप्येकया कद्रूवैव अपराद्धं, तथापि द्वयोः साहचर्यातिशयात् द्विवचनमनपराद्धायामिति विनतायाः निरर्थकं व्यवहारमात्रं द्वित्वस्य। कद्रूः कंचिदपराधं कृतवती। हविःफूत्करणलेहनगरलोद्वमनादि। ततस्तस्मादपराधात्प्रकुपितैर्देवैस्ते उभे विनताकद्रूवौ प्रबाधिते प्रपीडिते। कैरुपायैरित्यत आह। जपहोमैरिति। अभिचारार्थे प्रयुक्तैः। तेनाभिचारेण कद्रुनाम्न्याः सर्पिण्याः अक्षिगोलकः स्फुटितः। चक्षुःस्थाने छिद्रं जातं। ते उभे एवं शंकिते। नैतावतैव दण्डेनालं, किन्तु अन्यदपि भूयिष्ठमनिष्टं सुरैः पातयिष्यते। एवं भयातुरे सत्यौ तार्क्ष्यं कश्यपऋषिं प्रापद्येताम्। शरणं प्रपन्ने। किं कृत्वा। कद्रूवाः अक्षि लोचनं हुतिभिर्होमैः आभिचारिकैर्हवनैर्विनाशितं स्फुटितं दृष्ट्वा। हवनं हुतिः भावे स्त्रियां क्तिन्। भगवन् महर्षे त्वमावयोः शरणार्थिन्योः पतिर्भव। पाणिग्रहणेनानुगृहाणेति शरणं गते।

पलाशपर्णावृन्तस्य समिदर्थे गृहाननौ।
तरन्तौ गोष्पदे कौचित् पङ्कमग्नावुभावृषी॥८॥

॥ *पदपाठः* ॥

पलाशपर्णावृन्तस्य। समित्० अर्थे। गृह० आननौ। तरन्तौ।
गोः ऽपदे। कौ। चित्। पङ्क० मग्नौ। उभौ। ऋषी इति।

॥ *भाष्यम्* ॥

अत्रेयमाख्यायिका। बालखिल्यसंज्ञकाः शतश ऋषयो व्यङ्गुलप्रमाणदेहाः बभूवुः। तेषां वृन्दं समिदाहरणार्थं कदाचिद्वने गतं, तैश्च लघीयोदेहत्वात्समित्काष्ठस्थानीयानि वृन्तानि गृहीतानि। द्वौ द्वौ मिलित्वा एकैकस्य पर्णवृन्तस्योद्वहनमतिप्रयासेन चक्रतुः। एवं द्वन्द्वशो द्वन्द्वशो बहूनि वृन्तान्युदूहुः। तत्र कौचिदेकं वनं (वृन्तं) वहन्तौ गोष्पदे वृष्टिजलपूर्णे महानद्यामिव तरन्तौ पिच्छिले पङ्के आकण्ठमग्नौ। पङ्कान्निःसरितुं तावक्षमाविव प्रेक्ष्य शक्रो जहास। शक्रोपहासेन तौ मुनी प्रकुपिताविन्द्रस्य गर्वपरिहारार्थं तार्क्ष्यापरनामधेयं कश्यपं प्रार्थयामासतुः। तयोः सहायतयान्येऽपि सर्वे सजातीयाश्च तत्र गत्वा कश्यपं प्रार्थयामासुः, अयमर्थोऽत्र वर्ण्यते। बालखिल्यवृन्दमध्यात् कौचित् पालाशीनां समिधां भारस्याहरणार्थं गत्वैकं वृन्तं द्वावपि सम्भूयोद्वहन्तौ गृहाननौ गृहाभिमुखौ बभूवतुः। गृहं प्रति आननं मुखं ययोस्तौ गृहाननौ। तयोर्मध्येमार्गं वारिपूर्णं गोष्पदगर्तं स्थलमासीत्। तन्मध्ये प्रविश्य तत्तेरतुः। तरन्तौ सन्तौ पङ्के मग्नौ। अथैतौ द्वौ मग्नौ। तथेतरेऽपि भूयांसो द्वन्द्वशः पर्णवृन्तान्युद्वहन्तः पङ्के ममज्जुः। तांस्तदवस्थानालोक्य मघोना

तदोपहसितं। तेन ते क्रुद्धाः। तदनन्तरं ताक्ष्यं कश्यपमृषिं प्रति गताः। अयमर्थ उत्तरस्याम्।

पङ्क्तै सन्नानृषींन् दृष्ट्वा बालखिल्यांस्तु गोष्पदे।
इन्द्रेण हसिते क्रुद्धास्ततस्ताक्ष्यर्मृषिं गताः॥९॥

॥ *पदपाठः* ॥

पङ्क्तै० सन्नान्। ऋषीन्। दृष्ट्वा। बाल०खिल्यान्। तु। गोःऽपदे।
इन्द्रेण। हसिते। क्रुद्धाः। ततः। ताक्ष्यं। ऋषिं। गताः॥

॥ *भाष्यम्* ॥

ऋषीन् बालखिल्यान् कर्दमे सन्नान् मग्नान् पीडितान् दृष्ट्वा इन्द्रेण हसिते सति ते क्रुद्धाः कुपिताः। तदनन्तरं ताक्ष्यं कश्यपं प्रति गताः। तं गत्वा किं चक्रुरित्यत आहु(र)परामृचम्।

तपोऽर्द्धं तवं दास्यामः सुतमुत्पांदयाण्डंजम्।
इन्द्रंस्य वि नंयेद्दर्पमात्मसंम्भावितस्य यः॥१०॥

॥ *पदपाठः* ॥

तपः०ऽअर्द्धं। तवं। दास्यामः। सुतं। उत्पांदय। अण्डंजं। इन्द्रंस्य।
वि। नयेत्। दर्पं। आत्म० संम्भावितस्य। यः॥

॥ *भाष्यम्* ॥

अस्यां बालखिल्या ऋषयः, ताक्ष्यों देवता अनुष्टुप्, छन्दः। हे ताक्ष्यं कश्यप। वयं स्वतपसः अर्द्धं तवेति तुभ्यं दास्यामः। तेन अस्मत्तपोऽर्द्धेन त्वं तं अण्डजं विहंगं सुतमुत्पादय। तं कं? यः इन्द्रस्य दर्पं गर्वं विनयेत् अपहरेत् परिहरेत्। कीदृशस्य इन्द्रस्य? आत्मसम्भावितस्य। कश्यपेन आत्मना स्वयमेव सम्भावितः अदित्यामुत्पादितः। तस्य स्वज्येष्ठसुतस्य। इत उत्तरयेन्द्रो (read ताक्ष्यः!) बालखिल्यप्रार्थनामङ्गीकृत्य तथैव कृतवानित्याह वामदेवः।

तपोऽर्द्धं बालंखिल्यानां ताक्ष्यंः पीत्वा महायंशाः।
विनंतायां दधौ गर्भंमाण्डजांनाम्नुत्तंमम्॥११॥

॥ *पदपाठः* ॥

तपः०ऽअर्द्धं। बालं० खिल्यानां। ताक्ष्यंः। पीत्वा। महा० यंशाः।
वि० नंतायां। दधौ। गर्भं। आण्डजांनां। अनुत्तंमम्॥

॥ *भाष्यम्* ॥

तार्क्ष्यः कश्यपो बालखिल्यानां तपसोऽर्धं पीत्वा स्वदेहे सङ्क्रमय्य तत्तपःप्रभावेणेन्द्रगर्वपरिहरणक्षमं गर्भं विनतायां पक्षिण्यां स्वयं पक्षिरूपो भूत्वा दधौ। आहितवान् आरोपितवान्। कीदृशं गर्भं? आण्डजानां मध्ये अनुत्तमम्। निर्धारणे षष्ठी। अण्डेषु भवा अण्डजाः पक्षिणः। तेषां इमे आण्डजाः, पक्षिसम्बन्धिनो गर्भाः। तेषां आण्डजानां गर्भाणां मध्ये अनुत्तमः। न विद्यते उत्तमो यस्मादन्यः कश्चित्सोऽनुत्तमः। तं। कीदृक् तार्क्ष्यः? महायशाः महाकीर्तिः। सुप्रजास्त्वात्। यस्य पुत्रा आदित्याः सर्वे देवाश्च गरुडश्च। इति द्वितीयो वर्गः।

॥ अथ तृतीयो वर्गः ॥

अत्र वर्गे वामदेव ऋषिः। इतिहासो देवता। चतस्रोऽनुष्टुभः। अन्त्या त्रिष्टुप्।

लब्ध्वा बीजवरं पुण्यं शौनकी तु गुरूदरी।
शुद्धक्षेत्रे च, सम्पूर्णे कालेऽमुक्त त्रिरण्डजम्॥१२॥

॥ *पदपाठः* ॥

लब्ध्वा। बीज०वरं। पुण्यं। शौनकी। तु। गुरु० उदरी। शुद्ध० क्षेत्रे। च। सं० पूर्णे। काले। अमुक्त। त्रिः। अण्डजम्॥

॥ *भाष्यम्* ॥

शुनकदक्षौ पर्यायौ। शुनकस्यापत्यं स्त्री शौनकी दक्षसुता। विनता। सा तार्क्ष्यात् बीजवरं लब्ध्वा गर्भाधानं प्राप्य गुरूदरी गर्भिणी भूत्वा काले प्रसवकाले सम्पूर्णे सति शुद्धक्षेत्रे कुरुक्षेत्रादिदेशे त्रिरण्डजं अमुक्त, मुच्लृ-मोक्षणे। अमुक्त मुमोच। अमुञ्चदिति वा पाठः। अण्डजं अण्डोद्भवं गर्भम् अमुक्त सुषुवे। कथं? त्रिवारं। अनुक्रमेण त्रीण्यण्डान्यमुञ्चदित्यर्थः।

आतुरा सा तु सुश्रोणी क्षतं कृत्वाऽग्रजाण्डजे।
भिद्यमानोर्ध्वनिष्क्रान्ता विद्युन्मेघसखाऽम्बरे॥१३॥

॥ *पदपाठः* ॥

आतुरा। सा। तु। सु० श्रोणी। क्षतं। कृत्वा। अग्रज० अण्डजे। भिद्यमाना। ऊर्ध्व० निःऽक्रान्ता। वि० द्युत्। मेघ० सखा। अम्बरे॥

॥ *भाष्यम्* ॥

सा सुश्रोणी विनता अग्रजाण्डजे क्षतं नखप्रहारं कृत्वा आतुरा दुःखार्ताऽभूत्। अग्रजाण्डजे प्रथमापत्यगर्भे। अग्रे आदौ जायत इति अग्रजं, अग्रजं च तत् अण्डं च अग्रजाण्डं। अग्रजाण्डे जात उत्पन्नः अग्रजाण्डजः प्रथमापत्यकारणं गर्भः। तस्मिन्। आतुरत्वे हेतुमुत्तरार्द्धेनाह। अण्डमध्ये गर्भरूपेण विद्यमाना अण्डे भिन्ने भिद्यमाना सती विद्युत् तडित् सौदामिनी ऊर्ध्वं निःक्रान्ता। ऊर्ध्वमन्तरिक्षे निःसृता निर्गता सा। कीदृशी विद्युत्? अम्बरे अन्तरिक्षे मेघसखा मेघस्य घनस्य सखेव सहाय इव दिवि स्थिता। समासस्तु बहुव्रीहिः। मेघः सखा यस्याः सा मेघसखा। टच् प्रत्ययो माभूदित्येतदर्थं बहुव्रीहिः। अपक्वे अण्डे अकाले चापलाद्भिन्ने तत्रत्यगर्भस्य व्यर्थत्वं मत्वाहुः आतुरा। पश्चात्तापदग्धमनस्का विनताभूत् –

ह्रिया सा परमापन्ना चिन्तयन्ती मुहुर्मुहुः।
मध्यमं निर्बिभेदाण्डं जातोऽर्कस्य सखाऽरुणः॥१४॥

॥ *पदपाठः* ॥

ह्रिया। सा। परं। आपन्ना। चिन्तयन्ती। मुहुःऽमुहुः। मध्यमं।
निः। बिभेद। अण्डं। जातः। अर्कस्य। सखा। अरुणः॥

॥ *भाष्यम्* ॥

अकालकृतेनाण्डभेदेन तस्मिन् व्यर्थीकृते स्वकृतापराधाल्लज्जया सा परमं खेदं कुर्वाणा सती मध्यममण्डं निर्बिभेद। व्यदारयत्। पाटयामास। तस्मादण्डादरुणो जातः। स चार्कस्य सखा सहायः सारथिर्बभूव॥

अरुणेन जातमात्रेण शप्ता माता तपोधना।
दुष्कृतं किं महापुण्ये पादहीनोऽस्मि चण्डि हे॥१५॥

॥ *पदपाठः* ॥

अरुणेन। जात० मात्रेण। शप्ता। माता। तपःऽधना। दुःऽकृतं।
किं। महा० पुण्ये। पाद० हीनः। अस्मि। चण्डि। हे॥

॥ *भाष्यम्* ॥

जातमात्रेण अर्द्धदेहेन अरुणेन माता शप्ता। धिक्कृता। निहिता (निन्दिता, गर्हिता?)। कथं? हे महापुण्ये, पुण्यवति। हे चण्डि, क्रूरे। त्वया इदं किं दुःकृतं। दुष्टं कर्म कृतं। यदिदमण्डमपक्वमकाले चापलात् स्फोटितं। अहं पादहीनोऽस्मि॥

तस्मिन्प्रसूते रविराजगाम
ब्रुवन् वाक्यं देवि देहीति मह्यम्॥
तवं सुतोऽयं मम वाजिवेगान्
धर्तुं शक्तो भवं च मोदमाना॥१६॥

॥ *पदपाठः* ॥

तस्मिंन्। प्र० सूंते। रविंः। आ०जगामं। ब्रुवंन्। वाक्यं। देवि। देहि। इतिं। मह्यं। तवं। सुतः। अयं ममं। वाजिं०वेगान्। धर्तुं। शक्तः। भवं। च। मोदंमाना॥

॥ *भाष्यम्* ॥

तस्मिन् अरुणे प्रसूते प्रादुर्भूते सति रविः सूर्यः समीपे आजगाम। किं कुर्वन्? इति वाक्यं ब्रुवन् सन्। इतीति किं? हे देवि। विनते इमं अपादं त्वत्सुतं मह्यं देहि। न ह्ययं पङ्गुत्वान्निरर्थकः। किं तु तवायं सुतः पङ्गुरपि सन् मम वाजिनामश्वानां वेगान् रश्मिग्रहणेन धर्तुं रोद्धुं शक्तो दृश्यते, अत एव मम कार्यकृत्। त्वं च एतेन पुत्रेण मह्यं दत्तेन सती मोदमाना हर्षिता भव। सन्तुष्टा भव॥ इति तृतीयो वर्गः।

॥ अथ द्वितीयं सूक्तम् ॥

॥ अथ चतुर्थो वर्गः ॥

वामदेव ऋषिः। गरुडो देवता। अनुष्टुप् छन्दः। तत्रैषा प्रथमा॥

गरुडस्य जातमात्रस्य त्रयो लोकाः प्रकम्पिताः।
प्रकम्पिता मही सर्वा सशैलवनकानना॥१॥

॥ *पदपाठः* ॥

गरुडस्य। जात० मात्रस्य। त्रयः। लोकाः। प्र०कम्पिताः।
प्र०कम्पिता। मही सर्वा। स० शैलवनकानना॥

॥ *भाष्यम्* ॥

जातमात्रस्य गरुडस्य तेजसा त्रैलोक्यमभिभूतमित्ययमर्थोऽत्र। वनानि फलपुष्प-समृद्धलतादुमवंति। काननान्यतिगहनानि उद्वसानि[?] निरर्थवृक्षादिव्याप्तानीति विवेकः।

गगनं नष्टचन्द्रार्कं न ज्योतींषि चकासति।
देवता भयवित्रस्ता नष्टचेष्टश्च मारुतः॥२॥

॥ *पदपाठः* ॥

गगनं। नष्टचन्द्र० अर्कं। न ज्योतींषि। चकासति। देवताः।
भय०वित्रस्ताः। नष्ट०चेष्टः। च। मारुतः॥

॥ *भाष्यम्* ॥

ज्योतींषि नक्षत्रताराग्रहादीनि न चकासति, न भान्ति। नष्टा चेष्टा गतिर्यस्य। न ववावित्यर्थः॥

नार्यो गर्भं न गृह्णन्ति समुद्राः शोषमागताः।
गावः क्षीरविवर्जिता विद्रवन्ति भयातुराः॥३॥

॥ *पदपाठः* ॥

नार्यः॑ गर्भं॑। न। गृ॒ह्ण॒न्ति॒। स॒मु॒द्राः। शोष॑ं। आ। ग॒ताः॒।
गावः॑। क्षीर॰ वि॑वर्जिताः। वि॰द्रव॑न्ति। भ॒य॒॰ आतु॑राः॥

॥ *भाष्यम्* ॥

गावः इतस्ततः विद्रवन्ति स्म। धावन्ति स्म। पलायन्ते स्म।

ब्रा॒ह्म॒णा वेद॑विभ्रष्टाः स॒र्व॒त्रा॒सु॒रु॒रोग॑माः।
स॒र्व॒तो॑ गरु॒ड॑ं ज्ञा॒त्वा तमेव श॑र॒णं ग॑ताः॥४॥

॥ *पदपाठः* ॥

ब्रा॒ह्म॒णाः। वेद॑० विभ्रष्टाः। स॒र्व॒त्र॑। आ॒सुः॒। उ॒रः॰ऽ ग॑माः।
स॒र्व॒तः॑। ग॒रु॒ड॑ं। ज्ञा॒त्वा। त॑ं। ए॒व। श॒र॒णं। ग॒ता॒ः॥

॥ *भाष्यम्* ॥

वेदात् भ्रष्टाः च्युताः विस्मृतवेदाः सर्वत्रोर्व्यामुरोगमाः आसुः। सर्वत्र भूतले उरोगमाः सर्पाः बभूवुः। सर्वैर्भूतलं व्याप्तमित्यर्थः। गरुडतेजसा आकुलत्वात् ते सर्पाः सर्वतः दशभ्यो विदिग्भ्यः गरुडं आप्तं ततं ज्ञात्वा आशंक्य गरुडात् त्रस्ताः सन्तो गरुडस्य आप्ततां शंकमानाः त्राणार्थमन्यं कमप्यलमभानास्तमेव गरुडं शरणं गताः। हे प्रभो भगवन् अपराजिता वयं त्वामेव शरण्यं शरणं प्राप्ताः स्म। अस्मान् वराकान् दीनान् त्वत्तेजसा दह्यमानान् त्वत्तो भीतांस्त्रायस्व त्रायस्वेति।

तत॒ः सर्वे॑ यथास्था॒नं त॒त्क्षणे॑ने॒ोरुगा॑ः[३] गताः।
ग॒रु॒त्म॒त्सम्भ॑वे न॒ष्टाः पुन॑ः सृ॒ष्टाः स्व॒यम्भु॑वा॥५॥

॥ *पदपाठः* ॥

तत॑ः। सर्वे॑। य॒था॰ स्था॒नं। त॒त्॰ क्षणे॑न। उ॒रुगा॑ः। ग॒ता॒ः।
ग॒रु॒त्म॒त्॰ सम्भ॑वे। न॒ष्टाः। पुन॒रिति॑। सृ॒ष्टाः। स्व॒यं॰ भु॑वा॥

॥ *भाष्यम्* ॥

ये पूर्वे सन्त्रासादेकत्रावस्थातुमशक्नुवन्त इतस्ततो विचेरुस्ते गरुडादभयं प्राप्य सद्यस्कालं उरगाः यथास्थानं स्वे स्वे स्थाने गताः। तथापि गरुत्मतः सम्भवे प्रादुर्भावे जन्मकाले उत्पन्नस्वहृद्गतसन्तापबलादेव नष्टाः मृताः। स्वयम्भुवा पुनः सृष्टाः। न केवलं सर्पा एव। अन्येऽपि चन्द्रार्कसमुद्रादयः पुनः सृष्टाः॥

---

[३] 'उरुगाः' इत्यस्य स्थाने एका पदपाठमातृका 'उर्व्याम्' इति पाठान्तरं स्वीकरोति।

म॒घानं॑क्षत्रजातानां, स॒र्ववे॑दश॒रीरि॑णाम्।
स॒हस्र॑ंवर्षग॒र्भाणां॑ अ॒ग्निस्त॑म्भः स्म॒ जाय॑ते॥६॥

॥ *पदपाठः* ॥

म॒घान॑ंक्षत्र०जातानां। स॒र्ववे॑द०श॒रीरि॑णां। स॒हस्र॑ं०वर्षग॒र्भाणां॑।
अ॒ग्नि० स्त॑म्भः। स्म॒। जाय॑ते॥

॥ *भाष्यम्* ॥

एवंविधो दुर्जयो महाप्रतापतेजोमयोऽतिदुःसहो गरुड एवासीत्तत्र किं कारणमित्याशङ्कायामुत्तरत्वेन सूक्तस्यान्त्यामृचमाह। सा षष्ठी। मघानक्षत्रेत्यादि। सहस्रवर्षाणि यस्यासौ स सहस्रवर्षः। सहस्रवर्षो गर्भो गर्भवासः। अण्डमध्ये वासो येषां तैजसशरीरावयवानां ते अवयवाः सहस्रवर्षगर्भास्तेषामवयवी अग्निस्तम्भ इव जगद्दाहको जायते स्म। स च गरुडः। किंलक्षणानामवयवानां? सर्ववेदशरीरिणां। सर्वे च ते वेदाश्च सर्ववेदाः। शरीरमेषामस्तीति शरीरिणस्तैजसदेहावयवाः। एषां शरीरं कार्यमस्तीत्यर्थः। अवयवाः कारणं। सर्ववेदैः कारणभूतैः शरीरिणः शरीरारम्भकाः। सर्ववेदशरीरिणः। तेषां सर्ववेदशरीरिणां अवयवविशेषणानि। त्रीण्यपि षष्ठीबहुवचनानि। पुनः किंलक्षणानां शरीरावयवानां? मघानक्षत्रजातानां। यद्यपि अवयवाः मघायां न जातास्तथापि अवयवानामशेषाणां देहो मघायां प्रसूतः। अण्डं निर्भिद्य बहिर्निःसृतः। अवयविनो जन्म तदीयेष्ववयवेषूपचर्यते। अथवा प्रकारान्तरेणार्थः। तदैवं योजना। एकस्यैव गरुडस्य दुर्निरीक्ष्यप्रकाशतया अनन्तैरिव शरीरैर्भासमानत्वाद्बहुत्वनिर्देशः। सहस्रवर्षगर्भाणां गरुडानां मयूखराशिरेकत्र मिलितः सन् अग्निमयः स्तम्भ इव जायते स्म। अण्डं गरुडे निःसृते सति। सहस्रं वर्षाणि गतानि यस्यासौ सहस्रवर्षः। सहस्रवर्षं गतो गर्भवासो येषां ते सहस्रवर्षगर्भाः तेषां॥ यद्वा सहस्रवर्षो गर्भो गर्भावस्था येषां ते सहस्रवर्षगर्भाः तेषां। पुनः किंलक्षणानां? खगेश्वराणां। मघायां जातानां अण्डे स्फुटिते बहिःप्रादुर्भूतानां। एकस्यैव गरुडस्य बहुत्वेन व्यवहारोऽत्रानन्तरूपभ्रमजनकत्वात्। किं लक्षणानां गरुत्मतां? सर्ववेदशरीरिणां। शरीरमेषामस्तीति शरीरिणः। सर्ववेदैः शरीरिणः। सर्ववेदशरीरिणः। तेषां वेदशरीरिणां। एवंविधानां वैनतेयानां रश्मिसमूहः। अग्निमयस्तम्भ इव दृश्यते स्म॥ इति चतुर्थो वर्गः।

॥ अथ तृतीयं सूक्तम् ॥

॥ अथ पञ्चमो वर्गः ॥

ओजस्विनं वीरमसह्यसाहं
स्तोष्याम्यहं गरुडं वैनतेयम्।
मातरं यो निरक्रीणात्कद्रूवा दास्ये पराजिताम्॥१॥

॥ *पदपाठः* ॥

ओजस्विनं। वीरं। असह्य० सहं। स्तोष्यामि। अहं। गरुडं। वैनतेयं। मातरं। यः। निःऽअक्रीणात्। कद्रूवा। दास्ये। परा० जिताम्॥

॥ *भाष्यम्* ॥

प्रस्तारपंक्तिः। वामदेव आह। अहं तं गरुडं स्तोष्यामि। परस्मैपदं अन्येषामुपकारार्थत्वात्। किंलक्षणं ओजस्विनं वीरं? ओजः आन्तरं बलं तद्वान् ओजस्वी। एवंविधो वीरः [वि-ईरः] शत्रूणामीरयिता प्रेरयिता अपनोदकः। शारीरबलवान् अत एव असह्यसाहं। न सोढुं शक्या असह्याः योद्धारः, तान् सहते इत्यसह्यसाट्। तं। ईदृक् प्रतापी कस्मात्? यतो वैनतेयः। विनता पतिव्रता व्रतवती महातपाः, ईदृश्याः [पुत्रः] एवंविध एव स्तुतो भवति। तं कं? यः उभाभ्यां सपत्नीभ्यां पराजयनिमित्ते पणे दास्ये दासीत्वेन पणीकृते सति कद्रूवा सर्पिण्या पराजितां मातरं निरक्रीणात्। निःक्रयं दत्तवान्। दासत्वात् निःकृतिं चकार मातुः। अमृतकुम्भार्पणेन दासीभावात् मोचितवान्। यः मातरं मोचयितुं सुधाघटं निःक्रीणाति स्म। पणस्य निःक्रयत्वेनार्पितवान्॥

तदस्य कर्म वक्ष्यामि वैनतेयस्य श्रीमतः।
पृथिव्यां प्रथितयशसः सोमाहरणजं महत्॥२॥

॥ *पदपाठः* ॥

तत्। अस्य। कर्म। वक्ष्यामि। वैनतेयस्य। श्रीमतः। पृथिव्यां। प्रथित० यशसः। सोमाहरण०जं। महत्॥

तृतीयं सूक्तम्

॥ *भाष्यम्* ॥

निगदव्याख्याता।

**अस्यैतादृशस्य वीरस्यौजस्विनोऽसह्य-
साहस्य, असह्यमपि शत्रुं प्रतिकर्तुं
क्षमस्य विनतापत्यस्य प्रशस्यं कर्म,
सोमरक्षकान् विजित्येन्द्रं च
परिभाव्य दिवः सोमानयनरूपमहं
प्रकाशयिष्यामि यस्य विश्वस्मिन्नपि
जगति अनेनान्यजनाशक्येन कर्मणा
कीर्तिः सर्वत्र प्रसृता वर्तते।। सं०**

**कद्रूश्च वै सुपर्णी च पस्पृधाते सरूपयोः।
सा कद्रूः सुपर्णीमजयत्,
साब्रवीत्॥३॥**

॥ *पदपाठः* ॥

**कद्रूः। च। वै। सु०पर्णी। च। पस्पृधाते इति। स० रूपयोः।
सा। कद्रूः। सु०पर्णी। अजयत्। सा। अब्रवीत्॥**

॥ *भाष्यम्* ॥

सोमाहरणे प्रसंगमुत्पादयितुमाहोत्तरं। या पूर्वं 'भूमिस्तुनार्य [ग्य] भवत्कद्रुनामे'त्युक्ता सह्या [सा हि] कद्रूः। सुपर्णी पक्षिणी विनता च। सुष्ठु पर्णानि पिच्छानि पक्षौ वा यस्याः सा सुपर्णी। यद्वा सुष्ठु पतनं खमार्गे शीघ्रगमनं यस्याः सा। एते उभे सरूपयोः सदृशयोः समानयोर्भर्तुर्गृहे सर्वकार्यकरणे अधिकारयोर्विषये पस्पृधाते। 'स्पर्द्ध' संघर्षे। अस्यात्मनेपदिनो लिटि प्रथमद्विवचनान्तं। अहं मुख्या स्यामिति। सापत्न्याद् द्वेषमूलमित्यर्थः। हृद्गतस्याधिकारयोरिति पदस्य सप्तम्यन्तं तस्य विशेषणं सरूपयोरिति। एवं स्पर्द्धामूले अन्तर्वैर उत्पन्ने दास्यरूपपणपूर्वके परस्परविवादेऽङ्गीकृते भिन्नयोर्मतयोर्निष्कर्षतः संशोधनार्थमुपाये कृते सा जिह्मा कद्रूः सर्पिणी सुपर्णीं विनतां कपटकृते[त्ये]नासत्योपायेनाजयत। यथा सुयोधनोऽजातशत्रुम्। तद्विवादोपक्रमे वादप्रसंजनकामया कद्रूवा पूर्वं ना(चा?)न्यप्रकारे अनुपपन्ने वाक्यसंदर्भे प्रागुक्ते सति पश्चात् सा विनतामब्रवीत्[४]। किमब्रवीदित्यत आह।

---

[४] 'सत्यं किलैतद्' इति परर्चा तु विनताया वाक्यं कद्रूं प्रतिं, उपालम्भस्वरूपम्।

सत्यं किलैतदुपरे वदन्ति
दूरात्मकं दीर्घजात्याः सदैव।
अप्रज्ञाना कलहे या सुतं मे
काणा घोराणि वचनानि[५] कृन्तति॥४॥

॥ *पदपाठः*॥

सत्यं। किल। एतत्। अपरे। वदन्ति। दूर०आत्मकं। दीर्घ० जात्याः। सदा। एव। अप्रज्ञाना। कलहे। या। सुतं। मे। काणा। घोराणि। वचनानि[५]। कृन्तति॥

॥ *भाष्यम्* ॥

अस्याः पदान्येवं। सत्यं। किल। एतत्। अपरे। वदन्ति। दूरात्मकं। दीर्घ० जात्याः। सदा। एव। अप्रज्ञाना। कलहे। या। सुतं। मे। काणा। घोराणि। वचनानि। कृन्तति॥ पूर्वे आद्याः परे त्वाधुनिकाः। न परे अपरे। आद्याः पुरातनाः इत्यर्थः। दीर्घा मुख्या। आद्या जातिर्ब्राह्मणजातिः। दीर्घजातौ भवाः दीर्घजात्याः। अपरे आद्याः पुरातनाः। दीर्घजात्याः विप्राः। किलेति सर्वशास्त्रप्रसिद्धमेतद् वाक्यं सत्यमेव सदा वदन्ति। किं कृत्वा? ते वेदविदो वदन्ति। दूरात्मकमुद्दिश्येति शेषः। दूरेति विप्रकृष्टे गगने आत्मा शारीरं यस्यासौ दूरात्मक आदित्याश्वः। तमुद्दिश्यैतत्सत्यं वदन्ति। तमुद्दिश्येति कोऽर्थः? तस्य स्वरूपवर्णनार्थमित्यर्थः। एतत्किं? सूर्याश्वः श्वेत इति इदं हृद्गतं। सा तु विपरीतवादिनी कद्रूः कलहे निमित्तभूते सति, कलहे क्लेशे उत्पाद्ये सति अन्यथा वदतीति शेषः। अन्यथा किं? सूर्याश्वः कृष्ण इति कलहमुत्पादयितुमसत्यं वदतीत्यर्थः। सा का? या असत्यमप्रियं गर्हणात्मकं चेत्येवं दोषत्रयवद् घोरं। तादृशानि घोराणि दुःसहानि रौद्राणि वचनान्युक्त्वेति शेषः। मे सुतमरुणं दैव्या शक्त्या अणिमाद्यष्टविधैश्वर्यबलेन रात्रौ रात्रौ रूपान्तरेणास्मद्गृहे[हमे]त्यार्काश्वरूपं कथयन्तं सूर्यसारथिं सत्यज्ञं सत्यवादिनं घोराणि वचनानि श्रावयति[न्ती] कृन्तति। तं मत्पुत्रं छिनत्तीव। व्यथयतीत्यर्थः। सत्यज्ञानां सत्यशीलानां दुष्टैर्मूर्खैः प्रयुक्तमनृतं वचो वज्रप्रहारायत इत्याशयः। 'रवेरश्वोऽसितः। यानि शास्त्राणि सितमाहुस्तान्यलीकानि। आगमात् प्रत्यक्षं प्रमाणं बलीयः। अयं पंगुर्मूर्खोऽरुणः किं वेत्ति, मृषैव वदती'त्येवं विधानि वचनानि। कीदृशी कद्रूः। अप्रज्ञाना। नास्ति प्रकृष्टं सत्यं ज्ञानं यस्याः सा। काणा चैकनेत्रविकला। काणो हि प्रायेण दुःष्टान्तःकरणो भवति।

---

[५] 'वचनानि' इति पदं मूले शुद्धतया तृतीये 'ना' पदे उदात्तं किन्तु पदपाठमातृकायां भ्रान्तिवशाद् एतदाद्योदात्तरूपेण (वचंनानि) अंकितम्।

अथाष्टम्या[६] कद्रूः वादे पराजयनिमित्तं पणमाविःकुर्वती तां प्रत्युवाच -

यावत्त्वं द्वाभ्यां विनते सुपर्णि
चक्षुर्भ्यां पश्यस्यरुणस्य मातः।
तावच्चेन्नाहमेकेन पश्ये
तद्दासी तव स्यां त्वमु वा मम स्याः[६]॥५॥

॥ *पदपाठः* ॥

यावत्। त्वं। द्वाभ्यां। वि० नते। सु० पर्णि। चक्षुः ऽभ्यां पश्यसि। अरुणस्य। मातरिति। तावत्। चेत्। न। अहं। एकेन। पश्ये। तत्। दासी। तव। स्यां। त्वं। ऊँ इति। वा। मम। स्याः॥

॥ *भाष्यम्* ॥

हे विनते। हे सुपर्णि। हे अरुणस्य मातः। त्वं। द्वाभ्यां। चक्षुर्भ्यां यावदिति यावन्मात्रं पश्यसि अहं तु एकेनैव चक्षुषा चेत् तावदिति। तावन्मात्रं न पश्ये। पश्येयं। तत्तर्हि तव दासी अहं स्यां भवेयं। त्वमु वा मम स्याः। अथवा विवादे पराजयं प्राप्य त्वं मम दासी स्याः भवेः।

प्रेक्ष्यः सुपारं विनते सुपर्णि
सौपर्णं चक्षुरिति वै श्रुतं मे।
अश्वः श्वेतोऽनर्वासिष्ट स्थाणौ
तस्याऽसौ कृष्णस्तिर्यङ्ङवावाति बालः॥६॥

॥ *पदपाठः*॥

प्रेक्ष्यः। सु०पारं वि० नते। सु० पर्णि। सौपर्णं। चक्षुः। इति। वै। श्रुतं। मे। अश्वः। श्वेतः। अनक्। असिष्ट। स्थाणौ। तस्य। असौ कृष्णः। तिर्यङ्। अव। वाति। बालः॥

॥ *भाष्यम्* ॥

हे विनते। हे सुपर्णे। आदित्यस्याश्वः आवाभ्यां प्रेक्ष्यः अवलोकनीयः। अर्थादुरित

---

[६] भाष्ये त्वेषा पञ्चमी ऋक् अस्य सूक्तस्य अष्टमी-ऋग्रूपेण 'अनृतं वै त्वं वदसि' इत्यस्याः ऋचः पश्चात् प्रतिष्ठापिता वर्तते।

[? अर्थादादित्य-]मात्रस्याध्याहारः। कथं? सुपारं यथा स्यात्तथा। क्रियाविशेषणं, सुतरां पारः। पर्यन्तो यत्र प्रेक्षणे तत् सुपारं। यावदन्तं। शक्तेरूर्ध्वमपि प्रेक्ष्यः। चक्षुः खलु सौपर्णमेव नान्यदीयं। यथा पक्षिणां चक्षुः प्रबलं तथा नान्येषां, तत्रापि सुपर्ण्याः बलवत्तमम्। अतस्त्वया विशेषेण सूर्याश्वः अवलोकनीयः। त्वं हि द्रष्टुं क्षमा। सूर्यस्याश्वः श्वेत इति यद्वाक्यं केचिद्वदन्ति। तदनक् अप्रमाणं। प्रतिश्रोणः(०श्रवणः?) स्थाप्यः। नगसिष्टेति श्रुतिर्निर्यामिनी। ननु अश्वः श्वेत इति वाक्ये वेदप्रमाणं तर्हि त्वन्मते सत्यं किं? वद। इत्यपेक्षायामिदमाह। तस्याश्वस्य असौ दूरदेशस्थः बालः पुच्छबालः स्थाणौ स्तम्भे वृक्षशंकौ अति प्रांशुतरे शुष्कद्रुमाग्रे असिष्ट। आशिश्लेष। असावित्यदसो रूपेण विप्रकृष्टत्वं बोधितं। किंभूतोऽश्वलांगूलबालः। कृष्णः। अमुं बालं प्रेक्षस्व। तस्य काष्ण्यर्यादश्वस्यापि काष्ण्यर्यमवधेहि।

ननु ऊर्ध्वतरस्वर्लोकवर्तिनोऽश्वस्य पुच्छबालो नीचैर्वर्त्तिभूतलस्थे स्थाणौ कथमागत्य लग्न इत्यपेक्षायामाह। तिर्यङ् अववातीति। तिरः अञ्चतीति तिर्यङ् तिर्यग्गतिर्वक्रसंचारीवायुः। एनं बालमाकृष्य अवेति अवकृष्टः नीचैः वाति। अवाञ्चं यथास्यात्तथा गच्छति। अतो वाय्वाकृष्टो बालः स्वर्लोकादमुष्मिन् वृक्षाग्रे लग्नः। 'अश्वमिव त्वा बालवन्तं' ('अश्वं न त्वा वारवन्तं', ऋ० १.२७. १), "बाला (='वाराः', सं०) दंशवारणार्था भवन्ति" इति निरुक्तम्। इति पञ्चमो वर्गः।

॥ अथ षष्ठो वर्गः ॥

आऽनुं दीदिहीष॒ उन्न मर्दैन माद्यसि॒?
न बालं॑ पश्यामि॒, किमापं॑श्यसि?
यद्यश्वं॑: श्वे॒तो यदि॒ वाऽपि॒ कृष्ण॒:?
किन्नु केन॒ नु क॒थं नु॰ पं॑श्यसि॥७॥

॥ *पदपाठः* ॥

आ। अनुं॑। दीदि॒हीषे॒। उत्। न। मर्दैन। मा॒द्य॒सि॒। न। बालं॑। प॒श्या॒मि॒। किं॑। आ। प॒श्य॒सि॒। यदि॑। अश्वं॑:। श्वे॒तः। यदि॑। वा॒। अपि॑। कृष्णः। किं॑। नु। केन॑। नु। क॒थं। नु। प॒श्य॒सि॒॥

॰ काश्चिन्मातृका अत्र 'नु' इत्यस्य स्थाने 'न' इति पठन्ति यत्त्वर्थदृष्ट्या समीचीनतरम्। किन्तु पदपाठो भाष्यकारश्च अत्रापि पाठे 'नु' इत्येव स्वीकुरुतः।

तृतीयं सूक्तम्

॥ *भाष्यम्* ॥

अनया विनता वदति। कद्रूवा 'तस्यासौ कृष्णो बालः पुच्छोद्भवः स्थाणौ लग्नस्तिष्ठति, वायुना समाकृष्टस्ततोऽश्वमपि कृष्णं जानीहि' इति पूर्वयर्चा प्रतिज्ञाते विनता तस्या उक्तं दूषयितुं षष्ठ्योत्तरमाह। नु इति कोमलामन्त्रणे। हे कद्रूः। त्वं आसमन्ततः दीदिहीषे। दीप्यसे। स्वस्य दीप्तिं दर्शयसि। दीप्तेव भवसि। ज्ञानेन प्रकाशसहव(? सदृशीव?) अप्रमाणमपि स्वमतं मिथ्यादर्पेण प्रमाणमिव मन्यसे, किं च अनेन मदेन निःकारणगर्वेण उन्माद्यसि न? अयं 'न'-कारः काकूक्त्या। उन्मत्ता न भवसि किम् ? एवमलीकं स्थापयन्ती उन्मत्ता किं न भवसि? अहं तु सम्यक् चक्षुष्मत्यपि पक्षिजातित्वाच्च दृग्बलाधिक्यं धारयन्त्यपि स्थाण्वग्रे लग्नं बालं न पश्यामि। त्वं नु आसमन्तात् बालं पश्यसि। अपि च अश्वः यदि श्वेतो यदि वा कृष्णोऽस्ति। तथापि नु इति कोमलामन्त्रणे त्वं किं पश्यसि। नु च। केन हेतुना विशिष्टेन कारणेन न पश्यसि। कथं नु वा किं रूपाद्यैः पश्यसि। अत्र त्रयाणामपि समानार्थानां पदानां प्रयोगो निर्भर्त्सनातिशयद्योतनार्थः।

अथ अष्टम्यर्चा विनता स्वप्रतिज्ञामाविष्करोति -

अनृतं वै त्वं वदसि कद्रु काणे प्रतिघृष्टदर्शने।
सर्वश्वेतं ह्यहं मन्ये नाऽस्य कृष्णोऽस्ति कश्चन॥८॥

॥ *पदपाठः* ॥

अनृतं। वै। त्वं। वदसि। कद्रु। काणे। प्रतिघृष्ट० दर्शने।
सर्व० श्वेतं। हि। अहं। मन्ये। न। अस्य। कृष्णः। अस्ति।
कः। चन॥

॥ *भाष्यम्* ॥

कद्रु शब्दोऽत्र ग्रन्थे द्विविधोऽस्ति। उकारान्तो नद्यन्तश्च। *'यूस्त्याख्यौ नदीति'* (पा. १.४.३)। इह तु नद्यन्तस्य सम्बोधनम्। हे कद्रु। हे काणे। एकनेत्रे। हे प्रतिघृष्टदर्शने। काणत्वं तु प्रागेव *'द्यावापृथिव्यौ भवतो भगिन्यौ, ते देव सत्रे अपराध्नुवन्त्यौ।'* इत्यत्र कद्रूवा अक्षि आहुतिभिर्विनाशितमिति स्पष्टमुक्तं। हे प्रतिघृष्टदर्शने। घृष्टमिति घर्षः संघर्षः स्पर्द्धातिशयः द्वेषः। घृष्टं संघृष्टं संघर्षाक्रान्तं द्वेषाक्रान्तं। प्रतीतिप्रातिमुख्येन घृष्टं संघृष्टं घर्षान्वितं स्पर्द्धाबहुलं द्वेषाक्रान्तं दर्शनं अन्तःकरणं यस्याः सा प्रतिघृष्टदर्शना। तत्सम्बोधनमिदं। त्वमनृतं वदसि। वै निश्चये। काणत्वादर्द्धदृष्टेः सर्वसामान्यमपि द्रष्टुं सामर्थ्यं न विद्यते। तर्हि विश्वेभ्योऽप्यधिकं किमुत। हीति निश्चये। अहममुमश्वं सर्वश्वेतं मन्ये। सर्वत्र

सर्वाङ्गप्रत्यङ्गेषु अवयवरोमपुच्छबालबालैकदेशेषु श्वेतः। तं। अस्याश्व[स्य] कश्चन कोऽप्यंशः बालो बालैकदेशो वा कृष्णो नास्ति।

अथ विनता पराजये दास्यमेव पणत्वेनाङ्गी कुरुते। सा च नवमीमृचमाह -

दासीं ते स्यामि॒ह सं॑र्पमा॒तर्
यद्ध्ये३॑तदे॒वं न मृषा ब्र॑वीषि।
मम॑ वा॒ त्वम॑दिते दा॒स्यम॒द्य
क॑रि॒ष्यसि॒ हन्त॑ चे॒दाऽव॑गत्वा॥९॥

॥ *पदपाठः* ॥

दासीं। ते॒। स्या॒मं। इ॒ह। स॒र्प॒० मा॒तः॒। यत्। हि। ए॒तत्। ए॒वं। न। मृ॒षा। ब्र॒वी॒षि॒। मम॑। वा॒। त्वं। अ॒दि॒ते॒। दा॒स्यं। अ॒द्य। क॒रि॒ष्यसि॑। हन्त॑। चे॒त्। आ। अ॒व॒० ग॒त्वा॥

॥ *भाष्यम्* ॥

विनतोवाच। हे सर्पमातः। हे कद्रूः। तर्हि अहं ते दासी स्यां भवेयं। इह संसारे। हि निश्चये। यत् यदि। त्वं। एतद्वाक्यं। पूर्वोक्तं अश्वः कृष्णो, बालश्च कृष्णः स्थाणौ लग्नो दृश्यत इत्येवं मृषा न ब्रवीषि। हे अदिते। अखण्डिते। सौभाग्यवति। हे कद्रूः। हन्तेति खेदे। पणे पराजयं प्राप्य त्वं मम वा अद्य दास्यं करिष्यसि। यद्वा हन्तेदानीं चेदश्वः श्वेतो भविष्यति। ततस्तं श्वेतमवगत्वा। अवगत्वा अवगत्य ज्ञात्वा। '*समासे क्त्वोल्यपि*' नियमेन प्राप्तेऽपि '*क्त्वाऽपि छन्दसी*'ति (पा. ७.१.३८) न ल्यप्।

अथ विनता दशम्यर्च्चाऽश्वस्य शौक्ल्यकाष्ण्यर्यविवेकज्ञानाय दूतप्रेरणं स्वयं वोभाभ्यामर्कबिम्बसन्निधौ गमनमुपायत्वेनाचष्टे -

दू॒तं प्र हि॑ण्वो मात॒रिश्व॑न-
आ॒शासा॑वो॒ वक्ष्य॑ति तद्य॑थात॒थम्।
उ॒भे वा॑ स्व॒यमे॒व गं॑च्छाव कद्रु
वहा॑मि त्वा वा॒जी[ं] चं॑रति॒ यत्रासौ॥१०॥

[ं] मातृकायामत्र 'वाजी' इत्यस्य स्थाने 'दासी'-पदं प्राप्यते यत्तु तत्पठता अपरेण केनचिद् अनन्तरं शोधितम्।

॥ *पदपाठः* ॥

दूतं। प्र। हिन्व। यः। मातरिश्वने। आशासावः। वक्ष्यति। तत्। यथा० तथं। उभे इतिं। वा। स्वयं। एव। गच्छाव। कद्रु। वहामि। त्वा। वाजी। चरति। यत्र। असौ॥

॥ *भाष्यम्* ॥

हे कद्रु, मातरिश्वन इति द्वितीयार्थे चतुर्थी। मातरिश्वानं वायुं। तत्र (?तं) दूतं प्रहिण्वः प्रेरयावः। अमुना वायुना दूतेनोच्यमानं तथ्यत्वेन आवामाशासावः। आशास्वहे वाञ्छावः। असौ पवनो दूतो वक्ष्यति कथयिष्यति श्वैत्यं वा काष्ण्यं वा। तत् यथातथमेव (यथातथं) सत्यमेव मन्तव्यं। यद्वा आवामुभे अपि स्वयमेव गच्छाव। लडर्थे लोट्।

'ननु पक्षिणी गगने प्रयातुं क्षमा। अहमपात् काणा च निःपक्षा च, कथं वा गन्तुं शक्नोमि' इत्याशङ्क्य आह। हे कद्रु त्वा त्वां मत्पृष्ठेन वहामि तत्र प्रापयामि। '*वह*' प्रापणे। यत्रासौ वाजी यस्यां वीथ्यां चरति॥

एवं पूर्वयर्च्या विनतया कद्रूं स्वपृष्ठ आरोप्याश्ववर्णपरीक्षार्थमर्करथनिकटे गन्तुमुपक्रान्ते सति कुटिलया कद्वा स्वात्मजान् सर्पान्प्रेष्यादित्याश्ववेष्टने कारितमौपाधिकं काष्ण्यमुत्पाद्य प्रांशुशुष्कद्रुमाग्रे कंचन तनयं केशवत् कृतातिसूक्ष्मं कृष्णशरीरं कपटेन लग्नं लम्बमानं च प्रागेव विधाय विनतामूर्ध्वगमनार्थे प्रेर्य चाचिरादेव वृक्षाग्रावलम्बी तुरगलाङ्गूलबालसदृशो नागो विनतायै प्रदर्शितः। तत 'एष बालो लम्बते' इत्यनया विनतां [विनते] त्वया विवादे हारितं, पराजयं प्राप्तासि इत्युक्तं च॥ इति षष्ठो वर्गः।

॥ चतुर्थं सूक्तम् ॥

॥ अथ सप्तमो वर्गः ॥

एष बालो लम्बते वृक्षशङ्कौ
कच्चिदेनं पश्यसि लम्बमानम्।

जिता मेऽसि समुद्रसाक्ष्याच्-
छूद्रा मे भव त्वमाश्रमात्॥१॥

॥ *पदपाठः* ॥

एषः। बालः। लंबते। वृक्ष० शंकौ। कत्। चित्। एनं। पश्यसि। लंबमानं। जिता। मे। असि समुद्र० साक्ष्यात्। शूद्रा। मे। भव। त्वं। आश्रमात्[१]॥

॥ *भाष्यम्* ॥

कद्रूराह। हे विनते पश्य। वृक्ष एव शंकुः, वृक्षशंकुः। तस्मिन् वृक्षशङ्कौ शुष्कवृक्षाग्रे लग्नः एषः बालः पुच्छोद्भवः लम्बते लम्बमानो दृश्यते। एष चार्काश्वस्य पुच्छात् त्रुटितो वातोद्धूतो वायुवशादागत्य वृक्षाग्रे लग्नः। कच्चिदिति प्रश्ने एनं लम्बमानमश्वस्य पुच्छजं बालं पश्यसि? काकूक्त्या क्रियापदं अर्थात् 'पश्यामी'ति विनतया प्रत्युक्ते कद्रूः परुषवाक्यमेव दुष्टचित्तोवाच। किं? हे विनते। त्वं मे मया जितासि। ततश्च पणनिमित्तं त्वं मे दासी भव। अत्र *'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयो'*रित्यनुवर्तमाने (पा० ८.१.२०) *'ते मयावेकवचनस्ये'*ति (पा० ८.१.२२) षष्ठीचतुर्थ्योरेकवचनयोगे अस्मदः प्राप्तो मे इत्यादेशो 'युष्मदस्मदोरिति सूत्रे विभक्तीनां व्युत्क्रमेणोपादानादिस्थं (-त्वं?) सूचितं। क्वचिदनुक्तविभक्तियोगेऽपि युष्मदस्मदोरेते आदेशा स्युः। तेनेह तृतीयैकवचन-टा-संयोगेऽस्मदो मे इत्ययमादेशः। 'जिता मेऽसि समुद्रसाक्ष्यादि 'ति।

---

[१] आश्रमात् (आ०श्रमात्, श्रान्तिपर्यन्तम्) इत्यत्र पदपाठे पदच्छेदाभावः, उपसर्गस्य चानुदात्तत्वम्। एतदसामान्यम्।

हे विनते त्वं मे मया जितासि। 'पृथिवि ते धृता लोका' इत्यादिवत्। कथं जितासि समुद्रसाक्ष्यात्। साक्षिणो भावः साक्ष्यं समुद्रस्य साक्ष्यं समुद्रसाक्ष्यं तस्मात्। एतस्मिन् पणकरणे पराजये च सागरः साक्षी। अतः पराजितत्वात् त्वं मे मम शूद्रा भव। शूद्राशब्दो दासीत्वं लक्षयति। एवंलक्षणया दासी भवेत्यर्थः। न हि त्रैवर्णिकानां दासत्वेऽधिकारः। अतः शूद्राशब्देन दासी [व्यज्यते]। कथं भव। आ श्रमात्। श्रमादा। श्रमं खेदं गात्रावसादमभिव्याप्य। यावच्छरीरस्यावसादो जायते तावत्पर्यंतं प्रत्यहमहोरात्रं मम दासत्वं कुरु। उद्वहनादीनि अधमकर्माण्यविश्रान्तं कुरु। तदानी[म]सत्यवादित्वात्। ऋजुमनसा विनतया दासीत्वमङ्गीकृतं। अहं ते दास्यस्मीति। ततो विनतायां दासीभावापन्नायां हर्षिताऽनृतकारिणी दुष्टचित्ता कद्रूः परुषाणि वचांसि प्रायुङ्क्तोत्तरयच्र्चा –

कद्रूरुवाच –

समुद्रे रमणीयकं द्वीपं शुश्रुम शाश्वतम्।
नागानामालयं पूर्वं तत्रं नो विनते वह॥२॥

॥ *पदपाठः* ॥

समुद्रे। रमणीयकं। द्वीपं। शुश्रुम। शाश्वतं। नागानां।
आलयं पूर्वं। तत्रं। नः। वि०नते। वह॥

॥ *भाष्यम्* ॥

पदान्यस्याः सुगमानि। हे विनते। वयं समुद्रमध्ये रमणीयकं नाम द्वीपं कंचिच्छुश्रुम। शृणुमः। शाश्वतं नित्यं अकालभंगभयहीनम्। तं च द्वीपं नागानामुरगाणां पूर्वं मुख्यं परमप्रियमालयं निवासम्। त्वं दासी असि। अतः नोऽस्मान् पृष्ठे समारोप्य वह। तं द्वीपं प्रापय। तत्र मुंच। एवं प्रेरितया सत्याद् भ्रष्टया विनतया दास्यं प्राप्तया यद्यत् कद्रूवा समादिष्टं तत्तत्तथाकृतम्। चिरकालमुद्वहनं कृतम्। तदिदं मातुर्महदुःखं नित्यं पश्यन् गरुडः कदाचिदश्रूणि दुःखितो मुमोच। ततस्तं माताश्रुपातं निवारयन्त्युत्तरया प्राह –

वर्षस्यश्रूणि किमिदं गरुत्मंस्
तार्क्ष्यस्य पुत्रस्त्वमरिष्टनेमे[१०]।

---

[१०] 'अरिष्टनेमे' इत्यस्मिन् संबुद्धिपदे आद्युदात्तत्वस्य कारणमन्वेषणीयम्। गरुत्मन्, विहग, द्विजेन्द्र इत्यन्यानि त्रीणि पदानि सर्वानुदात्तानि। वाक्यारम्भे, प्रथम-तृतीयपादारम्भ एवं संबुद्धिपदस्याद्योदात्तत्वम्। कदाचिच्छुद्धं पदं षष्ठ्यन्तं ०'नेमेः' इति ('स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः', ऋ० १.८९.६) तार्क्ष्यस्यैव नामान्तरमरिष्टनेमिरिति।

न तादृ॑शानां विहग द्विजेन्द्र
शोच॑त्य॒पत्य॒मिति॒ वै श्रु॒तं मे॑॥३॥

॥ *पदपाठः* ॥

वर्ष॑सि। अश्रू॑णि। किं। इ॒दं। ग॒रु॒त्म॒न्। ताक्ष्र्य॑स्य। पु॒त्रः। त्वं। अरि॑ष्ट० नेमे। न। तादृ॑शानां। वि॒ह॒ग॒। द्विज॒० इ॒न्द्र॒[11]। शोच॑ति। अ॒पत्य॑ं। इति॑। वै। श्रु॒तं। मे॒॥

॥ *भाष्यम्* ॥

हे गरुत्मन्! हे अरिष्टनेमे! इदं किमद्भुतं। अघटमानं। यत् त्वमश्रूणि वर्षसि। पर्जन्यो बिन्दूनिवाश्रान्तं मुञ्चसि। गरुत् पिच्छं, गरुंति पिच्छानि यस्यासौ गरुत्मान्। तत्सम्बोधनं। न रिष्टा नष्टा नाशं प्राप्ता नेमिर्मर्यादा धर्ममर्यादा यस्यासावरिष्टनेमिः। रुष-*रिष* हिंसायां। रिष्टा हिंसिता नाशिता। नेमिस्तु रथचक्रस्य धारा। '*रेखामात्रमपि क्षुण्णादिति*' श्लोके कालिदासेन (रघु० १.१७) स्पष्टमुक्तम्। तव दुःखाश्रुमोचनमनुचितं। कुतः। यतस्त्वं ताक्ष्र्यस्य महर्षेः कश्यपस्य पुत्रः। हे विहग खेचर पक्षिन्, हे द्विजेन्द्र पक्षिराज, तादृशानां ताक्ष्र्यसदृशानां ब्रह्मवर्चसिनामपत्यं न शोचति। महत्यपि दुःखे शोकं न दर्शयति। धैर्यं न जहाति। इति मे मम श्रुतं। '*कृत्यानां कर्त्तरि वे*'ति (पा० २.३.७१) सूत्रेण मे इत्यत्र षष्ठी, मया श्रुतमित्यर्थः।

अथोत्तरया गरुडः कर्मविपाकरूपं दुःखमिति मन्वानो मातरं प्रत्युत्तरं वक्तुमात्मनः प्राग्जन्मकृतगुरुभक्तित्यागलक्षणं पापं निदानत्वेनानुमिमीते –

आर्ति॑ वै ते विं॑नते नयन्त्-
यपनत॒ह्रिया त्व॒रु॒णस्य॑ मातः।
य आचा॒र्यान्युव॒तो[12] न चं॑क्रु-
रि॒त्थं वै तेऽश्रु॑मुखाः[13] पतन्ति॥४॥

---

[11] कस्याञ्चिद् अन्यस्यां मातृकायां पदच्छेदमकृत्वा द्विजे॒न्द्र॒ इत्यपि पाठो वर्तते इत्यस्मन्मातृकायाम् एतत्पृष्ठस्य प्रान्तभागेऽङ्कितम्।

[12] 'यान् आचारान् युवत्यः'?

[13] 'अश्रुमुक्ताः'?

॥ *पदपाठः* ॥

आर्तिं। वै। ते। वि० नते। नयन्ति। अपनत० ह्रिया। तु। अरुणस्य। मातरितिं। ये। आचार्यान्। युवतः। न। चक्रुः। इत्थं। वै। ते। अश्रु० मुखाः। पतन्ति॥

॥ *भाष्यम्* ॥

हे अरुणस्य मातः। साभिप्रायं। अहं त्वकिञ्चित्करः पुरुषार्थहीनो मातुर्दुःखापाकरणाशक्तो गणितुमनर्हः। अतः अरुणस्यैव सत्पुत्रस्य त्वं मातासि। ते पुमांसः आर्तिं व्यथां नयंति गृह्णंति। *नी* प्रापणे। व्यथामात्मानं प्रापयन्ति। कया कृत्वा अपनतह्रिया कृत्वा। अपनता गता चासौ ह्रीश्च अपनतह्रीः तया अपनतह्रिया। गतया लज्जया कृत्वा निर्लज्जतया। लज्जानाशेन। आचार्यं प्रति निर्लज्जत्वेन। दाक्षिण्याभावेन। आचार्यस्य दाक्षिण्यं यस्य शिष्यस्यान्तःकरणाद् गतं स व्यथामात्मनि आनयति। पीडां लभते। ते के? अस्मिन् जन्मनि आर्तिं नयन्ति स्वस्मिन्। ये शिष्याः आचार्यान् गुरून् भक्त्या शुश्रूषया सेवया प्रसन्नान् न चक्रुः गतजन्मनि। पूर्वजन्मनि गुरुभक्त्यकरणस्यायं कर्मविपाक इहजन्मनि यत् शत्रुकृतेन पराभवेन दासत्वादि दुःखोपभोगदर्शनं मात्रादीनाम्। किं च ते। गतजन्मनि गुरुभक्तिहीनाः। तेन पापेन अस्मिन् जन्मनि अश्रुमुखाः पतन्ति। पतनं प्राप्नुवन्ति। नीचत्वं लभन्ते दासत्वादिपराभवम्। इत्यनुमानं गरुडः करोति। किंलक्षणान् आचार्यान्। युवतः। मिश्रकान्। मिश्रीकुर्वतः। मिश्रयतः। यु मिश्रणे इति धातोः शिष्यहृदयेष्वात्मनः स्वरूपं मिश्रयतः मेलयतः। स्वस्य ज्ञानं तपो ब्रह्मवर्चसमित्यादीन् गुणान् शिष्यान्तःकरणेषु प्रवेशयतः प्रक्षिपतः। एवं मिश्रणं मिश्रीकरणं। किंच इत्थं वै तेऽश्रुमुखाः पतन्ति। इत्थमुपकारिणां गुरूणां भक्तिसु(शु)श्रूषाहीनाः जन्मान्तरे इत्थमनेन प्रकारेण अहमिव दासत्वादिप्रयुक्तं दुःखं प्राप्य तेन दुःखेन दुःखिताः अश्रुमुखाः रुदन्तो भवन्ति। रुदन्तीत्यर्थः। पतन्ति च। पतनं नीचैस्तरत्वं नीचभावं अधमदासत्वादिकं प्राप्नुवन्ति च। एतावता पूर्वजन्मनि गुरुभक्तिर्न कृता। तेन पापेन मातृद्वारा दासत्वं प्राप्तोऽस्मीत्यनुमानेन दास्यनिदानं गुर्वभक्तित्वं निरूपयति।

एवं गरुडेन विषादे प्रदर्शिते विनता स्वदुःखं पापकर्मविपाक इति वदन्ती पश्चात्तापेन स्वदुःखं वर्णयति, इतः परयर्च्चा –

अहं वंहामि परि तान्वंहामि
सर्पान्वहामि यथा दुष्कृतकारिणीं।

द्वीपान्त्समुद्रस्य वहामि दुष्कृत् (-)
कद्रून्त्सपुत्रामुदकं स्पृशन्तीम्॥५॥

॥ *पदपाठः* ॥

अहं। वहामि। परि। तान्। वहामि। सर्पान्। वहामि। यथा। दुःकृत०कारिणीं। द्वीपान्। समुद्रस्य। वहामि। दुःऽकृत्। कद्रूं। स० पुत्रां। उदकं। स्पृशन्तीम्॥ *अथवा स्पृशन्ती इति पाठः।*

॥ *भाष्यम्* ॥

गरुडं प्रति विनतोवाच। अहं वहामि। अत्र वहामीति क्रियापदस्य सामान्यतो निर्देशेन सर्वं वहामीत्यर्थसम्पत्तौ अहं दासीत्वाद्भारवाहिका जातास्मीत्युक्तम्।

अथ विशेषतो निर्देशार्थमाह। परितान्वाहमि। *'ते प्राग्धातोः'* (पा० १.४.८०) *'छन्दसि परेऽपी'ति* (पा० १.४.८१) सूत्रद्वयेऽनुवर्तमाने *'व्यवहिताश्चेति'* (१.४.८२) सूत्रेण परीत्युपसर्गस्य व्यवहितस्यापि धातुना साकं संयोगः। परिवहामीति। हे पुत्र। अहं वहामि भारवाहिका जातास्मि। बलीवर्द्दमहिषखरादिवत्। विशेषेण निर्दिशति। हे सुत। तान् प्रसिद्धान् नानाविधान् भारवतः पदार्थान् परि समन्तात् वहामि। निरन्तरं दूरदेशं नयामि। प्रापयामि इति परिशब्दार्थः। किंच सर्पान् नागान् तेषां इच्छया वहामि यथा तेषामिच्छा तथा वहामि। किंलक्षणा अहं? दुष्कृतकारिणी। पापकारिणी। अथोत्तरोऽर्द्धर्च्चः। अहं कद्रूं समुद्रस्य द्वीपान् प्रति वहामि। कीदृशीं कद्रूं? सपुत्रां। नागैः सहितां। पुनः कीदृशीं? उदकं समुद्रं स्पृशन्तीम्। यद्वा अहं समुद्रोदकं स्पृशन्ती। कीदृश्यहं? दुष्कृत्। दुष्टानि पापकर्माणि करोति इति दुःकृत्। गतजन्मनि। अन्यथा एवं कथं स्यात्। इति सप्तमो वर्गः॥

॥ अथ अष्टमो वर्गः ॥

अथ काद्रवेयाः सर्वे सम्भूय विनताया अबलाया वृद्धाया असामर्थ्यमालोक्य तत्सुतं युवानं बलिष्ठं जानन्तस्तमेवोद्वहनादीनि दासकर्माणि कारयितुं विनतां प्रत्याहुः परयर्चा –

यस्तें कुमारस्तरुंणः सुपर्णि
यस्य शाखाः पतंतः खे नुंदन्ति।
तं प्रेंषयस्व बलिनं स एंतु
सर्वांनस्मान्नंयतु यत्र सूर्यंः॥६॥

॥ *पदपाठः* ॥

यः। ते कुमारः। तरुणः। सु०पर्णि। यस्य। शाखाः। पततः। खे। नुदन्ति। तं। प्रेषयस्व। बलिनं। सः। एतु। सर्वान्। अस्मान्। नयतु। यत्र। सूर्यः॥

॥ *भाष्यम्* ॥

अत्र 'पक्षवायवः' इति नुदतेः क्रियायाः कर्तुरध्याहारः। पक्षवायवः कर्ता। सर्पा ऊचुः। हे विनते। त्वं जराजीर्णा दुर्बला वासि। अतः अस्माकं दासकर्मकरणार्थं तव स्थाने तं त्वत्पुत्रं प्रेषयस्व। व्यत्ययेनात्मनेपदं, '*सुप्तिङुपग्रहलिंगनराणां कालहलत्स्वरकर्तृयणां च। व्यत्ययमिच्छति शास्त्रकृदेषां, सोऽपि च सिद्ध्यति बाहुलकेन*॥' इत्यनेन। प्रेषय। बलिनं शक्तिमन्तं। तं कं ते तव यः कुमारः पुत्रोऽस्ति। कुमारो लघुः, तरुणो यौवनं प्राप्तः। न त्वरुणमित्याशयः। स त्वया प्रेरितो दासत्वकरणार्थमेतु आगच्छतु। आगत्य च अस्मान् तं गगनभागं प्रति नयतु। तं कं? यत्र गगनांशे गगनमार्गे वीथ्यां सूर्यः प्रचरति।

सर्पाणां वाक्याद्विनतया प्रेषितेन गरुडेन नागानां निकटे गत्वा दास्यमित उत्तरया स्वीकृतं, सेयमृक्॥

अहं सुपर्णः प्रहितो ऽरुणेन
सर्पाः करिष्यामि यदाह शुंगी।
आ रोहत क्लिश्यत मे शरीरं
वोळ्हाऽस्मि सर्वानचिरेण सूर्यम्॥७॥

॥ *पदपाठः* ॥

अहं। सु० पर्णः। प्र० हितः। अरुणेन। सर्पाः। करिष्यामि। यत्। आह। शुंगी। आ। रोहत। क्लिश्यत। मे। शरीरं। वोळ्हा। अस्मि। सर्वान्। अचिरेण। सूर्यम्॥

॥ *भाष्यम्* ॥

गरुडः सर्पान् प्रति वदति। हे सर्पाः। अहं सुपर्णो नाम। अरुणेन अग्रजेन प्रहितः प्रेषितोऽस्मि। यद्यप्यरुणः सूर्यरथेऽस्ति तथापि कदाचिद् गरुडो मातुर्दास्यस्य दुःखवार्त्तां कथयितुं तत्र गतः। अरुणाग्रे सर्वमुक्तवान्। ततोऽरुणेन 'त्वं तत्र गत्वा मातुर्दासत्वनिर्वाहं स्वयं कुरु' इत्यादिष्टः। सर्पाणामग्रे अरुणेन प्रहित इत्याह। हे सर्पाः। शुंगी नाम विनता। मम माता यत् प्रागाह 'दासी ते स्यामिह

सर्पमातरि 'त्यादि दासकर्म स्वीकारमाह। तदेतन्मात्रांगीकृतं दासकर्म समस्तमहं करिष्यामि। यूयमारोहत। मे शरीरं यूयं क्लिश्यत पीडयत यथेष्टम्। अहं तु अचिरेण वः सर्वान् सूर्यं यावत् वोढाऽस्मि। 'वह' प्रापण इति धातोरनद्यतने लुटि परस्मैपदमुत्तमपुरुषैकवचनं। वहनं करिष्यामीत्यर्थः। ततः सर्पान् पृष्ठे आरूढानूढ्वा सूर्यमण्डलसमीपं निनाय। तदा तेऽर्कसमीपं नीयमाना मयूखैर्दह्यमाना अधोनयनमिच्छन्तः पृथ्वीतलं गन्तुकामाः अपरमृग्द्वयमाहुर्गरुडं प्रति –

सर्पा ऊचुः –

तीक्ष्णाः सुपर्णा[१४] बहुधा मरीच्यः
सूर्यस्य ता नः प्र दहन्ति भोगान्।
नमः पतङ्गाय नि वर्त्त साधु
यत्र माताऽदितिस्तत्र गच्छ॥८॥

॥ *पदपाठः* ॥

तीक्ष्णाः। सु० पर्णाः। बहुधा। मरीच्यः। सूर्यस्य। ताः। नः। प्र। दहन्ति। भोगान्। नमः। पतंगाय। नि। वर्त्त। साधु। यत्र। माता। अदितिः। तत्र। गच्छ॥

॥ *भाष्यम्* ॥

हे गरुड। सूर्यस्य मरीच्यः। मरीचयः। मयूखाः तीक्ष्णाः दुःसहाः। यद्यपि मरीचिशब्दः पुंसि, तथाप्यत्र स्त्रीलिङ्गरूपेण गृहीतः। छान्दसत्वाल्लिङ्गव्यत्ययो न दुष्टः। ता इमाः मरीच्यः नः भोगान् शरीराणि बहुधा प्रदहन्ति। हे गरुड। पतंगाय। आदित्याय नमः। अथवा पतंगः पक्षी। पतंगाय तुभ्यं नमः, त्वं साधु यथा स्यात्तथा यत्नेन निवर्त्त। आत्मनेपदस्थाने व्यत्ययेन परस्मैपदं निवर्तस्वेत्यर्थः। यत्र अस्माकं माता कद्रूस्तिष्ठति भूतले। तत्र गच्छ। किंभूता माता अदितिः? पृथिवीनामैतत्। पृथिव्यवतारः।

---

[१४] सर्वास्वपि मातृकासु 'सुपर्णा[:]' इत्येव पाठो यस्तु पदपाठेनापि सम्पुष्य द्रढीक्रियते। तथाप्यनाविलः पाठः 'सुपर्ण' (संबुद्धौ) एव भवितुमर्हति। भाष्यकारोऽपि एतदेवांगीकरोति यतः स स्वकीया व्याख्या 'हे गरुड' इत्यनेन सुपर्णपर्यायवाचिना प्रारभते।

परा –

अलं॑ सूर्यस्य॒ सद॑नं गृ॒तेन॑
दु॒ग्धा न॑स्तन्वः॑ सवि॒तुः शि॒खाभिः॑।
वि॒हाय॑ वा त्वा॒ प्र प॑ताम भूमौ
नि वर्त्त॑ वा शकुने नो॒द्यमा॑नः॥९॥

॥ *पदपाठः* ॥

अल॑म्। सूर्य॑स्य। सद॑नम्। गृ॒तेन॑। दु॒ग्धाः॑। नः॒। त॒न्वः॑। स॒वि॒तुः॑। शि॒खाभिः॑। वि॒० हाय॑। वा॒। त्वा॒। प्र। प॒ता॒म॒। भूमौ॑। नि। वर्त्त॑। वा॒। श॒कु॒ने॒। नो॒द्यमा॑नः॥

॥ *भाष्यम्* ॥

सर्पा आहुः। हे गरुड। सूर्यस्य सदनं गृहं रथं प्रति गतेन गमनेन अलं, पूर्यतां। नः। तन्वः। देहलताः सवितुः शिखाभिः किरणाग्रैर्द्दग्धाः। हे शकुने विहंग। त्वं निवर्त्त वा न निवर्त्तस्व वा। चेत् त्वं नोद्यमानः न निवर्त्तसे। तर्हि। वयं त्वां विहाय भूमौ प्रपताम।

ततः तस्मिन्नवसरे कद्रूर्विनतापृष्ठमारुह्य तामर्कमण्डलं प्रति प्रैरयत्। सा च पृष्ठारूढां कद्रूं सूर्यसमीपं निनाय। तत्र सर्वेऽन्योन्यसमीपस्था बभूवुः। तत्र कद्रूर्दह्यमानानां नागानां क्रन्दितं श्रुत्वा विनतां प्रत्युत्तरयोवाच। कद्रूवाक्यम् –

इ॒दं न सा॒धु यदि॒दं सु॑प॒र्णि[१५]
सु॒तान् मम॒ैनानव॑हत्स॒धस्थे॑।
वि॒चेष्ट॑मानानु॒रगा॑नस॒क्ताञ्[१६]–
ज॒वेन॒ सूर्यं॑ प्रति॑ दह्यमा॑नान्॥१०॥

---

१५ 'यदयं सुपर्णः' यदि वा 'यदयं सुपर्णि' इति साधुतरः पाठः।

१६ 'असक्तान्' इत्यस्य स्थाने 'अशक्तान्' इत्येव पाठः साधीयान् प्रतिभाति किन्तु भाष्यकारोऽपि एतदेव स्वीकरोति।

॥ *पदपाठः* ॥

इ॒दं। न। सा॒धु। यत्। इ॒दं। सु॒०प॒र्णि॒। सु॒ता॒न्। मम॑। ए॒ना॒न्। अव॑हत्। स॒ध॰ स्थे॑। वि॰ चेष्ट॑मानान्। उ॒र॰गा॑न्। अ॒स॒क्ता॒न्। ज॒वे॑न। सूर्य॑। प्रति॑। द॒ह्यमा॑नान्॥

॥ *भाष्यम्* ॥

हे सुपर्णि इदं कर्म साधु न। धर्म्यं न। इदं किं यत् तव सुतोऽसौ गरुडः इदं मेघाडंबरमुल्लंघ्य मम एतान् सुतान् सधस्थे सूर्यस्य सहस्थाने रथमार्गसमीपे। सूर्यं प्रति जवेन अवहत् अनयत्। किंभूतान्? दह्यमानान्। अत एव विचेष्टमानान्। सन्तापाकुलतया विविधाः चेष्टाः कुर्वाणान्। कान् सुतान्? उरगान् नागान्। कथं भूतान्? असक्तान्। सक्तिरासक्तिः सूर्यदिदृक्षा। रविं द्रष्टुमौत्सुक्यं, तद्रहितान्। यद्वा सक्ताः गरुडपृष्ठे लग्नाः। श्लिष्टाः। न सक्ताः असक्ता अश्लिष्टाः। गरुडस्कंधात् वियुक्तान् पृथग्भूतान् 'भाविनि भूतवदुपचार' इति न्यायात् गरुडपृष्ठं विहातुमिच्छन्तो वियुक्ता एवेत्युक्तं। यद्वा सन्तापव्याकुलत्वादुद्वेगातिशयादेकत्रावस्थातुमशक्नुवन्तः पार्श्वपरिवर्तनादिकं भूयोभूयः कुर्वन्तोऽन्योऽन्यसंश्लिष्टा इत्याकूतम्॥ इत्यष्टमो वर्गः॥

॥ अथ पञ्चमं सूक्तम् ॥

॥ अथ नवमो वर्गः ॥

तत्रैवार्कविमाननिकटस्था कद्रूररुणं प्रति गरुडस्यौद्धत्यदोषं स्पष्टं वदति परया।

कद्रूरुवाच -

एते सूर्यस्य तपसाऽभितप्ताः
क्षितौ वर्तन्तेऽरुण भोगवन्तः।
अहं न विन्दामि हतिं सुतानां
न चेऽह ताक्ष्र्यः स हि शर्म विद्यात्॥१॥

॥ *पदपाठः* ॥

एते। सूर्यस्य। तपसा। अभि० तप्ताः। क्षितौ। वर्तन्ते। अरुण। भोग० वन्तः। अहं। न। विन्दामि। हतिं[१७]। सुतानां। न। च। इह। ताक्ष्र्यः। सः। हि। शर्म। विद्यात्॥

॥ *भाष्यम्* ॥

हे अरुण। एते भोगवन्तो भोगिनः सर्पाः। सूर्यस्य तपसा तापेन अभितप्ताः। अभिमुखं तप्ताः सन्तापं प्राप्ताः सन्तः क्षितौ क्षये नाशे वर्तन्ते। नाशं प्राप्स्यन्ति। अथवा भूम्यां पतिष्यन्ति। अहं तेजसा अन्धीकृतानां सर्पाणां हतिं हननं तापेन क्रियमाणं मारणं गरुडकृतं न विन्दामि न लभेयं। '*विदॢ*' लाभे। सुतान् म्रियमाणान् ज्ञात्वापि न म्रियेयं। हननं हतिः। 'स्त्रियां क्तिन्' (पा० ३.३.९४)। यद्वा हतमित्येव भावान्तं, हतं मारितं। किञ्च। इहास्मिन् विश्वासघाते नेक्षते स ताक्ष्र्यो गरुडः। स प्रसिद्धः, शर्म सुखं सांसारिकमैहिकमामुष्मिकं वा कदाचित्र विद्यात् न लप्स्यते।

---

[१७] 'हतम्' इत्यप्यन्यत्र पाठः इत्यस्माकं पाण्डुलिपिपत्रस्य प्रान्तभागेऽङ्कितम्। किन्तु वस्तुतः अत्र 'गतिम्' इति पदं साधु स्यात्।

अथ पृष्ठारूढार्कमण्डलसन्निधिं नि(नी)यमानोत्तरयर्च्चा कद्रूर्विनतामब्रवीत् –

एतत्ते कर्म परुषं सुपर्णि
यत् सौरसेयानवहो बलात्त्वम्।
आर्ता कद्रूर्वंदति दुग्धपुत्रा
नीचैर्वर्तेथाः प्रभवत्सु नित्यम्॥२॥

॥ *पदपाठः* ॥

एतत्। ते। कर्म। परुषं। सु० पर्णि। यत्। सौरसेयान्। अवहः।
बलात्। त्वं। आर्ता। कद्रूः। वदति। दुग्ध० पुत्रा। नीचैः।
वर्तेथाः। प्रभवत्०सु। नित्यम्॥

॥ *भाष्यम्* ॥

हे सुपर्णि, एतत् तव कर्म त्वया क्रियमाणं आचरणं परुषं निष्ठुरं कठोरं निर्दयं महादुष्टं। एतत् किं? यत् त्वं सौरसेयान् भूमेः पुत्रान् सर्पान् ऊर्ध्वनयनमनिच्छतो बलात् बलेन रविसमीपं ज्वालामालाव्याप्तं अवहः अनयः प्रापयसि। सुतेन क्रियमाणोऽपराधो मातर्यारोप्यते। उपचारात्। वस्तुतस्त्वयैवादिष्टो गरुड एतान् बलादर्कसन्निधिं नयति, अतितरां तापेन दह्यमानान्। रसा पृथ्वी। सु उपसर्गः। सुष्ठुरसा सुरसा भूमिरेव। यथा मेरुः सुमेरुः। सुरसायाः अपत्यानि सौरसेयाः नागाः तान् सौरसेयान्। 'भूमिस्तु नाग्यभवत् कद्रूनाम्नी 'ति (०नामा, १.६) प्राग्गतं। भूः स्वयमहमेव कद्रूः तस्याः मे सुताः सौरसेयाः। तान्। आर्ता दुःखातुरा पुत्राणां सन्तापं ज्ञात्वा स्वयं सन्तप्ता कद्रूर्विनतां प्रति वदति–दग्धेत्यादि, निवर्तमानं पर्यालोच्य। किं वदति? हे विनते त्वं दास्यसि। नागाश्च प्रभवन्तः। प्रभवन्ति प्रभवो भवन्ति इति प्रभवन्तः स्वामिनः। तेषु प्रभवत्सु स्वामिषु। तेषां प्रभवतां प्रभूणां नागानामाज्ञां किं लुम्पसि वार्यमाणाप्येतानूर्ध्वं कथं नयसि। अयं तु दास्याः धर्मो न भवति यदप्रियाचरणं प्रभूणां। तर्हि मया किं विधेयमित्याशङ्क्याह। त्वं नितं(त्यं) नियमेन। नित्यं सर्वदा ममसुतानामग्रे नीचैर्यथास्यात्तथा वर्तेथाः। नीचवृत्या तिष्ठ। नीचवृत्तिमाचर। प्रभुषु विषये दासानां नीचत्वेन अधमत्वेन तच्चित्तानुवृत्त्या वर्त्तनस्योचितत्वात्। सेवका ह्यादेशकारिणो भवन्ति। यद्वा नीचैरतिनीचप्रदेशगामित्वेन वर्तेथाः वर्त्तस्व। नीचनीचतरप्रदेशगामिनी भव। भूतलं गच्छेत्यर्थः। सुपर्णकृतस्यापराधस्य तन्मातर्यारोपः क्रियते। 'त्वमेवं एवं कुरुष्वे 'त्यादेशोऽपि मातृद्वारा तत्पुत्रस्यैव दीयते। त्वं स्वतना(तनया)नेवं शिक्षय। इत्थं कारयेत्याकूतेन।

अथोत्तराभ्यामृग्भ्यां कद्रूः पर्जन्यं वर्षणाय प्रार्थयते वृष्टिकामा। कद्रूरुवाच मेघं समीपस्थमभ्ररूपं प्रति –

अभि क्रन्द स्तनयोदयौदधीन्त्
समास्तै(ताः)[१८] पर्जन्य गिरिभिः सन्त्वापः।
आ हन्तु शेषः शिखरं गिरीणां
गच्छन्तु सर्पाः सलिलस्य मध्यम्॥३॥

॥ *पदपाठः* ॥

अभि। क्रन्द। स्तनय। उत्० अय। उद० धीन्। समाः। ते।
पर्जन्य। गिरि०भिः। सन्तु। आपः। आ। हन्तु। शेषः। शिखरं।
गिरीणां। गच्छन्तु। सर्पाः। सलिलस्य। मध्यम्॥

॥ *भाष्यम्* ॥

हे पर्जन्य। मेघ। त्वं अभि अभितः आभिमुख्येन क्रन्द क्रन्दनं परुषशब्दोच्चारणं कुरु। अपि च। स्तनय गर्ज। उदधीन्। चतुःसंख्याकान् सागरान् अभि इति समुद्रचतुष्टयाभिमुखं क्रन्दनं दुःसहशब्दमोक्षणं। स्तनयेति गर्ज। गर्जनं च गभीरश्रवणसुखशब्दमोचनं च कुरु। महतीं वृष्टिं कर्तुमिदं पूर्वचिह्नं कुरु। अभिवर्ष। वृष्टिं मुञ्च। तया वृष्ट्या ताः आपो गिरिभिः पर्वतैः समाः उच्चैस्तराः सन्तु। यथा गिरयोऽप्यप्सु निमज्जन्ति तथातिवृष्टिं कुर्वित्यर्थः। तव शेषः त्वदीयजलराशेः शेषः उर्वरित (?) एकोंऽशः गिरीणां शिखरं शिखराणि। आहन्तु आस्फालयतु। तत्समः प्रांशुर्भूत्वोर्मिभिस्ताडयतु। त्वया एवं कृते सति मत्सुताः निषिद्धयमानेनापि सुपर्णेनोर्ध्वं नीताः रवितापेन दग्धाः, प्रार्थ्यमानेऽपि वैनतेये क्रूरे अप्रत्यावर्त्तमाने तस्य पृष्ठात् अवरुह्य देहानधः पातयन्तः सर्पाः सलिलस्य गिरिसमस्य वृष्टिजलस्य मध्यं गच्छन्तु। एवं मध्येजलं निपततां देहभेदो न भवति, परितापश्च शाम्यति। सैव पुनरुत्तरयर्च्चा वृष्टेर्बाहुल्यं याचते –

एकोदकं पारमपारमस्तु
मण्डूकिका वदतु सर्वरात्रम्।

---

[१८] समास्ताः (समाः ताः) इति भाष्ये पाठः। ग्रूबेमहाशयधृतपाठस्तु 'समास्तास्ते' अस्ति (त्रयोदशाक्षरमयः पादः)।

उप॑ दु॒ग्धप॑दीं॒ गां दु॑हन्तु
मृ॒ळ[१९] ए॑तु॒ स्थल॑मि॒च्छमा॑नः॥४॥

॥ *पदपाठः* ॥

ए॒क॰ उ॒द॒कं। पा॒रं। अ॒पा॒रं अ॒स्तु॒। म॒ण्डू॒किका॑। व॒द॒तु॒। स॒र्व॰ रा॒त्रं। उप॑। दु॒ग्ध॰प॑दीं। गां। दु॒ह॒न्तु॒। मृ॒ळः। ए॒तु॒। स्थल॑ं। इ॒च्छमा॑नः॥

॥ *भाष्यम्* ॥

कद्भूराह। इदं भूतलं एकोदकमस्तु। हे पर्जन्य त्वत्प्रभावात्। एकं उदकमेव यस्मिन् तत् एकोदकं। यज्जलमधुना पारं गाधमस्ति नद्यादौ, तदप्यपारमगाधमस्तु। यस्योदकस्य पारस्तलभूमिस्पर्शो लभ्यते तज्जलमपि पारमित्युच्यते। मण्डूकिका मण्डूकी दर्दुरी मण्डूकस्त्री। इदं जात्यभिप्रायमेकवचनम्। समस्ताः मण्डूक्यः। यद्वा मण्डूकिका मण्डूकजातिः मण्डूकश्रेणिः सर्वरात्रं वदतु क्रन्दतु शब्दायतां। किं च। गां पृथ्वीं त्वज्जलराशयः दुहन्तु प्रपूरयन्तु। दुह प्रपूरणे। किं कृत्वा? उपेत्य। उपसर्गबलाद्धातोरध्याहारः। यद्वा त्वयि वृष्टे, नागेषु जलराशौ पतितेषु, जलराशौ च कालेन वेगबलेनोदधौ लीने, भूतले प्रकटीभूते, नागव्रतिनो नागोपासका जनाः जलार्द्रायामुर्व्यां हरिततृणैर्व्याप्तायां नानासस्योत्पत्तौ च गवामाहारेण सौहित्ये जाते बहुक्षीराः [याः] गाः, ते नागोपासकाः नागान् पयः पाययितुं [ताः] गाः दुहन्तु। मत्सुतान् उपेत्य तत् क्षीरं निवेदयन्तु जनाः। यतो मत्सुतास्तापसन्तप्तास्तृष्णार्ताः क्षुत्पीडिताः। अतः क्षीरं भक्ताः पाययन्तु। मृडयति सुखयति पयोदानादिना इति मृडः नागव्रती मनुष्यजनः, प्राग्जलभयेन गिरिशिखराण्यारूढः ततोऽवरुह्य गतजलं स्थलं महीतलमेतु। इच्छमानः भूमेर्निर्जलत्वमिच्छन्। पदव्यत्ययः। यद्वा मृडयति सुखयति मां इति मृडः सर्पसमूहः गगनात्स्थलमेतु। तापशान्तिमिच्छन्।

इदानीं प्राग्बुद्धमपि विषादातिशयान्मातुर्दास्यनिदानमंहः पृच्छति वैनतेयः।
वैनतेय आह जननीं प्रति –

स्व॒र्गान्लो॒कांश्च॒क्षु॒षान्वै॒मि मा॒त॒र॒हमो॒जसा॒ त॒र॒सा॒ ब॒लेन॑।
अथ॑ क॒थं दा॒सौऽस्मि जा॒तः,
किं स्वि॑त् पा॒पं च॒कर्थ॑?
अथो॑ पि॒ता मे॒ दुश्च॑रितं च॒चार॑?॥५॥

---

[१९] अत्र 'मृग' इति मूलपाठोऽनुमातुं शक्यते।

पञ्चमं सूक्तम्

॥ *पदपाठः* ॥

स्वःऽगान्। लोकान्। चक्षुषा। अनु। एमि। मातः। अहं। ओजसा। तरसा। बलेन। अथ। कथं। दासः। अस्मि। जातः। किं। स्वित्। पापं। चकर्थ। अथो इति। पिता। मे। दुःऽचरितं। चचार।

॥ *भाष्यम्* ॥

हे मातः अहं चक्षुषा स्वर्गान् लोकानत्र स्थितान् (स्थितः) एमि पश्यामि। ईदृक् मे दृग्बलं। अनु च। ओजसा धैर्येण हार्दसामर्थ्येन तानेमि। शारीरेण बलेन च। तरसा वेगेन। ईदृक्शक्त्युपेतोऽपि दासः केन कर्मणा पापेन मातृकेण पैतृकेण वा जातोऽस्मि, तद्वद, चेद्वेत्सि। मातस्त्वं किं पापं चकर्थ कृतवत्यसि, अथवा मे पिता किं दुश्चरितं चचार आचीर्णवान्? ॥ इति समाप्तो नवमो वर्गः ॥

॥ अथ दशमो वर्गः ॥

एवं पृष्टे इहैव जन्मनि यन्मयापराद्धं तदेव तवापि दास्यकारणमिति मातोत्तरयावदत्। विनतोवाच सुतं प्रति –

अहं तया स्पर्द्धमाना कद्रूवाऽऽशंस उपाददे।
अजानती भयं क्रोधात् सा माऽजयत्सम्पराये॥६॥

॥ *पदपाठः* ॥

अहं। तया। स्पर्द्धमाना। कद्रूवा। आ। शंसे।[२०] उप। आ। ददे। अजानती। भयं। क्रोधात्। सा। मा। अजयत्। सं पराये॥

॥ *भाष्यम्* ॥

अहं तया ज्ञातस्वभावया कद्रूवा स्पर्द्धमाना स्पर्द्धामसूयां कुर्वती सती जयं आशंसे। पणे जयाशां अकार्षम्। आशंसां कृतवत्यस्मि। उपाददे च। दासत्वरूपं पणं पणस्य अंगीकारमकार्षं च। 'दासी ते स्यामिह सर्पमातरि'त्यादिना। कस्मात्

---

[२०] 'आशंसे उपाददे' इत्येवंप्रकारकः पदच्छेदश्चिन्त्यः। 'आशंस उपाददे' इति मूलपाठः समीचीनश्चेत्तदा एकमात्रमत्रैव प्रयुक्तः (*hapax legomenon*) पयस्-तमसादिवत् क्लीबलिंगः 'आशंसस्(:)' शब्दः 'ग्लहः', 'पणः', 'आह्वानं' वा (bet, wager, challenge) इत्यस्य वाची प्रतिभाति। 'आशंस (कर्म) उपाददे'=पणं स्वीकृतवती। भाष्यकारोऽपि 'आशंसे(सः)' संज्ञारूपेण व्याख्याति (आशाम्, आशंसाम्)।

क्रोधाद्धेतोः। किं कुर्वती। भयमजानती। दासत्वे यद्दुःखं तस्य दुःखस्य भयमजानती दास्यदुःखमजानती अनुभवाभावात्। ततः संपराये संग्रामे विवादे सा कद्रूः मा मां अजयत्। मया सूर्याश्वः श्वेतोऽस्तीत्यंगीकृतं कद्रूवा तु कृष्ण इति। तत्त्वतो निःकर्षे कृतेऽश्वः कृष्ण इति सिद्धान्तितं। दैवबलात् केनापि कपटेन तेनाहं पराजयं प्राप्य दासी जाता। अयमर्थः प्रागेव 'एष बालो लंबते' (४.१) इत्यत्र स्पष्टीकृतः।

अथोत्तरया सुपर्णः जननीं दासत्वान्मोचयितुमुपायं विचारयन्नाह। वैनतेय उवाच मातरं प्रति –

कथं दास्यान्मोचयितुं विषह्या
मयां दासेन यदिं वा पृथिव्या[21]।
आ चक्ष्व शुंगे दृळ्हमंस्म्यार्त्तो-
ऽन्नेंन[22] वाप्युत वा धनेंन॥७॥

॥ *पदपाठः*॥

कथं। दास्यात्। मोचयितुं। वि० सह्या। मया। दासेन। यदि। वा। पृथिव्या (*पृथिव्याः*) आ। चक्ष्व। शुंगे। दृल्हं। अस्मि। आर्तः। अन्नेंन। वा। अपि। उत। वा। धनेंन॥

॥ *भाष्यम्* ॥

'*अन्येन वे*ति पाठान्तरम्। हे शुंगे मया दासेन मातृद्वारा दासत्वं प्राप्तेन त्वं दास्यात् मोचयितुं कथं केनोपायेन विसह्यासि। सोढव्याऽसि। शक्या भवसि। केनोपायेन त्वं मोचयितुं शक्यासि तमुपायमाचक्ष्व। वद। पृथिव्या आसमुद्रान्तया किं शक्यासि मोचयितुं? यदि सकलक्षितिमण्डलेनार्पितेन कद्रूस्त्वां दास्यान्मुञ्चति, तर्हि अहं तद्ददामि इति भावः। अपीति प्रश्ने। अपि स्वित् धनेन लंकास्थली स्यमंतकमणिमेर्वद्रिप्रमुखेण चेत् मोचयितुं विसह्या शक्या भवसि तर्हि तद्वद। अहं तद्ददामि। उत अथवा अन्येन केनाप्यतिदुर्लभेन पदार्थेन यदि मोचयितुं शक्यासि तमपि पदार्थं दातुं क्षमोऽस्मि। 'अन्नेन वा' इति पाठे अन्नं सोमलक्षणं पेयं प्राणरक्षणसाधनं अमृतमित्यर्थः। तेन चेत् त्वं दास्यात् मोचयितुं शक्यासि तर्हि तदप्यहर्तुंमहमुत्सहे। कथंभूतमुपायं वद। दृढं कार्यक्षमं। 'पृथिव्या' इति षष्ठ्यन्तत्वे

---

[21] 'पृथिव्याः' इति वैकल्प्येन भाष्यकारधृतपाठान्तरम्।

[22] 'अन्येन' 'अन्नेन' चेति पाठद्वयं परम्पराप्राप्तम्।

अयमर्थः। पृथिवीनाम कद्रूः। तस्याः सम्बन्धिनः दास्यात्। हे शुंगे, दृढं अत्यन्तमार्तो दुःखि(तो)स्मि। यद्वा दृढं यथास्यात्तथार्तोऽस्मि। अतीवेत्यर्थः। गरुडो मातुर्दासत्वनिष्कृतये यत् परमदुर्लभं सर्पैः समातृकैर्याच्यते तदहं दास्यामि। हे विनते गत्वा तान् पृच्छेत्याहोत्तरया। गरुड उवाच मातरं प्रति –

गच्छाऽनुयुक्ष्व[२३] सर्पान् यदि मोक्षोऽस्ति केनचित्।
मया वा यदि वाऽरुणेन पशुभिर्धनेन वा॥८॥

॥ *पदपाठः* ॥

गच्छ। अनु० युक्ष्व। सर्पान्। यदि। मोक्षः। अस्ति। केन। चित्। मया। वा। यदि। वा। अरुणेन। पशु०भिः। धनेन। वा॥

॥ *भाष्यम्* ॥

हे मातः। त्वं सर्पान् कद्रूसहितान् प्रति गच्छ। तान् अनुयुङ्क्ष्व। पृच्छ। अनुपूर्वको *यु[जि]योगे* इत्ययं धातुः प्रश्ने वर्तते। मद्वचनेन पृच्छ। किं पृच्छामि इत्याशङ्क्य आह। एवं पृच्छ। 'हे सर्पाः मात्रा साकं विमृशत। यदि केनापि परमदुर्लभेनापि पदार्थेन मम मातुः दास्यात् मोक्षः अस्ति भवति तर्हि तमुपायं वदत, केन केन पदार्थेन। 'मया वा' अहं गरुड एव भवतां दासो भवामि। एवं मया कृत्वा चेत् दासत्वात् मोक्षः स्यात्तर्हि वदत। यदि वा अरुणेन दासेन मातुर्मोक्षोऽस्ति तर्हि वदत। अरुणः पंगुरपि यथाशक्ति करिष्यति। पशुभिर्गवादिभिः। यदि नन्दाद्याः कामधेनव उच्चैःश्रवःप्रमुखा दिव्याश्वाः ऐरावणादयो दिग्गजा वा अपेक्ष्यन्ते तर्हि तदर्पणेऽपि समर्थोऽस्मि। धनेन कुबेरादिकोशस्थेन तव निद्धयादिना मोक्षो भवति [चेत्, तदप्यानेष्यामि। एतेषां] मध्ये यत्रापेक्षा भवति तद्वस्तु ब्रूत। तदर्पयित्वा दास्यनिःकृतिं करिष्यामि'।

अथ पुत्रेण प्रेरिता विनता सर्पान् प्रति गत्वैवमुवाचोत्तरया –

न पुत्रान् वेद न पतिं तथाऽहं
युष्मान् वहन्त्यबलां कृशास्मि।

---

[२३] 'अनुयुक्ष्व' इत्यस्य स्थाने "अनुयुङ्क्ष्व" इति लौकिकव्याकरणदृष्ट्या साधुतरः, किन्तु पदपाठोऽपि "अनुयुक्ष्व" इत्येव स्वीकरोति। भाष्यकारस्तु उभयत्र "अनुयुङ्क्ष्व" इत्येवांगीकुरुते।

क्षीणो धातु[२४]र्न ज़वो ममाऽस्ति
कथं दास्यात्परिं मुच्येय वृद्धा॥९॥

॥ *पदपाठः* ॥

न। पुत्रान्। वेदं। न। पतिं। तथा। अहं। युष्मान्। वहन्ती।
अबला। कृशा। अस्मि। क्षीणः। धातुः। न। जवः। मम।
अस्ति। कथं। दास्यात्। परिं। मुच्येय। वृद्धा॥

॥ *भाष्यम्* ॥

उत्तरार्धचारम्भे पाठान्तरम्। '*यकृत् क्षीणो न जवो ममास्ति*'[२५]। विनतोवाच। हे सर्पाः अहं युष्मान् वहन्ती सती [न] पुत्रान् वेद। मम पुत्राः कति सन्ति, क्व वा तिष्ठन्ति, किं वा विदधति इत्येतन्न वेद। न जाने। ननु द्वावेव पुत्रौ विद्येते, पुत्रानिति बहुवचनं किम्? आकुलत्वादित्याशयः। पतिं प्राणेश्वरं वा न वेद्मि। युष्माद् वहन्ती सती कृशा क्षीणावयवा निर्मांसा जातास्मि। किंच। मम धातुः शारीरो '*रसरक्तपिशितमेदःस्नाय्वस्थिमज्जाशुक्राख्यो*' धातुगणः क्षीणः क्षयं प्राप्तः। धातुरित्युकारान्तपुंलिंगस्य प्रथमैकवचनं जात्यभिप्रायम्। अथ पाठान्तरं। *यकृत् क्षीणः* इति। यकृत् हृदयान्तर्गतं कालिजम्[२६]। तत् क्षीणं। अत एव मम जवो वेगो नास्ति। हे सर्पाः। अहं दास्यात् दासी भावात् कथं केन प्रतिकोशेन निष्क्रयपदार्थेन प्रतिमुच्येय। मुक्ता भवेयं। कीदृश्यहं? वृद्धा। इति दशमो वर्गः ॥

---

[२४] धातवः सप्त '*त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः।*' अत्र सर्वेषां समाहारतया एकवचनेनैव कथनम्।

[२५] भाष्यकारेणोल्लिखितं 'यकृत् क्षीणो . . .' इति पाठान्तरं चिन्त्यं विशेषणविशेष्ययोर्भिन्नलिङ्गत्वात्। वार्धक्ये न केवलं यकृतः क्षीणता अपितु सर्वेषामपि शरीरस्थानां अस्थिमज्जावसामांसरक्तादिसप्तधातूनामिति 'क्षीणो धातु'रित्येव पाठः साधीयान्।

[२६] 'कालिजम्' इति शब्दस्तु नैव संस्कृतम्। वैदेशिकोऽयं शब्दः पारसीकभाषाया आगतः हिन्दीभाषायां 'कलेजा' इति रूपेण परिणतः यकृद् द्योतयति। अनेकासु पाश्चात्यविचारसरणिषु चैतन्यस्य जीवस्य वा स्थितिः यकृति संभाव्यते। 'कालिजम्' इति शब्दस्य प्रयोगः भाष्यकारस्य स्थितिं मोहम्मदीयानामागमनादनन्तरं मध्यकाले (१३-१६ शताब्द्योर्मध्ये) संसूचयति।

॥ अथ षष्ठं सूक्तम् ॥

॥ अथ एकादशो वर्गः ॥

अथ नागाः परयर्चा स्वेष्टं याचमानां विनतां प्रत्युत्तरमाहुः। नागा ऊचुर्विनतां प्रति –

इन्द्रस्य सोमो निहितो गुहायां
तृतीये पृष्ठे रजसो विमाने।
तमाहृत्य तरसा शंतमेन
तेनात्मानं निष्क्रीय शं चर त्वम्॥१॥

॥ *पदपाठः* ॥

इन्द्रस्य। सोमः। नि०हितः। गुहायां। तृतीये। पृष्ठे। रजसः। वि०माने। तं। आ। हृत्य। तरसा। शं० तमेन। तेन। आत्मानं। निःऽक्रीय। शं। चर। त्वम्॥

॥ *भाष्यम्* ॥

इदं नागानां वाक्यं विनतां प्रति। हे विनते। त्वं इतो गरुडं प्रति गत्वा एवं अस्मद्वाक्यं तं प्रति कथय। कथं। तृतीयेपृष्ठे स्थाने स्वर्लोके गुहायां निगूढतमे क्वचित्प्रदेशे इन्द्रस्य सोमः निहितः स्थापितः संगोपितः। अमृतं निहितं। सोम इत्यमृतपर्यायः। संगोपितं किंलक्षणे? तृतीये पृष्ठे स्वर्लोकाख्ये। प्रथमं पृष्ठं भूतलं। द्वितीयं पृष्ठं भुवर्लोकः। तृतीयं स्वराख्यः। रजसः रजोगुणात् विमाने विगतमाने। विगताभिमाने। तत्रत्यानां हि राजसत्वाभिमानो विशेषेण गतः नष्टः। वयं राजसाः इत्यभिमानो गलितः, यतः असौ लोकः सत्त्वगुणनिधिः। हे गरुड, त्वं तं इन्द्रेण महाप्रयत्नतो गोप्यस्थाने संगोपितं हिरण्यकलशस्थं द्रवरसात्मकं सोममाहृत्य। तत आनीय। तमस्मभ्यं दत्त्वा तेन सोमेन आत्मानं समातृकं निष्क्रीय दासत्वन्निःकृतिं प्रापय। ततः शं सुखं यथास्यात्तथा त्वं विचर गच्छ। यथेष्टं विचर। दासभावात्समातृको मुक्तः सन्। आत्मानं निष्क्रीय आत्मनो निष्क्रयं

दत्त्वेत्यर्थः। इत्थं सर्पाणां वाक्यं श्रुत्वा विनता गरुडाग्र आगत्योत्तरयोवाच। विनतोवाच गरुडं प्रति –

सोमं॑ स॒र्पाः पिं॑पासन्त्य॒स्माभिं॑र्द्दिव आ ह॑तम्।
दु॒रा॒हरौ॑ दि॒वश्चेन्दु॑र्गरुत्मं॒त्स च॑ नि॒ष्क्रयः॑॥२॥

॥ *पदपाठः* ॥

सोमं॑। स॒र्पाः॑। पि॒पा॒स॒न्ति॒। अ॒स्माभिः॑। दि॒वः॑। आ०ह॑तं। दुः॑ऽआहरः॑। दि॒वः॑। च॒। इन्दुः॑। ग॒रु॒त्म॒न्। सः॑। च॒। निः॑ऽक्रयः॑॥

॥ *भाष्यम्* ॥

हे गरुत्मन्। सर्पाः सोमं अमृतं पिपासन्ति। पातुं इच्छन्ति। अमृतपानमिच्छन्ति। कीदृशं सोमं? अस्माभिः इति। मया त्वया वा दिवः द्युलोकादाहृतमानीतं संतं। च शब्दः पक्षव्यावृत्तौ। सोमश्च दिवः सकाशादुराहरः। दुःखेन आह्रियते इति दुराहरः। आहर्तुमशक्यः। निष्क्रयः दास्याद्विमुक्त्यर्थं निःक्रयः स च। अयं चकारोऽवधारणे। निःक्रयः। स एव। सोम एव।

इत उत्तरया गरुडोऽमृतमाहर्तुमङ्गीकुरुते। गरुड उवाच विनतां प्रति –

आ तें शृणोमि विनते सुपर्णि॒
यदिं॑ ब्राह्म॒णं न ज॑घन्थ मातः।
पतिं॑ष्यामि॒ तव॒ कामा॑य दू॒राद्
दि॒वस्पृ॒ष्ठात्सोमं॑मा॒हर्त्त॑वा उ॑॥३॥

॥ *पदपाठः* ॥

आ। ते॒। शृ॒णो॒मि॒। वि॒०न॒ते॒। सु॒०प॒र्णि॒। यदि॑। ब्रा॒ह्म॒णं। न। ज॒घ॒न्थ॒। मा॒तरि॑ति॑। पतिं॑ष्यामि। तव॑। कामा॑य। दू॒रात्। दि॒वः॑। पृ॒ष्ठात्। सोमं॑। आ० हर्त्त॑वै। ऊँ इति॑॥

॥ *भाष्यम्* ॥

हे विनते। हे सुपर्णि। ते तव वाक्यं। तवादेशं। अमृताहरणोपक्रममाशृणोमि। अंगीकुर्वे। आश्रवणमङ्गीकारः। तर्हि तव कामाय। अभिलाषाय। अभिलाषं पूरयितुं सर्पेभ्योऽमृतार्पणेन दासत्वनिष्कृतये दिवः ऊर्ध्वलोकस्य पृष्ठात्। उपरितनकटाहात् नाकलोकस्थलात्। सोममाहर्तवै इत्याहर्तुं। *'तुमर्थे सेसेनसे असन्०'* (पा० ३.४.९)। इतः ऊर्ध्वं पतिष्यामि उत्पतिष्यामि। उड्डीय गमिष्यामि। दूरात्

उत्पतिष्यामि। तर्हि कथं। हे मातः। त्वं यदि जन्मनः आरभ्य इदं दिनं यावत् कदाचित् कमपि ब्राह्मणं न जघन्थ अहनः। न हतवत्यसि। तर्हि अमृतार्थमुत्पतिष्यामि। ब्रह्महत्याग्रहणमितरेषां चतुर्णां महापातकानामुपलक्षणार्थं। यथा स्मृतौ – *जन्मप्रभृति पापानि बहूनि विविधान्यपि। कृत्वावाग्ब्रह्महत्यायाः षडब्दं कृच्छ्रमाचरेत्*। इत्यत्र। ननु किमर्थमिदमुक्तं यदि ब्राह्मणं न जघन्थेति। अधर्मकृतैरुपसर्गैर्मनोरथाः न सिद्ध्यन्ति। तर्हि मातुः कल्मषे सति तवोपक्रान्तकार्यस्य कुतो विनाशः? मैवं। *'यदि नात्मनि, पुत्रेषु, न चेत् पुत्रेषु, नप्तृषु। न त्वेवं तु कृतोधर्मः कर्तुर्भवति निःफलः'* इति मनुस्मरणात् (४.१७३)। अत्र अकारस्य विश्लेष-प्रश्लेषाभ्यां पदविभागेन योजना। कृतः अधर्मः। कृतः धर्मः। इति।

विनतोवाच सुतं प्रति –

न ब्रा॑ह्मणं जघ॒नाऽहं ग॑रुत्मन्
न स॑त्रघ्नाप्यभवद् द्वि॒तीया॑।
नाऽने॑नसमेन॒सा प्रोऽऽर्णु॑वीमि
नाऽऽगः॑स्पृ॒शो अप॑हरा॒म्येनः॑॥४॥

॥ *पदपाठः* ॥

न। ब्रा॒ह्म॒णं। ज॒घ॒न॒। अ॒हं। ग॒रु॒त्म॒न्। न। स॒त्र॒०घ्ना। अपि॑। अ॒भ॒व॒त्। द्वि॒तीया॑। न। अ॒ने॒न॒सं। ए॒न॒सा। प्र०॒ ऊ॒र्णु॒वी॒मि॒। न। आगः॑[स्]० स्पृ॒शः॒। अप॑० हरा॒मि॒। एनः॑॥

॥ *भाष्यम्* ॥

हे गरुत्मन्। अहं ब्राह्मणं न जघन। अहनं। न हतवती। द्वितीया शब्देन सखी उच्यते। मम काचित्सख्यपि सत्रघ्ना न अभवत्। सत्रं यज्ञं हन्तीति सत्रघ्ना। सत्रशब्दोऽत्र यज्ञपर्यायो लक्षणया धर्ममेव वदति। सत्रघ्ना। धर्मघ्ना। धर्मनाशकरी। मम या सखी सापि धर्मं न नाशयति। तर्हि अहं स्वयं किमुत। अथवा प्रकारान्तरेण योजना। द्वितीया मम सपत्नी। कद्रूः सत्रघ्ना न अभवत्। सत्रं अवारितान्नं। इन्द्रलोकादाहरिष्यमाणममृतं। आनेष्यमाणं। तद्धन्तीति सत्रघ्ना। तादृशी नाभवत्। अयमभिप्रायः। अमृतस्य हन्त्री न अभूत्। किं तर्हि? आनयने हेतुरभूत्। यतः पूर्वं विषादपराजये दास्यपणं कृतवती। तन्निष्कृतौ अमृतमङ्गीकरोति। ततश्च अमृताहरणे हेतुभूता कद्रूरेव। एवं न सत्रघ्नाऽभवत्। तस्मादवश्यं त्वया सोम आहर्तव्य इत्याशयः। किं च। महापातकानां कथापि दूरे तिष्ठतु। अहं तु अन्यदपि पापं मिथ्याभिशंसनादिकं न करोमि। इत्याशयेनाह। न विद्यते एनः

पापं यस्यासावनेनाः। तमनेनसं निःपापं एनसा पापेन न प्रोर्णुवीमि। मिथ्याभिशस्तं न करोमि। '*ऊर्णुञ्*' आच्छादने। ऊर्णुवीमि आच्छादयामि। वेष्टयामि। कस्यापि निर्दोषस्य मिथ्यापवादं न वदामि। तथा साक्षात् कृतपापस्यापि निन्दां न करोमि। पापसंकीर्त्तनं न करोमि, इत्यमुमर्थं विवक्षुराह। नागस्पृश इत्यादि। अहं आगःस्पृशः जनस्य एनः अघं नापहरामि गृह्णामि। आगः पापं स्पृशति संचिनोतीत्यागःस्पृक् पापकर्त्ता। तस्य आगःस्पृशः पापंकर्तुः जनस्य एनः कल्मषं न हरामि। यः परस्य पापं कीर्तयति स एव तद् गृह्णाति। '*मिथ्याभिशंसिनो दोषोऽहिसमोऽभूतवादिन*' इति स्मृतेः। एवं विनता गरुत्मन्तमुक्त्वा नागान् प्रति त्विदमपरयर्चाह।

विनतोवाच सर्पान् प्रति –

किमाहृत्वा किं विजित्वा किमुं कृत्वा तु पौरुंषम्।
दास्याद्वो वि प्रंमुच्येय तदु शंसंत लेलिहाः॥५॥

॥ *पदपाठः* ॥

किं। आ। हृत्वा। किं। वि। जित्वा। किं। ऊँ इतिं। कृत्वा। तु। पौरुंषं। दास्यात्। वः। वि। प्र०मुच्येय। तत्। ऊँ इतिं। शंसंत। लेलिहाः॥

॥ *भाष्यम्* ॥

हे लेलिहाः सर्पाः। लेलिहन्ति जिह्वया द्रवरसं आस्वादयन्ति इति लेलिहाः। '*लिह*' आस्वादने। किं वस्तु आसमन्तात् हृत्वा भवद्भ्यो निवेद्य च युष्माकं दास्यात् अहं मुच्येय। मुच्ये मुक्ता भवेयं। किं वस्तुविशेषेण किं वस्तु जित्वा। यद्वा किं विजित्वा। कं पुरुषं दुर्जयं जित्वा। किं पौरुषं कृत्वा कं पुरुषार्थं कृत्वा। तत् शंसत कथयत इत्येवं मत्पुत्रः पृच्छति। परया नागाः विनतां प्रत्यूचुः।

वारं वरीयं दिव्युत्तमायां
रहः शृणुमो बृहदिन्द्ररक्षितम्।
तमा हृत्वाऽमृंतपोऽऽर्णुवेम
दास्यान्मुंच्यस्व यदि शक्तिरस्तिं ते॥६॥

॥ *पदपाठः* ॥

वारं। वरीयं। दिवि। उत्० तमायां। रहः। शृणुमः। बृहत्। इन्द्र० रक्षितं। तं। आ। हृत्वा। अमृत० पाः। ऊर्णुवेम। दास्यात्। मुच्यस्व। यदिं। शक्तिः। अस्तिं। ते॥

॥ *भाष्यम्* ॥

हे विनते गच्छ। गरुडं प्रति एवं वद। सर्पाः इति कथयन्ति। वयं वरीयं वरणार्हं सोमं, दिवि स्वर्गे, रहः एकान्ते। बृहत् यथा स्यात्तथा। महता प्रयत्नेन इन्द्ररक्षितं शृणुमः। आकर्णयामः। बृहदिति क्रियाविशेषणं प्रयत्नातिशयद्योतनार्थे। रक्षणक्रियायाश्चेदं विशेषणं। रक्षणं संगोपनम्। इन्द्रेण संगोपितं गुप्तं कृतं। निगूढं कृत्वा निक्षिप्तं अथवा बृहदिति लुप्तविभक्तिकं सप्तम्येकवचनान्तं। बृहत् बृहति महति सद्वस्तुनः निक्षेपणस्थाने इन्द्रेण रक्षितं संगोपितं। किंलक्षणं सोमं?। वारं वाः इति रेफान्तशब्दः (वार्) स्त्रीलिंग उदकवाची। वारं उदकं उदकस्वरूपं। द्रवरसमित्यर्थः। यथा वा। उदकं जगज्जीवनं तथाऽयं सोमोऽपि जगज्जीवनः। हे गरुड। त्वं आ इति आपत्य, इतः उड्डीय, तं सोमं तस्मात् दिवि संगोपनस्थानात् आहृत्य आनीय अस्मभ्यं समर्प्य च दास्यात् मुच्यस्व मुक्तो भव। यदि तव शक्तिरस्ति। एतद्दुःकरं कर्तुं। एवं त्वया सोमे आनीते सति वयं अमृतपानकरणेन आत्मानं ऊर्णुवेम। आच्छादयाम। अमृतपेत्याकारान्तं पुंसि तृतीयैकवचनं। अमृतं पिबतीत्यमृतपाः। तेन अमृतपा अमृतपानशीलेन अस्मत्परिचारकनागवर्गेण आत्मानं ऊर्णुवेम। आच्छादयाम। 'ऊर्णुञ्' आच्छादने। अमृतं पिबता नागवृन्देन परितो वृताः भविष्यामः इति मनोरथं प्रकटयन्ति। इति एकादशो वर्गः॥

॥ अथ द्वादशो वर्गः ॥

इन्द्रस्य॒ सोम॒ं निहि॑तं गुहा॑यां
तृ॒तीया॑त् पृ॒ष्ठाद्रज॑सो विमा॑नात्।
नि॒हत्य॒ रक्षस्तर॑सा प्रणु॒द्या-
ऽऽहं॑रिष्यामि च व॒ इन्दु॑ं नु मै॒व॥७॥

॥ *पदपाठः* ॥

इन्द्र॑स्य। सोम॑ं। नि०हि॑तं। गुहा॑यां। तृ॒तीया॑त्। पृ॒ष्ठात्। रज॑सः। वि॒मानात्॑। नि॒० हत्य॑। रक्षः॑। तर॑सा। प्र॒०नु॒द्य॒[२७]। आ० ह॒रि॒ष्या॒मि॒। च॒। व॒ः। इन्दु॑। नु। म॒। ए॒व॥

---

[२७] 'प्रणुद्य' इत्यस्य पदपाठेऽङ्कितं सर्वानुदात्तत्वं चिन्त्यम्। ल्यब्योगे धातौ, क्त्वायोगे च प्रत्यये उदात्तस्वरः, इति नियमः। अतः प्रणुद्य इत्यस्य स्थाने शुद्धं रूपं 'प्रणुद्य' इत्येव भाव्यम्। (संहितापाठेऽपि आ-उपसर्गस्य उदात्तत्वात् 'प्रणुद्याहरिष्यामि' इतिवत् अस्माभिः शोधितम्। मूले तु 'प्रणुद्याऽऽहरिष्यामि' इति पाठः)।

॥ *भाष्यम्* ॥

खगेन्द्रः सोमाहरणे स्वोत्साहशक्तिं विवृणोति। गरुड उवाच। विनतां प्रति –

हे मातः। गच्छ। सर्पान् इति मद्वाक्यं ज्ञापय। इतीति किं। नु इति कोमलामन्त्रणे। हे सर्पाः। अहं वः युष्मभ्यं युष्मदर्थे तृतीयात् पृष्ठात् इन्द्रस्य सोमं आहरिष्यामि आनेष्यामि। तृतीयं पृष्ठं स्वर्लोकः। किंभूतात् रजसः। रजोगुणस्य विमानात्। गताभिमानात्। मानो गर्वोऽहंकारः। स चाभिमानो रजसः सम्बन्धी। रजोगुणस्य कार्यं। अत्र *'षष्ठी शेषे'* (पा० २.३.५०) इति संबन्धे षष्ठी। कोऽत्र सम्बन्धः। कार्यकारणभावः सम्बन्धः। रजः कारणं। अभिमानः कार्यं। विगतो मानोऽहंकारो यस्मात् असौ विमानः तस्मात्। किंभूतं सोमं? गुहायां रहसि। अगोचरे क्वचित्प्रदेशे निहितं गोपायितं। पुनः कथंभूतं सोमं? इन्दुं। ईश्वरं। सर्वार्थसम्पादनसमर्थं। *'इन्दति'* ईष्टे इतीन्दुः। तं। इन्दतिरैश्वर्यकर्मा। 'इन्दतेरैश्वर्यकर्मण' इति यास्कः। यद्वा 'लोका रजांस्युच्यन्त' इति यास्कः। रजसो देवलोकस्य समूहस्य विमानात् लोकात् गणः समूहः तस्य विमानस्वरूपात्। *'देवयानं विमानोऽस्त्रीत्यमरः'*। तत्र हि सर्वे वैमानिका एव वसंति। किं कृत्वा हरिष्यामि। रक्षः यातुधानान्। निहत्य नितरां हत्वा। रक्ष इत्येकवचनं जातौ। रक्षांसीत्यर्थः। किं च तरसा। बलेन देवगणान् सर्वान् सोमपालान् प्रणुद्य प्रेर्य दूरे प्रक्षिप्य। निरस्य। हे सर्पाः, मा एव इत्यत्र वद्-क्रियापदस्याध्याहारः। मा वदिष्ट। एवं पूर्वोक्तं 'यदि शक्तिरस्ति ते' इति। यदि शब्दः संशयमुत्पादयति। तं मा वदत। निश्चयेन शक्तोऽस्मि इत्याशयः।

अथ जननी सुतं सोमस्याजिहीर्षया जिगमिषुं प्रेक्ष्य तस्य सुरकृतं निग्रहं शंकमाना विरहं चासहाना स्नेहात्तं निवारयन्त्युत्तरामृचमाह। विनतोवाच गरुडं प्रति –

सर्वे॑ दे॒वा दि॒वि र॑क्षन्ति॒ सोमं॑
भू॒तानि॑ चा॒न्यानि॑ म॒हान्ति॑ तात।
तस्य॒ जानी॑ष्व॒ यदि॑ ते वि॒षह्यं॑
श्रेयो॒ऽभौजि॑ष्यात्तव॑ जीवि॒तम्मे॑॥८॥

॥ *पदपाठः* ॥

सर्वे॑। दे॒वाः। दि॒वि। र॒क्ष॒न्ति॒। सोम॑म्। भू॒तानि॑। च॒। अ॒न्यानि॑। म॒हान्ति॑। ता॒त॒। तस्य॑। जानी॑ष्व। यदि॑। ते॒। वि॒०सह्य॑म्। श्रेयः॑। अ॒भौजि॑ष्यात्। तव॑। जी॒वि॒तम्। मे॒॥

॥ *भाष्यम्* ॥

हे सुत, सोमाहरणं दुःशकं यतः दिविस्थितं सोमं सर्वे देवाः रक्षन्ति। च अपरं। अन्यानि देवव्यतिरिक्तानि अपि भूतानि यक्षरक्षःपिशाचगुह्यकादीनि। हे तात। तस्य सोमस्य आहरणं यदि ते विशेषेण सह्यं सोढुं शक्यं भवति, तर्हि तज्जानीष्व जानीहि। विचारय। शक्यमशक्यं वेति। यदि शक्यं स्यात्तर्हि प्रयतस्व नो चेन्मा प्रयतेथाः। येन तव हननमाशंक्यते तेन कार्येण अलं। मे मम अभौजिष्यात् दासत्वाभावादपि तव जीवितं श्रेयः वरं। भुजिष्या दासी। तस्या भावः भौजिष्यं। न भौजिष्यमभौजिष्यं। दास्याभावः। अमृतार्पणनिःक्रयेण दासत्वापाकरणं। दास्याद्विमोचनं। तस्मादपि तव जीवितं श्रेयः हितं। दासत्वमपि चिरं तिष्ठतु। परं तु इन्द्रादीनां प्रहारैस्तव नाशो मा भूत्।

परयर्चा स्वस्याभयं दर्शयन् गरुड उवाच मातरं प्रति –

छन्दांसि॒ वै स्मों विनते सुपर्णि
यज्ञं यानि॒ वित॑तं धा॒रय॑न्ति।

अस॑कृद्वै॒ यज्ञ॒महे पु॒रस्तान्
मा नो॑ दा॒ता नि द॑मे॒ऽव मं॑स्थाः॥९॥

॥ *पदपाठः* ॥

छन्दां॑सि। वै। स्मः॑। वि॒०न॒ते॒। सु॒०प॒र्णि॒। य॒ज्ञं। यानि॑। वि॒०त॑तं। धा॒रय॑न्ति। अस॑कृत्। वै। य॒ज्ञ॒० म॒हे। पु॒रः॑। तान्। मा। नः॑। दा॒ता। नि। द॒मे॒। अ॒व॒० मं॑स्थाः॥

॥ *भाष्यम्* ॥

हे विनते विशेषेण नते। नित्यं नम्रे। त्वं सर्वदा पूज्यान् प्रति नम्रा भवसि। अतो विनतेत्युच्यते। सर्वदा नम्रायां त्वयि सानुग्रहाः देवाः तवापत्यस्य निग्रहं न करिष्यन्ति इति साभिप्रायमिदं पदं। हे सुपर्णि सुपतने। '*पत्लृ*' गतौ। पतनं गमनं गतिः क्रमणमिति यावत्। सुष्ठु शोभनं। अनिषिद्धं सन्मार्गे गमनं यस्याः सा सुपर्णी। सन्मार्गवर्तिनी। हे सन्मार्गगामिनी। यतस्त्वं सन्मार्गे एव प्रवर्त्तसे धर्ममार्गे एव तिष्ठसि, अतस्त्वत्संततेः कोऽपि हन्ता न भविष्यति इत्याकूतवता प्रयुक्तं सुपर्णीत्यपि पदं साभिप्रायं। वयं तानि छन्दांसि स्मः। वेदा भवामः। वयं हि वेदात्मकाः स्मः। 'छन्दोमयं विविधयज्ञतनुं वरेण्यं' इत्युक्तं प्राक्। तानि कानि। यानि विततं विस्तीर्णं यज्ञं धारयन्ति प्रतिपादयन्ति। वै निश्चितं। पुरः पूर्वं। पूर्वकाले अहं तान् देवान् असकृत् अनेकशः। बहुवारं अतर्पयमिति शेषः। क्व।

यज्ञमहे। महः उत्सवः। यज्ञ एव महः यज्ञमहः तस्मिन् यज्ञमहे यज्ञोत्सवे। छन्दोमयत्वात्। यज्ञस्य वैदिकवेद्यत्वाच्च। किंलक्षणो वेदात्मकोऽहं? दाता। याज्यापुरोऽनुवाक्याभ्यां हविषां निदाता। नितरां दाता[२८]। अतः हे मातः दमे दण्डे सुरैः क्रियमाणे निग्रहे सम्भाव्यमाने शंक्यमाने सति नः अस्मान् त्वं माऽवमंस्थाः। देवैः क्रियमाणस्य पराभवस्य पात्रमिति मन्वानं च माऽवमन्येथाः। अशक्तं मा जानीथाः। असावशक्तः पराभूयिष्यत इति सम्भावनमेवावमाननं।

इदमेव प्रमेयं हृद्यवधार्योद्धृत्योत्तरामृचमाह स एव –

यानि॑ छन्दां॑सि चतुरुत्त॒राणि॑
य॒ज्ञं व॑हन्ति॒ वित॑तं स॒प्तत॑न्तुम्।
तान्य॒हमं॑स्मि विनते सुपर्णि॑
मां दे॒वता॒ः प्राहि॑न्व॒न्त्सोम॒मच्छा॑॥१०॥

॥ *पदपाठः* ॥

यानि॑। छन्दां॑सि। च॒तुः॒ऽउ॒त्त॒राणि॑। य॒ज्ञं। व॒ह॒न्ति॒। वि॒० त॑तं। स॒प्त॒० त॑न्तुं। तानि॑। अ॒हं। अ॒स्मि॒। वि॒०न॒ते॒। सु॒० प॒र्णि॒। मां। दे॒वता॑ः। प्र। अ॒हि॒न्व॒न्। सोम॑। अच्छ॑॥

॥ *भाष्यम्* ॥

हे विनते, हे सुपर्णि। अहं तानि छंदांसि अस्मि। तद्रूपोऽस्मि। तानि कानि? यानि छन्दांसि। ये वेदाः। यज्ञं विततं विस्तृतं यथास्यात्तथा वहन्ति धारयन्ति। प्रतिपादयन्ति। कीदृशानि छन्दांसि। चतुरुत्तराणि। चत्वार्येवोत्तराणि मुख्यानि उत्कृष्टानि प्रधानानि येषु तानि चतुरुत्तराणि। एवं विधान्यायुर्वेदधनुर्वेदगान्धर्ववेदार्थशास्त्रप्रमुखाण्युपवेद-पुराणेतिहासादीनि छन्दांसि सन्ति। एतेषु सर्वेषु गौणं वेदाभिधानमस्त्येव। चत्वार एव ऋग्वेदादयः प्रधानरूपाः। ननु अस्तु नाम चतुर्भ्यो व्यतिरिक्तेषु वेदशब्दाभिधेयत्वं परं तु कथं तेषां यज्ञप्रतिपादकत्वं? शृणु। यैर्नियमैर्यज्ञाः फलवन्तो भवन्ति तेषां विस्तरो धर्मशास्त्रपुराणेषु। एवं यज्ञोपकारित्वाद्यज्ञं वहन्तीति युज्यसे।

---

[२८] ग्रन्थान्तर्गतात् 'निदमे' इत्यस्मात् सोपसर्गक्रियापदात् 'नि' इत्युपसर्गं निष्कास्य 'दाता' इत्यनेन तत्पूर्वगतस्वतन्त्रपदेन संयोज्य भाष्यकारेण या 'नितरां दाता' इति व्याख्या कृता सा सुधीभिश्चिन्तनीया। अस्माभिस्तु 'निदमे' इत्यत्र 'निदधे' इति मूलगतपदस्य पाठाविलत्वमूह्यते। 'दाता' इत्यत्रापि 'धाता' इत्येव मूलगतपाठः प्रतिभाति (धाता यज्ञमहे असकृत् नः पुरस्तात् निदधे)।

ननु तर्हि आयुर्वेदादीनां किमागतं? सत्यं। आयुर्वेदः शरीरस्य स्वास्थ्यसाधकतया ऋत्विग्यजमानानां प्रवर्तकः। धनुर्वेदो मखविघ्नकर्तृदुष्टनिग्राहकतया यागोपकारित्वेन। गान्धर्वस्य क्वचित्प्रयोगोऽस्तीति। अर्थशास्त्रस्यार्थसाधकत्वादर्थमन्तरेण यज्ञानुष्ठानस्यासाध्यत्वात्। चतुरुत्तराणीत्यत्रतदुणसंविज्ञानो बहुव्रीहिः। किं च। देवताः मामच्छ, मां अभिलक्ष्य, मदभिमुखं सोममृतं प्राहिण्वन्। व्यत्ययेन लृडर्थे लङ्॥ प्रहिणुष्यन्तीत्यर्थः, प्रेरयिष्यन्ति। '*हिनु*' प्रेरणे। सपदि तत्कालमागतं मां ज्ञात्वा ते देवाः स्वयमेव सोमं नीत्वा मह्यं दास्यन्ति॥ ('अच्छा' इत्यत्र छान्दसं दीर्घत्वम्, सं०)

यावदहं बुभुक्षितस्तावत्किमपि कर्तुं न शक्नोमीत्यतो भक्षं मे ज्ञापयेति आहोत्तरया। गरुड उवाच –

नाऽनश्नतो वीर्यं किञ्चनाऽस्त्-
यस्मिन्लोके चरतः सुपर्णि।
पृच्छामि त्वा विनतेऽहमेतत्
किं स्विद् भुक्त्वाऽथ पथामि देवलोकम्॥११॥

॥ *पदपाठः* ॥

न। अनश्नतः। वीर्यं। किं। चन। अस्ति। अस्मिन्। लोके।
चरतः। सु०पर्णि। पृच्छामि। त्वा। वि०नते। अहं। एतत्।
किं। स्वित्। भुक्त्वा। अथ पथामि। देव० लोकं॥

॥ *भाष्यम्* ॥

हे सुपर्णि। अनश्नतः अकृतभक्षणस्य मे किंचन वीर्यं सामर्थ्यं नास्ति। कीदृशस्य। अस्मिन् लोके मर्त्ये चरतः विचरतः सतः तर्हि लोकान्तरे दैविके गन्तुं कथं शक्यते। हे विनते, अहं त्वां एतत्पृच्छामि। स्विदिति वितर्के। किं भुक्त्वा देवलोकं पथामि गच्छामि॥ इति द्वादशो वर्गः ॥

॥ सप्तमं सूक्तम् ॥

॥ अथ त्रयोदशो वर्गः ॥

जननी सुतस्य भक्ष्यं ज्ञापयति –

एष महान्पर्वंतस्तस्य कूटे
महान्ह्रदस्तत्रं भूतं महान्तंम्।
तद्धस्तिनमवं तीर्णं ग्रंहीष्यसि
स तें भक्षस्ता उभौ पंश्य गरुड॥१॥

॥ *पदपाठः* ॥

एषः। महान्। पर्वंतः। तस्यं। कूटे। महान्। ह्रदः। तत्रं। भूतं। महान्तं। तत्। हस्तिनं। अवं। तीर्णं। ग्रहीष्यसि। सः। ते। भक्षः। तौ। उभौ। पश्य। गरुड॥

॥ *भाष्यम्* ॥

हे सुत, एष प्रत्यक्षं दृश्यमानो महान् अमितप्रांशुः। चतुरशीतिर्लक्षाणि योजनानां प्रमाणतः उच्चैस्तरः पर्वतो मेरुः उत्तरतस्तिष्ठति कांचनमयः। तस्य मेरोः कूटे महान् अगाधो ह्रदो जलाशयोऽस्ति तडागः। तत्र ह्रदे अन्तर्गतं महान्तमतिप्रमाणभूतं जलचरं प्राणिनं ग्राहाख्यं स्थितं ग्रहीष्यसि। तत् तस्मिन् ह्रदे अवतीर्णं प्रविष्टं स्थलचरं हस्तिनं गजं (च) ग्रहीष्यसि। स ग्राहः, ते भक्षः। स च हस्ती ते भक्षः। तौ उभौ ग्राहहस्तिनौ पश्य। दृष्ट्वा गृहाण। गृहीत्वा च भक्षय।

इत्थं मातुरुपदेशं लब्ध्वा सुपर्णस्तस्मिन् ह्रदे गत्वा तस्माद् ह्रदाद् ग्राहगजावुद्धृत्यादाय मातुरग्रे गत्वेदमाह॥

गरुड उवाच मातरं प्रति –

म॒हा॒ना॒गो घोष॑वान्नाम॑ प॒त्मी
म॒हाद॑न्तो मे॒घ[२९] इ॒वाऽव॑ भासते।
तं तेऽद॑दात्स॒ह स॒ख्येन॑ धा॒ता
तौ भ॑क्षयि॒त्वाऽथ॒ पथा॑मि[३०] देवलो॒कम्॥२॥

॥ *पदपाठः* ॥

म॒हा॒ना॒गः। घोष॑०वान्। नाम॑। प॒त्मी। म॒हा०द॑न्तः। मे॒घःऽइ॑व। अव॑। भा॒स॒ते॒। तं। ते॒। अ॒द॒दा॒त्। स॒ह। स॒ख्येन॑। धा॒ता। तौ। भ॒क्ष॒यि॒त्वा। अथ॑। पथा॑मि। दे॒व०लो॒कं॥

॥ *भाष्यम्* ॥

हे मातः। अयं महानागो महाहस्ती मया गृहीतः। स च मेघ इव अवभासते। शोभते। नाम्ना घोषवान्। किंलक्षणः? पत्मी। पत्म पतनं गमनं तदस्यास्तीति पत्मी गमनशीलः। '*पत्लृ*' गतौ। महादन्तः। तमेतं नागं धाता स्त्रष्टा परमेश्वरः। मह्यमदात्। केन कारणेन। ते तव सख्येन मैत्र्या। या हि सती सत्यवती सत्यवादिनी धर्मनिष्ठा भवति तस्याः परमेश्वरः सखा मित्रं भवति, पितृवत् स्निग्ध इष्टदश्च। कथमदात्? नक्रेण ग्राहेण सह सहितं। अहं ताविमौ ग्राहगजौ भक्षयित्वा अथ देवलोकं पथामि गच्छामि।

गरुड उवाच –

वयां॑सि॒ वै स्मो॑ विनते सुपर्णि॒
नाऽस्मान्भूमौ॑ भ॒क्ष्यमा॑णं धिनोति।
वृ॒क्षं नौ॑ ब्रूहि॒ यदि॒ वेत्थ॒ कञ्चि॒द्
यत्रा॑धिरु॒ह्याद्म[३१] रु॒च्याम्ब॑ भ॒क्ष्यम्॥३॥

---

[२९] संधिद्वयं विधाय मूले क्वचिद् 'मे॒घे॒वाव॑ भासते' इत्यपि पाठः समुपलभ्यते (मेघः इव >मेघ इव >मेघेव)।

[३०] मध्यमपुरुषान्तं 'पथासि' पदमेवात्र संगच्छते। नागराक्षरेषु सकार-मकारयोराकृतिसाम्याद् व्यत्ययः। गमनार्थस्य वैदिकपथ्धातोर्लेटि रूपमेतत्। (पथासि=[त्वं] गच्छेः), विनतोक्तिश्च।

[३१] 'अधिरुह्याद्म' इत्येतत्पदद्वयस्य सन्धिं पदपाठः (भाष्यमपि) 'अधिरुह्य+अद्म' इतिवद् विच्छिनत्ति। अत्र 'अद्म' इतिक्रियापदं चिन्त्यम्। भाष्यकारस्तु 'भक्षयाम' →

॥ *पदपाठः* ॥

वयांसि। वै। स्मः। विनते। सु०पर्णि। न। अस्मान्। भूमौ। भक्ष्यमाणं। धिनोति। वृक्षं। नः। ब्रूहि। यदि। वेत्थ। कं। चित्। यत्र। अधि०रुह्य। अद्म। रुच्या। अम्ब। भक्ष्यं॥

॥ *भाष्यम्* ॥

हे विनते। हे सुपर्णि वयं वयांसि पक्षिणः स्मः भवामः। भूमौ निराधारायां भक्ष्यमाणं खाद्यं अदनीयं अस्मान् पक्षिजातिं न धिनोति प्रीणाति। '*धिनु*' प्रीणने। नोऽस्मभ्यं कंचित् वृक्षं ब्रूहि। यदि वेत्थ। जानासि। यत्र वृक्षे अधिरुह्य आरुह्य। हे अम्ब, अद्यास्मिन् दिने[३२] भक्ष्यमदनीयं द्रव्यं रुच्या इच्छया रुचिपूर्वकं सास्वादं यथास्यात्तथा अद्म[३२]। भक्षयाम।

मातोवाच –

यत्र ऋषयो बालखिल्याः सुपर्ण
वैखानसाश्च मुनयो वसन्ति।
यस्य शाखाः पतिता योजनानि
तमारोह शाखिनं भोजनाय॥४॥

॥ *पदपाठः* ॥

यत्र। ऋषयः। बाल० खिल्याः। सु०पर्ण। वैखानसाः। च। मुनयः। वसन्ति। यस्य। शाखाः। पतिताः। योजनानि। तं। आ। रोह। शाखिनं। भोजनाय॥

॥ *भाष्यम्* ॥

हे सुपर्ण, यत्र अस्मिन् वृक्षे, अत्र[यत्र-]शब्देन तदीया छाया लक्ष्यते। यस्य तरोः छायायां बालखिल्याः एतत्संज्ञकाः ऋषयो वसन्ति। तपश्चरणार्थं। च अपरं। अन्ये ऋषयो वैखानसाः वानप्रस्थाः तृतीयाश्रमाः वसन्ति। यस्य तरोः

← इति शब्दान्तरेणैतद् विवृण्वन् आज्ञार्थकमुत्तमपुरुषबहुवचनान्तं (लोट्) मन्यते। लौकिकसंस्कृते त्वेतद् रूपम् 'अदाम' इति, तदेव रूपं वैदिकस्य लेट्-लकारस्यापि (लेट् : उत्तमपुरुषरूपाणि लौकिकसंस्कृते लोटि गृह्यन्ते)। तथापि वैदिक्यां भाषायां कदाचिद् लेटि 'अद्म' इत्यपिरूपं प्रचलितमासीद् इत्यनुमीयते।

[३२] 'अद्म' इत्यस्य स्थाने कुत्रचिद् 'अद्य' इत्यपि पाठ उपलभ्यते। भाष्यकारस्तु द्वावपि पाठौ साधु मत्वा, समेत्य व्याख्याति!

शाखाः चतसृषु दिक्षु शतं शतं योजनानि दैर्घ्येण पतिताः गताः प्रसृताः। तं शाखिनं तरुं भोजनाय अदनार्थं आरोह अधितिष्ठ॥

सैवोवाच –

नगश्रेष्ठं रौहिणं गच्छ शीघ्रं
बृहच्छाखं जनयितुः सखायम्।
तमारुह्य भक्षयेथाः सुपर्ण
स चेद् गरुत्मन्वृषयेन्न चान्यः॥५॥

॥ *पदपाठः* ॥

नग० श्रेष्ठं। रौहिणं। गच्छ। शीघ्रं बृहत्० शाखं। जनयितुः। सखायं। तं। आ०रुह्य। भक्षयेथाः। सुपर्ण। सः। चेत्। गरुत्मन्। वृषयेत्। न। च। अन्यः॥

॥ *भाष्यम्* ॥

हे सुपर्ण, नगाः पर्वताः। तेषां श्रेष्ठो नगश्रेष्ठो मेरुः। तं आश्रित्य स्थितं रौहिणं एतन्नामानं वृक्षं प्रति शीघ्रं गच्छ। कीदृशं तरुं। बृहच्छाखं। बृहत्यो महत्यः शाखाः दीर्घतराः स्थूलतराश्च यस्यासौ बृहच्छाखः। तं। तव जनयितुः पितुः सखायं मित्रं। त्वत्पित्रा पूर्ववयसि चिरं स एव आश्रितः सेवितः। तस्यैव छायायामुषितं। अतः सखेत्युच्यते। हे सुपर्ण। तं रौहिणं तरुमारुह्य इमौ ग्राहगजौ भक्षयेथाः। व्यत्ययेन आत्मनेपदं। हे गरुत्मन्, चेत् त्वं वृषयेत् वृषीकुर्यात्। वृषसदृशं कुर्यात्। वृषः कामानां वर्षि(षयि)ता। इष्टकामप्रदः। तादृशं कुर्यात्। सर्पाणाममृतार्पणद्वारा कामपूरकं कुर्यात्। मम च दास्यापाकरणेन कामप्रदं कुर्यात्। तर्हि स एव रौहिणः वृक्षः कुर्यात्। अन्यः न च। एतावता अमुष्मिन् तरौ उपविष्टस्य ते भक्षणं समीचीनं भविष्यति। तेन तृप्तस्त्वं इन्द्रलोके गन्तुं शक्तो भविष्यसि। तत्र देवैः साकं योद्धुं च। ततोऽमृतमाहर्तुं च। एवं कार्यपरंपरायाः हेतुभूतत्वेन स एव तरुः वृषयेत्। वृषं कुर्यात्। कामानां वर्षयितारं कुर्यात्। कामान् वर्षितुं शक्तं कुर्यात्। अन्यो न च। इति त्रयोदशो वर्गः॥

॥ अथ चतुर्दशो वर्गः ॥

इदानीं खगेन्द्रो भक्ष्यमत्तुं मात्रोपदिष्टं तरुं जिगमिषुस्तामापृच्छते। मातुराज्ञां प्रार्थयते।

गरुड उवाच मातरं प्रति –

अहमिमौ वाशितायामिव शुद्धपद्मौ-
नागौ मतङ्गाऽनुचरौ प्रभिन्नौ[३३]।
अग्रहैषं प्रमुदितो महान्ता-
वध्वानमेतं पतैतद्ध्रजिष्यन्॥६॥

॥ *पदपाठः* ॥

अहं। इमौ। वाशितायांऽइव। शुद्ध०पद्मौ। नागौ। मतङ्ग० अनुचरौ। प्र० भिन्नौ। अग्रहैषं। प्र० मुदितः। महान्तौ। अध्वानं। एतं। पते। एतत्। ध्रजिष्यन्॥

॥ *भाष्यम्* ॥

हे मातः। पूर्वं त्वदुपदेशादहं। महाह्रदाद् ग्राहगजौ संयुक्तावेव इमौ नागौ हस्तिनौ अग्रहैषं। अग्रहिषं। गृहीतवानस्मि। जलचरस्यापि ग्राहस्य तावन्मात्रदेहत्वान्नागनाम्ना व्यपदेशः। यथाऽयं स्थलहस्ती तथासौ जलहस्तीत्याशयेन। गृहीत्वा च सद्यः प्रमुदितो हर्षितः। कस्यां सत्यां प्रमुदितः? अपत्य[श्रे]ण्यां अनुत्पन्नपक्षायां नीडमध्यस्थायां पितृभ्यामाहृतस्य भक्ष्यस्य भक्षणार्थमुत्सुकायां चिराय चुंकृतैर्वाशितायां कूजन्त्यामिव त्वरितमागंतुमिच्छुः प्रमुदितो हर्षितः। किं लक्षणाविमौ ग्राहगजौ। शुद्धपद्मौ। शुद्धं शुक्लवर्णं पद्मं पद्मलाञ्छनं ययोः शरीरे। तौ शुद्धपद्मौ। उभयोर्भाले पद्मसदृशं चिह्नमस्ति। सितोत्पलाकारं लांछनं। कीदृशौ तौ। मतंगानुचरौ। मतंगाः सिन्धुराः द्विरदाः, [अनुचराः ग्राहादयः] अप्सुचराः ययोः तौ मतंगानुचरौ इति बहुव्रीहिः। कीदृशौ। प्रभिन्नौ। मदस्त्रावेण प्रभिन्नललाटौ स्फुटितकुम्भस्थलौ स्रवन्मदोदकौ। महांतौ पर्वतप्रायौ। ताविमौ गृहीतावेव वर्तेते। हे मातः अहमधुना एतं अध्वानं रौहिणवृक्षगमनमार्गं पते पतामि। गच्छामि। किं करिष्यन्। सन्। एतत् नाकं स्वः। ध्रजिष्यन्। गमिष्यन् सन्। ध्रजति रजति लजति इत्येवमादीनि, वर्तते, अयते इत्यादिषु द्वाविंशत्युत्तरे गतिकर्मणां धातूनां नामसु पठितानि। तत्र ध्रजति इति पठित्वाद् गत्यर्थोऽयं धातुः। ध्रजति गतिकर्मेत्यर्थः। ततस्तौ गृह्णन्नेवोड्डीय

---

[३३] त्रयोदशाक्षरात्मकस्य प्रथमपादस्य पाठाविलत्वं सुस्पष्टम्। 'वाशितायामिव शुद्धपद्मौ' इत्यादिकं दुर्व्याख्येयम्। भाष्यकारो निःसहायतया यदेव व्याचष्टे। तन्नैव विद्वज्जनमनोरञ्जकम्। कदाचिद् 'वाशिता' इत्यस्य स्थाने 'अशिता' (बुभुक्षा) अथ च 'शुद्धपद्मस्य' स्थाने महाभारते उल्लिखितं 'सुपद्म' इति पठनीयं स्यात्। 'ध(ध्र)जिष्यन्' इत्यपि चिन्तनीयम् (हनिष्यन्? जिघित्सन्?)। '*अहमिमावशितायां सुपद्म-*'। अपरञ्च द्वितीये पादे 'अनुचरौ' इत्यस्य स्थाने 'अप्सुचरौ' इत्यपि कुत्रापि पाठ इति भाष्ये संकेतितम्।

महातरुं रौहिणं प्रति प्रयातः। ततो दूरादागच्छतो गरुडस्य पक्षवातांशेनातिदूरादागतिना दोधूयमानो रौहिणतरुः स्वाधिष्ठातृदेवता मुखेनेदमुवाच।

रौहिण्यवृक्ष उवाच। स्वस्य सखीन् प्रति –

मॅहावीर्यं हॅस्तिनं मेॅरुमांत्रं
सॅहग्रांहं धांरयंन्नॅन्तरिंक्षे।

जॅवेनं वांयुं बलंवन्तमीरयॅन्-
नुपैंत्यॅसौ कॅम्पयंन्मा सुपॅर्णः॥७॥

॥ *पदपाठः* ॥

मॅहा०वीर्यं। हॅस्तिनं। मेॅरु० मांत्रं। सॅह०ग्रांहं। धांरयंन्। अॅन्तरिंक्षे। जॅवेनं। वांयुं। बलं०वन्तं। ईॅरयॅन्। उपं। एॅति। असौ। कॅम्पयंन्। मा। सु० पॅर्णः॥

॥ *भाष्यम्* ॥

असौ सुपर्णः मा मां उपैति समीपे आगच्छति। किं कुर्वन् सन्। हस्तिनं गजं अंतरिक्षे धारयन् सन्। कथंभूतं? मेरुमात्रं। महावीर्यं। सहग्राहं। ग्राहसहितं। जवेन वेगेन वायुं ईरयन् प्रणुदन् प्रेरयन् निराकुर्वन् अतिक्रामन्। उल्लंघयन् जयन्नित्यर्थः। यद्वा जवेन पक्षाभ्यां वायुं ईरयन्नुत्पादयन् पक्षद्वयान्दोलनजन्यं वातं नूतनं सृजन् सन्। किंभूतं। बलवंतं प्रबलं। पुनः किं कुर्वन्। मा इति मां कंपयन्। पक्षवातेन आंदोलयन् सन्।

निकटे गत्वा व्यवसानया षट्पदयर्चा सुपर्णो रौहिणवृक्षं प्रार्थयते –

गरुड उवाच वृक्षं प्रति –

अॅहं वै तैं मघवन्त्संवत्सॅरः
पृॅष्ठे ऽधिंमॅात्रा निहिंॅतॅोऽयमंस्मि।[३४]

---

[३४] अस्यामष्टम्यामृचि भाष्यकारः प्रारम्भेऽष्टमसूक्तगताया तृतीयाया ऋचः (अहं वै मघवन् . . . संहरस्व) प्रथमं पाददयं संयोज्य षट्पादात्मिकामेनामृचं निर्मिमीते। उत्तरार्धं (तृतीयतुर्यपादौ) त्वस्या ऋच अग्रिमायाम् ('एषा प्राची . . .' इति) ऋचि पञ्चमषष्ठपादरूपेण संयुक्तं तिष्ठति। पदपाठेऽष्टमसूक्ते स्थिताया अपि एतस्या ऋचः पदपाठो भाष्यकृदनुरोधेनास्माभिः ततः संगृह्य विच्छिद्य च अत्र, तत्र च प्रदत्तः। अत्रैव चैतत् प्रसंगानुकूलम्। अष्टमसूक्ते त्वस्या ऋचोऽवस्थितिः तत्रत्यप्रसंगविरुद्धैव।

प्रति॑ तिष्ठ रौह्रि॒णं धा॒रय॑स्व
श्र॒मेण॒ वै मो॑मुमुहु॒र्भवा॑नि।
छन्दो॑भिर्मि॒श्रः स॒ह दे॒वता॑भि॒-
रात्वा॑ रोक्ष्यामि॒ सह॑सा॒ऽहं ग॒रुत्मा॑न्॥८॥

॥ *पदपाठः* ॥

अ॒हं। वै। ते॒। म॒घ॒०व॒न्। स॒ंव॒त्स॒रः। पृ॒ष्ठे। अधि॑। मा॒त्रा। नि०
हि॑तः। अ॒यं। अ॒स्मि॒। प्रति॑। ति॒ष्ठ॒। रौ॒ह्रि॒णं। धा॒रय॑स्व। श्र॒मेण॑।
वै। मो॒मु॒मु॒हुः[३५]। भवा॑नि। छन्द॑:ऽभिः। मि॒श्रः। स॒ह। दे॒वता॑भिः।
आ। त्वा॒। रो॒क्ष्या॒मि॒। सह॑सा। अ॒हं। ग॒रुत्मा॑न्॥

॥ *भाष्यम्* ॥

हे रौहिणवृक्ष। हे मघवन् धनवान्। प्रष्टव्यसर्वपदार्थसम्पन्न। रौहिणवृक्ष। अयं। अहं। वै प्रसिद्धौ। संवत्सरोऽस्मि। संवत्सरात्मकोऽस्मि। संवत्सरः। परमः कालः। कालरूपोऽस्मि। स चाहं। मात्रा मम जनन्या विनतया ते तव पृष्ठे शाखा मध्यभागे। अधिरोढुं निहितः। आरोपितोऽस्मि। तत्रोपवेशनं कर्तुं प्रेरितः उपदेशितोऽस्मि। मां प्रति। त्वं तिष्ठ। स्थिरो भव। मां च भक्षाभ्यां गजग्राहयोर्देहाभ्यां सहितं धारयस्व। पदव्यत्ययः। वै इति प्रसिद्धौ। पुरातनाः बहवः शरीरिणः भवानि, इति छांदसत्वाददुष्टं सप्तम्येकवचनान्तं। भवानि भवति त्वयि स्थिताः। आरूढाः सन्तो मोमुमुहुः। अध्वक्रमणश्रमेण खिन्नाः क्लान्ताः संतः त्वदनुज्ञां विनैव दूरदेशादागत्य त्वामारूढाः संतः तव अधिष्ठात्र्याः देवतायाः प्रकोपात् अतिशयेन मोमुमुहुः। मोहं वैचित्त्यं मूर्छां अचेतनत्वं प्रापुः। 'मुह' वैचित्त्ये। अतोऽहं त्वां प्रार्थये। त्वदनुज्ञया त्वा त्वां अहं गरुत्मान्। गरुडः। आरोक्ष्यामि त्वदारोहणं करिष्यामि। मामनुचरन्त्यो बह्व्यो देवताः मामारूढं दृष्ट्वा तवारोहणं करिष्यंति।

ततो रौहिणवृक्षः स्वाधिष्ठात्र्याः देवतायाः सामर्थ्येन दिव्यवाचा गरुडं प्रति आह। व्यवसानयैव षट्चरणया परयर्चा –

एषा प्राचीं॑ गरुड॒ तां श्र॑यस्व॒
यस्यां॑ वैखान॒सा ऋष॑यो बालखिल्याः।

---

[३५] कच्चित् 'मा उं मुमुहुः (भवानि)' यदि वा 'नो मुंमुहुर्भवानि' इति पठनीयं स्यात्?

परस्यां नमति तावत्तिरश्ची
स चेद् गरुत्मन् वृजिनाद् बिभेषि॥
पदाऽनुशाखामधरां प्रवृन्धि[३६]
बिलिन्थे पक्षावपि संहरस्व॥९॥

॥ *पदपाठः* ॥

एषा। प्राचीं। गरुड। तां। श्रयस्व। यस्यां। वैखानसाः। ऋषयः।
बालं० खिल्याः। परस्यां। नमति। तावत्। तिरश्ची। सः।
चेत्। गरुत्मन्। वृजिनात्। बिभेषि। पदा। अनु। शाखां।
अधरां। प्र० वृंधि। बिलिंथे। पक्षौ। अपि। सं। हरस्व॥

॥ *भाष्यम्* ॥

इति त्र्यवसाना षट्पादा ऋक्। अनयर्चा वृक्षो गरुडाय विश्रामस्थानं दिदिक्षुराह। रौहिण वृक्ष उवाच –

हे गरुड एषा मम प्राची प्राग्गामिनी पूर्वगामिनी शाखा। तां प्राचीं पूर्वगामिनीं पूर्वाग्रां शाखां आश्रयस्व आरुह। अधितिष्ठ। तां काम्? यस्यां बालखिल्याः ऋषयः वसंति। अत्र लक्षणयाऽस्यामिति अस्याः शाखायाः छायायां इत्यर्थो लभ्यते। तथा अन्येऽपि वैखानसाः वानप्रस्थाः। तावत् इति तावत्येव तन्मात्रैव अन्या मम शाखा। परस्यां पश्चिमायां दिशि नमति नता तिष्ठति। पश्चिमाग्रा प्रसरतीत्यर्थः। तथा तावदेव। तावत्यौ एव। तावत्प्रमाणे एव। द्वे अन्ये मम शाखे। तिरश्ची इति तिरश्च्यौ। तिर्यक्गामिन्यौ वर्तेते। एका दक्षिणाग्रा द्वितीयोत्तराग्रेति द्वे तिर्यग्गामिन्यौ। एवं चतुःशाखो [+वृक्षो?] गरुड मेऽस्ति। हे गरुत्मन्। सः प्रसिद्धः। त्वं चेत् वृजिनात् पापात् बिभेषि। भीतोऽसि। तर्हि त्वं इमां प्राचीं शाखां अधरां किंचिदधोनतां अवाङ्मुखीं पदा प्रपदेन धृत्वा प्रवृंधि। बृंहय। बृंधि। बृंहितां कुरु। बृंहणं दार्ढ्यं। बृंहय। दृढां कुरु। बलवत्तरां कुरु। पादेन धृत्वा उन्नतं कृत्वा तथैव चिरं धारय। यावत्ते कार्यं तावत् पादाग्रेणोर्ध्वं यत्नेन धारय। भंगो मा भूत्। चरणाधारेण तुलयन् रक्ष। अस्मिन् बिलिंथे बिलिंथवृक्षे रौहिणवृक्षे मयि त्वं स्वौ उभौ पक्षौ च संहरस्व। संवृतौ कुरु। संक्षिप्तौ कुरु। पक्षौ संकुचितौ कुरु। पक्षयोः संकोचं, संवरणं कुरु। बिलिंथो रौहिणः पर्यायौ। स एव वृक्षः शाखाधारणप्रयत्नाकरणे तीव्रं भयं दर्शयति दिव्यवाचा वदन् परयर्च्चा।

---

[३६] 'प्रवृंधि' इति मूले स्थितस्य पाठस्य स्थाने कदाचित् प्रवृङ्ग्धि (प्र-वृञ्ज्/वृज्= अपसारय) एव साधुः स्यात्।

वृक्ष उवाच –

अभांक्षीः शाखां वृजिनं करिष्यसि
हनिंष्यसि ब्राह्मणान् ये पृंथिव्याम्।
अतूर्त्तं तमो रजो विनंशिष्यसि
नाऽऽहंरिष्यसि सोमंमेतं गंरुत्मन्॥१०॥

॥ *पदपाठः* ॥

अभांक्षीः। शाखां। वृजिनं। करिष्यसिं। हनिंष्यसि। ब्राह्मणान्। ये। पृथिव्यां। अतूर्त्तं। तमंः। रजंः। वि। नशिष्यसि। न। आ। हरिष्यसि। सोमं। एतं। गरुत्मन्॥

॥ *भाष्यम्* ॥

हे गरुड! अनयोर्गजग्राहयोस्तव भारभरेण इमां प्राचीं शाखां अभांक्षीः। लृडर्थे व्यत्ययेनायं [लुङ्-]लकारः। भंक्ष्यसि। भग्नां करिष्यसि। ततः शाखाभंगे सति महत् वृजिनं पातकं करिष्यसि। किमित्यत आह। ये पृथिव्यां उषिताः संति तपोऽर्थे। तान् ब्राह्मणान् शाखापातेन मर्दयित्वा हनिष्यसि। अतूर्त्तं। अत्वरं शनैः शनैः विनष्यसि। विनाशं क्षयं प्राप्स्यसि। तेन ब्रह्मवधपापेन। किं कृत्वा? रजः तमश्च वर्धयित्वा। रजोगुणं तमोगुणं च प्रवृद्धं कृत्वा तद्दोषेण ब्राह्मणान् हत्वा तत्पापेन नाशं प्राप्स्यसि। ततश्च एवं प्रसिद्धं देवलोके स्थितं सोमं न आहरिष्यसि। आनेष्यसि। एवं ते सर्वकार्यनाशः। तस्माच्छाखाधारणे प्रयत्नं कुर्वित्यर्थः। इति चतुर्दशो वर्गः ॥

॥ अष्टमं सूक्तम् ॥

॥ अथ पञ्चदशो वर्गः ॥

इत्थं शाखाभंगोपद्रवं भाविनं गरुडो मनसा विभाव्य प्रयत्नेन दृढतरमेकेन हस्तेन तां शाखां नमन्तीमुद्दधार। अपरेण करेण तयोर्देहौ।

अथ स्वगृहे पुत्रकार्यनिमित्तामनिवृत्तिं मनसि धारयन्तीं विनता[तस्याः] सत्यतपोव्रतसत्त्वधर्मे(ण) सततं प्रसन्नः परमेश्वर आकाशे वर्तमानया दिव्यवाचा बोधयत्यपरामृचं पठित्वा। आकाशवाणी प्रोवाच विनतां प्रति –

सव्येन शाखां धारयति दक्षिणेनेतरा उभौ।
बलं पश्य सुपर्णस्य न वाचा परिमाय्यम्॥१॥

॥ *पदपाठः* ॥

सव्येन। शाखां। धारयति। दक्षिणेन। इतरौ। उभौ। बलं।
पश्य। सु०पर्णस्य। न। वाचा। परि०माय्यं।

॥ *भाष्यम्* ॥

हे विनते। सुपर्णस्य बलं शक्तिं पश्य। किंलक्षणं बलं? वाचा वागिन्द्रियेण कृत्वा केनापि वक्त्रा न परिमाय्यं परिमातुं न शक्यं। इयत्तया वर्णितुमशक्यम्। किं तद्बलमित्यत आह। सव्येन करेण महतीं शाखां धारयति। दक्षिणेन इतरौ उभौ ग्राहगजौ। ततस्तां वाचं श्रुत्वाऽऽश्चर्य्याविष्टा सा एकैव श्रोतृजननी(नि)रपेक्ष-प्रह(व)णेदमुवाच।

विनतोवाच केवला –

को नु वाचमीरयत्यन्तरिक्षे महोदयाम्।
एकः स्वपितिं मे सुतो द्वितीय उपजायते[३७]॥२॥

---

[३७] 'उपजायते' इति तु 'उपजीव्यति' (=भुङ्क्ते, अस्मिन् समये गजग्राहादिभक्षणे व्यापृतः) इत्यस्य वैकृतिकं रूपं प्रतिभाति।

॥ *पदपाठः* ॥

कः। अनु[३८]। वाचं। ईरयति। अन्तरिक्षे। महोदयां। एकः। स्वपिति। मे। सुतः। द्वितीयः। उप। जायते।

॥ *भाष्यम्* ॥

अन्तरिक्षे इमां वाचं वाणीं, नु इति वितर्के, कः ईरयति। वदति। कीदृशीं। महोदयां। महान् उदयोऽभ्युदयः पुरुषार्थवर्णनं मत्सुतस्य यस्यां वाचि सा महोदया, तां। यदि मम द्वयोः सुतयोरन्यतरो वक्ता संभाव्यते। तर्हि तन्न संभवति। कुतः। एको मे सुतः अरुणः स्वपिति। पंगुत्वात्सूर्यरथे ध्रुव आस्ते। अतः खेदाच्छेत इत्युपचर्यते। द्वितीयः सुतो गरुडः। कदा उपजायते। उपेत्य जायते। जनिष्यते। प्रादुर्भविष्यति। '*जनि*' प्रादुर्भावे। भविष्यदर्थे वर्तमानार्थप्रयोगः। सोऽपि सन्निधौ नास्तीत्याशयः। अथ भक्षणीयं मांसं भक्षयित्वा कदाचिन्मातृ-समीपमागत्य तां प्रणम्य खगेन्द्रः तदग्रे पुराजातं वृत्तमावेदयति।

अहं वै तै मघवन्त्संवत्सरः
पृष्ठेऽधिमात्रा निहितोऽयमस्मि।
पदाऽनु शाखामधरां प्रवृन्धि
बिलिन्थे पक्षावपि संहरस्व॥३॥

[पदपाठः भाष्यं च पूर्वमेव (द्र० सप्तमे सूक्ते अष्टमी ऋक्) प्रदत्तम्। मूले त्वस्या ऋचोऽत्रावस्थितिरिति पुनरप्युद्धृता – सं०]

सुपर्ण उवाच मातरं प्रति –

नैनां वध्रः[३९] परि हरच्छतर्मार्ऽनुच्छदः।
यामम्ब रौहिणस्याहं श्रान्तः शाखामधारयम्॥४॥

---

[३८] पदपाठे 'को नु' इत्यस्य 'कः अनु' इतिरूपे विच्छेदेऽपि भाष्ये 'कः नु' इत्येव स्वीकृतम्।

[३९] मूले पदपाठे च विद्यमानस्य 'वध्रः' इत्यस्य स्थाने भाष्यकारः 'बद्धः' इति पठति तथैव च विवृणोति। 'शुद्धं पदं तु' 'बध्-बन्ध्' धातोर्निष्पन्नं 'बद्ध्रः', 'बद्ध्रिः' ('बद्धी' इति हिन्दीभाष्याम् = leather strap, 'चमड़े की पट्टी') इति वा प्रतिभाति, यस्यार्थः 'बन्धनार्थे प्रयोजनीयः चर्मरज्जुः' इति॥ (अग्रे द्रष्टव्यम्)

॥ *पदपाठः* ॥

न। एनां। वध्रिः। परि। हरत्। शत०चर्मा। अनु०च्छिदः यां।
अम्ब। रौहिणस्य। अहं। श्रांतः। शाखां। अधारयं॥

॥ *भाष्यम्* ॥

हे अंब, रौहिण्यस्य द्रुमस्य शाखां शतचर्मा, महिषाणां चर्मणां क्षुरेण पाटितानां सूक्ष्मसूत्रसदृशो बद्धः[३९] चर्ममयस्तन्तुः। इतरेतरेण खण्डेन सीवितः संततः एकगुण एव परिवेष्टनाय प्रयुक्तः सन् परिहरत्। पर्यहरत्। परिहरणं कृतवान्। परितः हरणं वेष्टनं परिहरणं। तन्नाकरोत्। एतेन शाखायाः स्थौल्यं सूचितं। किंलक्षणो बद्धः? अनुच्छिदः। न विद्यते उच्छिदा यस्यासौ अनुच्छिदः। छिदा छेदः। अविच्छिन्नः। एनां शाखां अहमधारयम्। करेण धृतवान्। श्रांतः खिन्नोऽपि सन्।

अथोत्तरया तावन्मात्रेण भक्षिते स्वस्यातृप्तिं ज्ञापयित्वा तृप्तये मातरं भक्ष्यांतरं बहुलं किमपि याचते। गरुड उवाच मातरं प्रति –

न हस्तिनं भक्षयित्वा बिलिन्थे
सहग्राहं भुक्तवानस्मि शुंगे।
दिश भूयो भक्ष्यमन्यं महान्तं
यथा तृप्तः स्वः पथेयं क्षणेन॥५॥

॥ *पदपाठः* ॥

न। हस्तिनं। भक्षयित्वा। बिलिंथे। सह०ग्राहं। भुक्त०वान्।
अस्मि। शुंगे। दिश। भूयः। भक्ष्यं। अन्यं। महांतं। यथा।
तृप्तः। स्वरितिं स्वः। पथेयं। क्षणेन॥

॥ *भाष्यम्* ॥

हे शुंगे। अहं सहग्राहं ग्राहसहितं हस्तिनं करिणं बिलिंथे। बिलिंथवृक्षे रौहिणद्रुमे। बिलिंथोपरि तस्य शाखायामुपविश्य भक्षयित्वापि तृप्तवान्नास्मि। किन्तु अतृप्त एवास्मि। भुक्तवानप्यभुक्तवानिव तृप्तेरभावात्। हे मातः भूयः पुनरपि अन्यं(त्) कंचित् (किञ्चित्) भक्ष्यं दिश देहि। अथवा दिश, आदिश, कथय। उपदिश, ज्ञापय। यथा येन भक्ष्येण भक्षितेन अहं तृप्तः सन् क्षणेन क्षणमात्रेण स्वः स्वर्गं पथेयं गच्छेयम्। इति पंचदशो वर्गः ॥

॥ अथ षोडशो वर्गः ॥

अथास्मै भक्ष्यान्तरमुपदेष्टुं विनता प्रथमया न्यायमुक्त्वा द्वितीयया भक्षणीयद्रव्यं तृप्तिपर्याप्तमुपदिशति। विनतोवाच गरुडं प्रति –

जङ्गमं स्थावराण्यत्त्येषा वृत्तिः सनातना।
वयांस्युभयमश्नन्ति स्थावरं जंगमं च यत्॥६॥

॥ *पदपाठः* ॥

जंगमं। स्थावराणि। अत्ति। एषा। वृत्तिः। सनातना। वयांसि।
उभयं। अश्नंति। स्थावरं। जंगमं। च। यत्॥

॥ *भाष्यम्* ॥

हे पुत्र, जङ्गमं प्राणिजातं स्थावराणि वनस्पत्यादीनि धान्यफलादीनि वस्तूनि अत्ति। भक्षयति। एषा सनातना आद्या कल्पादितः प्रवर्तमानाऽस्ति वृत्तिः। वयांसि पक्षिणस्तु उभयं द्वयमपि अश्नन्ति भक्षयन्ति। द्वयं किम्? यत् यत्स्थावरं यच्च जंगमं तदुभयमश्नन्ति। अथोत्तरया माता भक्ष्यांतरमुपदिशति पुत्राय।

विनतोवाचं सुतं प्रति –

निषादराष्ट्रं बह्वेकभेदं
तदद्धि त्वं मम कामाय शूर।
नाऽऽश्रावयन्ति[४०] न यंजन्त्येते-
ऽन्नं शिवं शुश्रुमैतद् गरुत्मन्॥७॥

॥ *पदपाठः* ॥

निषाद०राष्ट्रं। बहु। एक० भेदं। तत्। अद्धि। त्वं मम। कामाय। शूर। न। आ० श्रावयंति[४०]। न। यजंति। एते। अन्नं। शिवं। शुश्रुम। एतत्। गरुत्मन्॥

॥ *भाष्यम्* ॥

हे शूर। गरुत्मन्। लवणावती–तीरे[४१] बहु इति बहुलं। अतिप्रमाणं। असंख्येयं निषादराष्ट्रमस्ति। निषादानां भिल्लानां राष्ट्रं देशः। देशशब्देन तेषां महद् वृन्दं

---

[४०] पदपाठमनुसृत्य भाष्यकारेणापि 'नाश्रवयन्ति' इति पाठं स्वीकृत्य व्याख्यातम्।

[४१] मातृकायामत्र 'लवणावणतीरे' इत्यपपाठः।

लक्ष्यते। किं भूतं एकभेदं। एक एव भेदः विविधत्वहीनः। नानाजातिरहितो यस्य तत् एकभेदं। तत् निषादवृन्दं हे शूर, त्वमद्धि अशान। भक्षय। किमर्थं। मम कामाय। मम कामं मनोरथं पूरयितुं। परंपरया। *'तुमर्थाच्च भाववचनादि'ति* (पा० २.३.१५)। एते निषादाः न आश्रवयंति। आश्रवणप्रत्याश्रवणे न कुर्वन्ति। अधिकाराभावात्। 'ॐ श्रावय, अस्तु श्रौषदि'त्यश्रावणप्रत्याश्रवणे। यज्ञेष्टयादिकर्तारो न भवन्ति। न यजंति, याज्यां पठन्ति। अतः एतेषु नाशितेषु का हानिः। अयज्ञियत्वात्। हे गरुत्मन्, अत एव एतत् इदं निषाद-स्वरूपमन्नमदनीयद्रव्यं शिवं कल्याणकरं वयं शुश्रुम। शृणुमः। प्रत्यवायाभावात्।

विनतोवाच –

ब्राह्मणं स्म तु मा हिंसीश्चरन्तं जनतामनु।
देवं क्षमापरं शूर स मृत्युर्न तव[ा]परः[४२]॥८॥

॥ *पदपाठः* ॥

ब्राह्मणं। स्म। तु। मा। हिंसीः। चरंतं। जनंतां। अनु। देवं।
क्षमा० परं। शूर। सः। मृत्युः। न। तव। परः॥

॥ *भाष्यम्* ॥

हे शूर। त्वं ब्राह्मणं मा स्म हिंसीः मा स्म वधीः। किंलक्षणं जनं? तेषां निषादादीनां समूहं अनु, लक्ष्यीकृत्य विचरंतं। निषादानां मध्ये विचरंतं। पुनः कीदृशं देवं, भूमिदेवं। क्षमायां परं, तत्परं, अक्रोधं। ते च। स ब्राह्मणः प्रकोपितः सन् मृत्युरेव। परः अन्यः ब्राह्मणः (जनः?) योऽपि कोऽपि मृत्युर्न च। इतरस्मात् मा भैषीः।

गरुड उवाच –

एकशीर्षा द्विपादा द्विहस्ता
अव गृहीता मम ते (चेत्?) सुपर्णि।
पृच्छामि त्वा विनतेऽहमेतत्
किं स्विद्रूपं भवति ब्राह्मणस्य॥९॥

---

[४२] 'परः' इत्यत्र अपपाठः, 'अपरः' इत्येव भवितव्यम्।

॥ *पदपाठः* ॥

एकं० शीर्षाः। द्वि० पादाः। द्वि० हस्ताः। अव। गृहीताः। मम। ते। सु०पर्णि। पृच्छामि। त्वा। विनते। अहं। एतत्। किं। स्वित्। रूपं। भवति। ब्राह्मणस्य॥

॥ *भाष्यम्* ॥

हे सुपर्णि। ते त्वया मम ये भक्ष्याः अवगृहीताः अनुज्ञाताः निषादाः तेऽपि, तथा ये अभक्ष्याः उपदिष्टाः ब्राह्मणाः तेऽपि च। उभये एते सदृशरूपाः। कथं? उभयेऽपि एकशीर्षाः एकशीर्षाणः, एकशिरसः। तथा उभये द्विपादाः द्विहस्ताश्च। हे विनते। अहं त्वा। त्वां प्रति। एतत् पृच्छामि। किं स्विदिति वितर्के। ब्राह्मणस्य रूपं किं भवति कीदृशं भवति। कंचिद्ब्राह्मणशरीरे विशेषं वद। असाधारणधर्मं वद। असाधारणं विप्रस्य लक्षणं वद। इत उत्तराभिर्विप्रचिह्नानि। विनतोवाच –

रजस्वलो जटिलः पङ्कदन्तोन्नीत-
शिखो[४३] वदति सत्यमेव।
अमित्रमध्ये न बिभेति मृत्योः
स ब्राह्मणस्तं स्म मा हन् गरुत्मन्॥१०॥

॥ *पदपाठः* ॥

रजस्वलः। जटिलः। पंक०दंतः। उन्नीत० शिखः। वदति। सत्यं। एव। अमित्र०मध्ये। न। बिभेति। मृत्योः। सः। ब्राह्मणः। तं। स्म। मा। हन्। गरुत्मन्॥

॥ *भाष्यम्* ॥

हे गरुत्मन्। स ब्राह्मणो ज्ञेयः। तं च मा हन्। भवान् मा हिंसीत्, मा वधीत्। तं कं? यः रजस्वलः। धूलिधूसरगात्रः। भस्मोद्धूलितदेहः। *'रजः कृष्यासुतिपरिषदो वलच्'* (पा० ५.२.११२)। जटिलः जटाव्याप्तशिराः। पंकदंतः। पंको मलः। पंकयुक्ताः मलिनाः दंताः यस्यासौ पंकदंतः। यद्वा 'पंकिदंत' इति पाठः। पंकः एष्वस्तीति पंकिनः। पंकिनो दन्ताः यस्यासौ पंकिदन्तः। उन्नीतशिखः। उन्नीता ऊर्ध्वं नीता शिरसः उपरि स्पष्टीकृता शिखा यस्यासौ उन्नीतशिखः। ब्राह्मणानां

---

[४३] पङ्कदन्तः+उन्नीतशिखः, पङ्कदन्त-उन्नीतशिखः, पङ्कदन्तोन्नीतशिखः। सन्धेरेतदार्षं द्वित्वं रामायणमहाभारतपुराणादिष्वपि दृष्टिपथमायाति (यथा - 'निशाचरः स ववृधे, व्याधयोपेक्षिता इव', इति युद्धकाण्डे)।

पर्युप्तशिरसामपि शिखारक्षणमावश्यकं। यद्वा शिखा नाम सा यः (यत्र?) ब्रह्मग्रंथिर्बद्धो भवति। यः सत्यमेव सर्वदा वदति स ब्राह्मणः। एतानि ब्राह्मणलक्षणानि। यश्च अमित्राणां शत्रूणां मध्ये स्थितोऽपि सन् मृत्योः सकाशात् न बिभेति। हननात् भयं न शंकते। यः मां जिघांसति क्रूरदृष्ट्याऽवेक्षते वा, स अवश्यं सद्यः नश्यति। भस्मीभवति। भस्मसाद्भवति, इत्यभिप्रायवान्। इति षोडशो वर्गः॥

॥ नवमं सूक्तम् ॥

॥ अथ सप्तदशो वर्गः ॥

षळ॒ग्नय॒ो यं पुरु॑ष॒ं तप॑न्ति॒
जैह्व॒ो हार्द्द॒ औदर॒ो रैत॑सश्च।
त॒प्तश्च॑ं घ॒र्मः शिशि॑रश्च॒ शीत॒ः
स ब्रा॑ह्म॒णस्तं स्म॒ मा ह॑न् गरुत्मन्॥१॥

॥ *पदपाठः* ॥

षट्। अ॒ग्नय॑ः। यं। पुरु॑षं। तप॑न्ति। जैह्व॑ः। हार्द्द॑ः। औदर॑ः।
रैत॑सः। च॒। त॒प्तः। च॒। घ॒र्मः। शिशि॑रः। च॒। शीत॑ः।
(शेषं पूर्ववत्)

॥ *भाष्यम्* ॥

हे गरुत्मन्। स ब्राह्मणः ज्ञेयः। सः कः। यं पुरुषं षट् अग्नयः तपंति संतपंति। संतापयंति पीडयंति। अन्तर्नीतण्यर्थरूपं। '*तप*' संतापे। के ते षट् अग्नयः जैह्वः हार्दः औदरः रैतसः एते चत्वारः। पञ्चमो घर्मः घर्माग्निः। उष्णोऽग्निः। शीतः षष्ठः। शीताग्निः। एते षट्। जिह्वायां भवो जैह्वः अग्निः स तु वाक्संयमद्वारेण संतापयति, तथा अक्षारालवणाशाकवृत्त्यान्नाशनेन रसनेंद्रियविषयरोधद्वारेण। द्वितीयो हार्दः हृदि भवो हार्दः। मनः संयमनसाध्यो ध्यानाग्निर्ज्ञानाग्निर्वा निर्मर्यादानर्गल-संकल्पविकल्पनिरोधदुःखेन संतापयति। तृतीय औदरः। जठराग्निः स च उपवासादिना धातून् दहति। चतुर्थो रैतसः। रेतसि भवः रैतसः। स च रेतःसंनिरोधेन ब्रह्मचर्यचरणात् दुःखमुत्पाद्य संतापयति। पञ्चमो घर्माग्निः। घर्म उष्णः। अर्कातपकृतेन तापेन वैश्वानरकृतेन च देहं संतापयति। पंचाग्निसाधनव्रते। षष्ठः शीताग्निः। तुषाराग्निः। हिमकृतवेदनाद्वारा संतापयति। किंलक्षणो घर्मः? उष्णाग्निः। तप्तः। विशेषणमेतत्। चतुर्णां वैश्वानराणां स्थण्डिलेषु स्थापितानां खादिरेन्धनैः प्रदीपनात् प्रतप्तः। प्रदीप्तः। सूर्यस्य च अभ्रावरणराहित्येन गगनमध्यगतत्वेन च तप्तः प्रतप्तः। किंलक्षणः शीतः? शिशिरः। विशेषणमिदं। शिशिरः अतिहिमसंसृष्टो

हिमाग्निः संतापयति, हिमवेदनया त्वचं दहति। एवं षट् अग्नयः। प्रकारान्तरेण योजना। षट् अग्नयः यं पुरुषं आदित्ये तपंति प्रकाशंते देदीप्यन्ते। स ब्राह्मणः। शेषमभिन्नं। अपरयर्च्चा विप्रलक्षणान्येव दर्शयति सा।

विनतोवाच –

मत्स्यैव[४४] बिलिशं जग्रसानो
गुरूदरो भवति ब्राह्मणेन।
अङ्गारेव[४४] विदहन्नेति कण्ठं
स ब्राह्मणस्तं स्म मा हन् गरुत्मन्॥२॥

॥ *पदपाठः* ॥

मत्स्यःऽइव। बिलिशं। जग्रसानः। गुरु०उदरः। भवति। ब्राह्मणेन।
अंगारऽइव। वि०दहन्। एति। कंठं।

॥ *भाष्यम्* ॥

हे गरुत्मन्। ब्राह्मणेन गिलितेन गलादधस्तादुत्तीर्णेनोदरमध्यस्थेन गुरूदरो महोदरो भवति। उदरवृद्धिरोगी भवति। उदरे प्रविष्टो विप्रो नैव जीर्यते। चिह्नान्तरमाह। विप्रः गले यदा प्रविशति तदा कंठस्य मध्ये विदहन् विशेषेण दहन् सन् कंठे एति। यः ईदृशः। स ब्राह्मणः। हे गरुड तं मा हन्। मास्म वधीत् भवान्। अथ गरुडः विप्रलक्षणानि श्रुत्वा हर्षितः प्रत्युत्तरमाह।

गरुड उवाच मातरं प्रति –

आ हरिष्यामि ते सोमं ज्ञातो भक्षः सनातनः।
आऽन्ततो भक्षयिष्याम्युभयं स्थाष्णु जंगमम्॥३॥

॥ *पदपाठः* ॥

आ। हरिष्यामि। ते। सोमं। ज्ञातः। भक्षः। सनातनः। आ।
अंततः। भक्षयिष्यामि। उभयं। स्थाष्णु। जंगमं॥

---

[४४] अनुष्ठितेऽपि सन्धिद्वित्वे छन्दोऽनुरोधेन क्वचित् संहितरूपेण (यथा 'अंगारेव' इति चतुरक्षरे पदे), क्वचिच्च विखण्डितरूपेण (यथा 'मत्स्य इव' एवं चतुरक्षराणि विधाय) गीयते प्रतिपादमेकादशाक्षरा त्रिष्टुभ्, इति प्रतीयते।

॥ *भाष्यम्* ॥

हे मातः। त्वदर्थं तव दास्यविमोचनार्थं सोममाहरिष्यामि आनेष्यामि। यतः मे भक्षः सर्वोऽपि तृप्तिपर्याप्तो ज्ञातः। सनातनः। शास्त्रविहितः। त्वदुपदेशात् उभयं भक्षयिष्यामि। कथं। अंततः आंतात्। आ। अंतमभिव्याप्य। अभिविधावाङ्। अंतपर्यंतं सर्वं भक्षयिष्यामि, निःशेषमित्यर्थः। उभयं किं? स्थाष्णु तत्रत्यं स्थावरं। जंगमं च, तत्रत्यं सर्वं चरिष्णु। एतदुभयं॥

अथ मेर्वद्रौ महारौहिणद्रुमशाखाच्छायेऽध्युषितस्य तार्क्ष्यमहर्षेर्विनतापतेर्गरुडपितुः समीपस्थे वामदेव ऋषिर्देशकालव्यवहितानपि पदार्थान् अप्रतिहतगतिना चक्षुषा पश्यन्, गरुडस्य वेदराशिमयदेहत्वं परमेश्वरांशत्वं च जानन्, गरुडे परमभक्तिमान् गरुडस्योपक्रमं विदित्वा परया त्रिष्टुभा सुपर्णं नमस्कुरुते।

वामदेव उवाच –

वयसां राजानमभिमातिषाहं[*]
दिव्यं सुपर्णं वयसा बृहन्तम्।
शूरं सुपर्णमभि यत् प्रतीकं[४५]
तार्क्ष्यं शौङ्गेयं नमसोऽपतिष्ठे॥४॥

॥ *पदपाठः* ॥

वयसां। राजानं। अभिमाति० सहं। दिव्यं। सु०पर्णं। वयसा। बृहंतं। शूरं। सु०पर्णं। अभि। यत्। प्रतीकं। तार्क्ष्यं। शौङ्गेयं। नमसा। उपतिष्ठे॥

॥ *भाष्यम्* ॥

अहं वामदेवः तार्क्ष्यं तार्क्ष्यनामानं शौंगेयं शुंगायाः सुतं नमसा प्रणत्य उपतिष्ठे। उपस्थितोऽस्मि। शरणं गतोऽस्मि। किंलक्षणं तार्क्ष्यं? वयसां पक्षिणां राजानं। अभिमातिसहं। अभिमातयः शत्रवः तान् सहते। योद्धुं हंतुं च शक्नोतीत्यभिमातिसहः तं, अभिमातिसहं। शत्रूणामभिभवितारं। दिवः द्युलोकस्यार्हः दिव्यः। भूमौ जातोऽपि अनेनैव देहेन द्युलोके उषितुमर्हः। तं। सुपर्णं। शोभने साममये पर्णे द्वौ पक्षौ यस्य असौ सुपर्णः। तं बृहद्रथंतरसामात्मकपक्षं। वयसा आयुषा बृहंतं महांतं। अतिदीर्घायुष्यं। जरामरणवर्जितं शूरं। अजय्यं। किं च। सुपर्णं गरुडं

---

[*] कदाचित् "अभियत्प्रतीपम्" (अभियाति जनान् प्रति गच्छतीति अभियत्, शत्रुः, तं प्रतीपं वर्तयति, परास्यतीति) पठनीयं स्यात्?

अभि। अभिलक्ष्य यदन्यत्प्रतीकं रूपं तदुपजीविपरिचारकादिकं तदप्यहं नमस्कारेणोपतिष्ठे। उपस्थितोऽस्मि।

अथ विनतायाः पतित्रर्षिर्जिगमिषया मेघवत् सिंहवत् च गर्जन्तं गरुडं श्रुत्वा प्रहर्षित उल्लासबलात्तत्रस्थः वामदेवादिषु समीपस्थेषु शृण्वत्सु इदमाहापरयच्र्या। कश्यपपर्यायः तार्क्ष्य ऋषिरुवाच –

शब्देनाऽसौ पृथिवीं दिवं च
संनादयंन्नेति नभो दिशश्च।
मन्ये शौंगेयो गरुडोऽरुणो वा
प्रियः पुत्रो भवति मे क्षयेऽद्य॥५॥

॥ *पदपाठः* ॥

शब्देन। असौ। पृथिवीं। दिवं। च। सं०नादयन्। एति।
नभः। दिशः। च। मन्ये। शौंगेयः। गरुडः। अरुणः। वा।
प्रियः। पुत्रः। भवति। मे। क्षये। अद्य॥

॥ *भाष्यम्* ॥

असौ विप्रकृष्टप्रदेशवर्ती कोऽपि पुमान् शब्देन स्वगर्जितघोषेण पृथिवीं दिवं स्वर्गलोकं च संनादयन् प्रतिशब्दोत्पादनेन मुखरीकुर्वन् सन्नेति आगच्छति। नभः अंतरिक्षं मध्यलोकं दिशश्च संनादयन् एति। अहं इति मन्ये। संभावयामि। असौ मम पुत्रो भवति। आंतरानंदातिशयोद्गमादनुमिमीते। ननु पुत्रास्ते विविधाः, सन्त्यनेके शतशः कोऽसाविति। तत्राह। शौंगेयः। शुंगायाः सुतः। तस्याश्च द्वौ। तयोरन्यतर इत्यनुमानं कुरुते पक्षवातमाकर्ण्य। अरुणो वा। गरुडो वा। पंगोऽरुणस्य गतेरसंभवेऽप्यभिधानग्रहणं प्रेम्णा व्याकुलतया वैचित्त्यात्। प्रियो वल्लभः। स चाद्य मे मम क्षये निवासे अत्रत्ये आश्रमे एष्यति। इति सप्तदशो वर्गः॥

॥ अथ अष्टादशो वर्गः ॥

वामदेवर्षिः सुपर्णचरित्रं वर्णयति।

वामदेव उवाच –

ततः सुपर्णः समयाद् बुभुक्षितो
मात्राऽऽज्ञातो भक्षयान्वै[४६] निषादान्॥
आकृष्य पक्षावनुगम्यमानान्-
संप्राप्यांस्तु मुखं प्रयच्छते॥६॥

॥ *पदपाठः* ॥

ततः। सुपर्णः। सं। अयात्। बुभुक्षित०। मात्रा। आ०ज्ञातः। भक्ष। यान्[४६]। वै। नि०सादान्। आ० कृष्य। पक्षौ। अनु० गम्यमानान्[४७]। सं० प्राप्यान्। तु। मुखं। प्र० यच्छते॥

॥ *भाष्यम्* ॥

पाठांतरे 'भक्षयानु वै निषादान्'। मात्रा। आ० ज्ञातः। भक्षया० अनु। वै। नि० षादान्। अन्यत्समानं। ततः सुपर्णः मात्रा इति आज्ञातः सन् समयात् सम्यक् विधिना अयात्। अयासीत् अगमत्। इतीति किं? हे पुत्र। त्वं यान् यान् निषादान् किरातान् निश्चिनोषि। निश्चयेन जानासि। तान् तान् भक्ष अशान। भक्षय, खाद। किंलक्षणान् निषादान्? स्वौ पक्षौ आकृष्य विस्तार्य अनुगम्यमानान्। अनु लक्ष्यीकृत्य गम्यमानान् प्राप्यमानान्। पुनः किंलक्षणान् भिल्लान्? [यान्] मुखं व्यादाय विस्तार्य प्रयच्छते निजं मुखविवरं, तेषां प्रवेशार्थं ददते अर्पयते। तुभ्यं संप्राप्यान् सुखेन लभ्यान्। अधरं मुखकटाहं चिबुकं भूमौ स्थापयित्वा उत्तरं मुखकटाहमुद्धृत्य मध्यविवरे बृहंतमवकाशं कृत्वोपविष्टायते। मुखं [व्या]ददते। [एवं] सम्यक् लभ्यान्। एवं ते स्वयमेव तव मुखविवरे प्रवेक्ष्यंति। पाठान्तरे 'आकृष्य पक्षौ ननु गम्यमानान्'। ननु इति कोमलामन्त्रणे। पक्षौ आकृष्य विस्तीर्य गम्यमानान्। गते प्राप्यंत इति गम्यमानाः, तान्। 'मात्राज्ञातो भक्षयानु वै निषादान्' इति वा पाठः। मात्रा इति आज्ञातः सन्। इतीति किं? हे सुपर्ण। वै निश्चये। निषादान् भिल्लान् अनु वारं-वारं भक्षय। अनुसृत्य अनुसृत्य भक्षय। शेषं तुल्यं।

वामदेव उवाच –

उत्प्लुत्योत्प्लुत्य भक्षाणां (णों?) निषादान्वै विहङ्गमः।
गते कण्ठे तु चैकस्मिन्द्रह्यते स्माऽग्निराशिंवत्॥७॥

---

[४६] पाठश्चिन्त्यः। 'भक्षयन् वै निषादान्' इति साधीयः प्रतीयते। भाष्यकारस्तु 'भक्षयानु वै . . .' (भक्षय अनु वै . . .) इत्यपि पाठान्तरं क्वचिदुपलभ्यत इति सूचयति।

[४७] 'आकृष्य पक्षौ ननु गम्यमानान्' इत्यपि क्वचित् पाठ इति भाष्यकृत्।

॥ *पदपाठः* ॥

उत्० प्लुत्य। उत्० प्लुत्य। भक्षाणां। नि० सादान्। वै। वि० हंगमः[४८]। गते। कण्ठे। तु। च। एकस्मिन्। दह्यते। स्म। अग्निराशि०वत्॥

॥ *भाष्यम्* ॥

वै निश्चये। विहंगमः खगेंद्रः। उत्प्लुत्य उत्प्लुत्य। उच्छल्य उच्छल्य। उड्डीयोड्डीय, भक्षाणां सर्वेषां मध्यात् केवलान् निषादानेव जग्राहेति शेषः। अजीगिलदिति वा। च। अपरं। एकस्मिन् पुरुषे कंठे गते सति स दह्यते स्म। केनेव। अग्निराशिवत्। अग्निराशिनेव। अंगारेणेव।

वामदेव आह।

निर्धूमेऽविष्फुलिंगे चार्तः शुंगावचः स्मरन्।
अहो वीर्यं द्विजातीनां जातिमात्रोपजीविनाम्॥८॥

॥ *पदपाठः* ॥

निःऽधूमे। अऽवि०स्फुलिंगे। च। आर्त्तः। शुंगा०वचः। स्मरन्। अहो इति। वीर्यं। द्वि०जातीनां। जातिमात्र० उपजीविनां॥

॥ *भाष्यम्* ॥

अत्र 'एकस्मिन् कंठे गते सति' इत्यनुवर्तते। किंलक्षणे एकस्मिन् पुरुषे? निर्धूमे। अविस्फुलिंगे। विस्फुलिंगाः अग्निकणाः। तद्रहिते। स खलु आर्त्तः कंठे दग्धः सन् मनसा इत्युवाच। किं कुर्वन् सन्? शुंगायाः विनतायाः वचः स्मरन् सन्। 'अंगार इव विदहन्नेति कंठ'मिति मातुर्वचः। इतीति किं उवाच – अहोवीर्यं द्विजातीनां जातिमात्रोपजीविनामिति। अहो इत्याश्चर्ये। द्विजातीनां वीर्यं ब्रह्मतेजो विलोक्यताम्। कीदृशानाम्? जातिमात्रोपजीविनां। जातिमात्रं उपजीवंति तच्छीलाः जातिमात्रोपजीविनः। तेषां।

अथोत्तरया सुपर्णः कंठात् द्विजं बहिर्निःकाशयितुं विप्रं प्रति आह। गरुड उवाच। गलमध्ये स्थितं विप्रं प्रति –

---

[४८] 'विहंगमः' इति मन्त्रे पठितस्य शब्दस्य पदपाठे 'वि०हंगमः' इतिरूपेण पदच्छेदः कुतूहलं जनयति। पदच्छेदे प्रादय उपसर्गा एव पृथक्क्रियन्ते। नात्र 'वि'-वर्णस्तादृशः। विहं, विहायसं, विहायसा वा गच्छतीति विहंगमः, विहगो विहंगो वा।

निष्क्रमाऽस्माद्[४९] द्विजश्रेष्ठ न भक्षस्त्वं हि मे भवेः।
एते भक्षा मयाऽत्रोप्ता न त्वं शोचितुमर्हसि॥९॥

॥ *पदपाठः* ॥

निः। क्रम। अस्मात्। द्विज० श्रेष्ठ। न। भक्षः। त्वं। हि। मे। भवेः। एते। भक्षाः। मया। अत्र। उप्ताः। न। त्वं। शोचितुं। अर्हसि॥

॥ *भाष्यम्* ॥

तेन ब्राह्मणेन इतरा गृहीता काचित् निषादस्त्री। तस्याः पूर्वभर्तुर्निषादादुत्पन्नाः पंचषाः पुत्राः। ते च मात्रा विप्रगेहे भार्यात्वं प्राप्तुं गच्छन्त्या सहैव तत्र नीताः। विप्रस्य दुराचारस्य तेषु परपुत्रेष्वपि स्व स्वपुत्रेष्विव स्नेह उत्पन्नः। तान् इमे मत्पुत्रा इत्यभिमानवान् मन्यते स्म। तस्य ते पुत्राः सा च निषादी भार्या एतत्सर्वं कुटुंबं सुपर्णेन प्रागेव गिलितं, पश्चात् स दुराचारो विप्रो गिलितः। तेन गलमध्ये दग्धं। ततो गलात् तं बहिर्निःकाशयितुं गरुडः प्रायतत। तथापि स द्विजः स्वकुटुंबं विना न निःसरति। तदा गरुडः अनयच्चर्च्या तं विप्रं बहिर्निःकाशयितुं प्रबोधयति।

हे द्विज। ते त्वत्कुटुंबमनुष्याः मया अत्र अस्मिन् उदरे उप्ताः प्रक्षिप्ताः। एतेषां वापनमुदरे कृतम्। 'टुवप्' बीजसंताने। अस्य धातोः प्रयोगः उप्ताः इति। एतान् तव मनुष्यान् आमाशये प्रवेशितान् त्वं शोचितुं नार्हसि। हे द्विजश्रेष्ठ। त्वं अस्मात् गलमध्यात् निःक्रम। निःसर। हि। यस्मात् त्वं मे भक्ष्यः न भवेः। एते तु त्वन्मनुष्याः भक्ष्याः। अत एव मया अत्र स्वोदरे उप्ताः। त्वं तु एतान् स्वकुटुंबमनुष्यान् शोचितुं नार्हसि। अथ विप्रः प्रत्युत्तरमाह।

ब्राह्मण उवाच –

न मन्ये जीवदात्मानं भार्यापुत्रैर्विवर्जितः।
द्विजस्तु सनिषादीकः ससुतस्त्वन्मुखे विषम्॥१०॥

॥ *पदपाठः* ॥

न। मन्ये। जीवत्० आत्मानं। भार्या० पुत्रैः। वि०वर्जितः।
द्विजः। तु। स०निषादीकः। स०सुतः। त्वत्०मुखे। विषं॥

---

[४९] 'अस्माद्' इत्यस्य स्थाने मूलपाठः कदाचित् 'अस्मत्' (अपादाने पञ्चमी) यदि वा 'आस्यात्' (मुखात्) आसीदिति अनुमीयते।

॥ *भाष्यम्* ॥

अहं जीवदात्मानं शुभं न मन्ये। मह्यं हितं न मन्ये। जीवंतं आत्मानं शुभं शोभनं श्लाघ्यं न मन्ये। गुणकरं न मन्ये। त्वत्कंठमध्यात् न बहिर्निर्गमिष्यामि। किं भूतः। भार्यापुत्रैश्च वर्जितो रहितः। हीनः। तु पुनः। हे गरुड। सनिषादीकः निषादीसहितः। निषाद्या भार्यया संयुक्तः ससुतः सुतैः सहितश्च त्वन्मुखे तव मुखे स्थितोऽयं मदात्मकः मल्लक्षणः तव साक्षात् विषमेव। विषवद्भविष्यति। विषं यथा प्राणान् हरति तथा प्राणान् हरिष्यति॥

अपरयच्र्या वामदेवः इतिवृत्तं वर्णयति। पुत्रभार्यासहितं तं उद्वास्य गरुडः कृतार्थोऽभूत्।

वामदेव उवाच –

सजं॑नं॒ तं द्विजं॑ त्य॒क्त्वा ती॒र्त्वा चा॒ऽऽज्ञां वि॒हङ्ग॑मः॥
इत॑रा॒न्भक्ष॑यित्वै॒व सि॒द्धिं या॒तस्ततो॑ ध्रु॒वम्॥११॥

॥ *पदपाठः* ॥

स० जं॑नं। तं। द्विजं॑। त्य॒क्त्वा। ती॒र्त्वा। च॒। आ॒ज्ञां। वि॒० हंग॑मः। इत॑रान्। भक्ष॑यित्वा। ए॒व। सि॒द्धिं। या॒तः। ततः॑। ध्रु॒वं॥

॥ *भाष्यम्* ॥

सजनं सपरिवारं तं द्विजं कंठात् त्यक्त्वा उद्गीर्य, अपरं च मातुराज्ञाः सर्वास्तीर्त्वा निस्तीर्य। 'निषादानां मध्यगतं ब्राह्मणं कदाचित् मा खादीः' इतीमां मातुराज्ञां अन्याश्च तीर्त्वा। संपाद्य। ततः इतरान् निषादान् भक्षयित्वा। ततः कार्यं गतः। ध्रुवं निश्चितं।

अथोड्डीय स्वर्गलोकद्वारे दैवात् आगतं बृहस्पतिमृषिं दृष्ट्वा तं प्रणम्य कार्यसिद्धिं प्रार्थयामासापरयच्र्या। इति अष्टादशो वर्गः ॥

॥ दशमं सूक्तम् ॥

॥ अथ एकोनविंशो वर्गः ॥

गरुड उवाच –

अहं सुपर्णः पततां वरिष्ठो
मात्राशिष्टः सोमहारश्चरामि।
भौजिष्यमृच्छत्यरुणस्य माता
तन्माऽशिवेनाभि भव द्विजेन्द्र॥१॥

॥ *पदपाठः* ॥

अहं। सु० पर्णः। पततां। वरिष्ठः। मात्रा० शिष्टः[५०]। सोम० हारः। चरामि। भौजिष्यं। ऋच्छति। अरुणस्य। माता। तत्। मा[५१]। अशिवेन। अभि। भव। द्विज०इन्द्र।

॥ *भाष्यम्* ॥

हे बृहस्पते अहं सुपर्णो नाम पततां पक्षिणां वरिष्ठः श्रेष्ठः मात्रा शिष्टः अनुशिष्टः शिक्षितः आज्ञातः सन् चरामि। सोमहारः सोमस्य हरणार्थी। कस्मादित्यत आह अरुणस्य माता विनता भौजिष्यं दासत्वं ऋच्छति प्राप्नोति। तत्तस्मात्कारणात् हे द्विजेन्द्र। ब्राह्मणेश्वर। अशिवेन अकल्याणेन अशुभेन शापाभिचारादिना मा अभिभव। मा पराभव। अर्थात् 'माम्' इत्यध्याह्रियते। मां मा अभिभव। मा पराभव। मम पराभवं मा कार्षीः। भौजिष्यं दासीत्वं। भुजिष्या दासी। भुजिष्यायाः भावः भौजिष्यं। उत्तरया बृहस्पतिः सुपर्णस्याशिषं प्रयुज्य कुशलं पृच्छति।

---

[५०] 'मात्राशिष्टः' इत्युत्तरपदप्रधानस्य तत्पुरुषस्य 'मातृ–आशिष्टः' इत्येवंरूपः पदच्छेदः साधुतरः स्यात्। 'मात्रा० शिष्टः' इत्येवंरूपेऽलुक्समासनिर्माणे किमौचित्यम्?

[५१] 'मा' इत्येतत्पदं 'माम्' इत्यस्मिन्नर्थे त्वनुदात्तम्, परं निषेधार्थे उदात्तम्। अतः 'मा' इत्यस्यानुदात्तत्वं चिन्त्यम्। 'माम् अशिवेन अभिभव' इति सर्वथा प्रसंगविरुद्धमर्थं जनयति। पदपाठमातृकालेखकस्य प्रमादः प्रतीयते। संहितापाठे तु 'मा' निषेधार्थमेव।

बृहस्पतिरुवाच गरुडं प्रति –

अभ्यायुंषा वर्चंसा त्वा वंदामि
कच्चिंद् वस्तात् कुशंलं गृहेषुं॥
कच्चिंद् गरुत्मत्यंरुणस्यं माता
न शौंचति स्पर्शंनं [स्पर्धंनम्[५२]] मानंसं वा॥२॥

॥ *पदपाठः* ॥

अभि। आयुंषा। वर्चंसा। त्वा। वदामि। कत्। चित्। वः।
तात। कुशंलं। गृहेषुं। कत्। चित्। गरुत्मती। अरुणस्यं।
माता। न। शोचति। स्पर्शंनं [स्पर्द्धंनं]। मानंसं। वा॥

॥ *भाष्यम्* ॥

बृहस्पतिराह। हे गरुड। अहं त्वा त्वां अभिवदामि। प्रत्यभिवादनवाक्यं प्रयुंजे। केन। आयुषा वर्चसा च। कोऽर्थः? 'आयुष्मान् भव सौम्यअ'। 'वर्चस्वी च भव'। वर्चस्तेजः। हे तात। पुत्र। कच्चिदिति कोमलामन्त्रणे। भवद्गृहेषु कुशलमस्ति? कच्चित् प्रश्ने। अरुणस्य। माता गरुत्मती पक्षिणी विनता। स्पर्शनं स्पर्शनेन्द्रियं स्वकीयं। मानसं मनश्च न शोचति। तयोरुभयोः शोकं न करोति। स्पर्शनेन्द्रिये पृष्ठे उह्यमानानां सर्पाणां संयोगः दुःखदः। मानसे शत्रूणां चित्तानुवृत्त्या वर्तनं दुःखदम्। शत्रुचित्तानुकूलं आचरणं। अतः स्वस्य स्पर्शनं मानसं वा किं न शोचतीत्युक्तम्।

अथ परस्याः ऋचस्त्रिभिः पादैर्बृहस्पतिः प्रेम्णा वदति। तुरीयपादेन तु गरुडः स्वकार्यमावेदयति। बृहस्पतिरुवाच –

वेदाहमेतत्कुशंलं गृहेषुं
दास्याद् दुःखं वैंदयते सुपर्णी[५३]।

---

[५२] भाष्यकारेणात्र स्वीकृतः पाठः "स्पर्शनम्" किन्तु मूलपाठान्वितेषु हस्तलेखेषु पदपाठेऽपि च 'स्पर्द्धनम्' इत्येव प्राप्यते यत्तु साधीयः प्रतिभाति। वयमत्र भाष्यकारमनुसरामः।

[५३] वेदयते=विज्ञापयति। 'सुपर्णी' इति प्रथमान्तस्य पदस्य स्थाने द्वितीयान्तं 'सुपर्णीम्' इति पदं कदाचिन्मूलपाठे आसीदित्यस्माकमूहा। 'दुःखं सुपर्णीं वेदयते'=वेदनाम् उत्पादयति।

आ मंन्त्रये त्वा पततां वरिष्ठ
पतांम्यहं त्रिंदिवमिन्दुमच्छं॥३॥

॥ *पदपाठः* ॥

वेदं। अहं। एतत्। कुशंलं। गृहेषुं। दास्यात्। दुःऽखं। वेदयते।
सु० पर्णी। आ। मंन्त्रये। त्वा। पततां। वरिष्ठ। पतांमि। अहं।
त्रि० दिवं। इन्दुं। अच्छं॥

॥ *भाष्यम्* ॥

बृहस्पतिराह। हे गरुड। अहं एतद्वेद। जानामि। एतत् किं? सुपर्णी दुःखं वेदयति लभते। ज्ञापयति वा। कस्मात्? दास्यात्। अहं तु स्वर्गे स्वस्थाने सुधर्मायां गंतुकामोऽस्मि। त्वां आमंत्रये। आपृच्छे। अथ चतुर्थपादेन गरुडस्तं प्रत्युवाच –

हे गुरो, अहं त्रिदिवं स्वर्गं प्रति पतामि उत्पतामि। किमर्थं। इन्दुं सोमं अमृतं अच्छ। अभिलक्ष्य। उद्दिश्य। पुनर्बृहस्पतिर्गरुडाय आशिषमाशास्ते।

यज्ञस्यं त्वा रक्षंतु दक्षिंणाश्च
वारं वरीयं पतंतः पूर्वमस्तु ते[५४]।
ऋचो यजूंषि परितः[५५] सुपर्ण
सर्वांस्त्वाऽहोत्रा[५६] अभि चं श्रयन्ताम्॥४॥

॥ *पदपाठः* ॥

यज्ञस्यं। त्वा। रक्षंतु। दक्षिंणाः। च। वारं। वरीयं। पतंतः।
पूर्वं। अस्तु। ते। ऋचंः। यजूंषि। परितः। सु०पर्ण। सर्वाः।
त्वा। अहोत्रा। अभि। च। श्रयन्ताम्।

---

[५४] भाष्यकारेणात्र मूले 'अश्नुते' इति पाठो धृतः किन्तु 'अस्तु ते' इतिरूपेणैव व्याख्यातम्। ग्रूबेमहाशयेन उपयुक्तानां षण्णां मातृकाणां मध्ये मातृकाद्वयमिममपपाठं धारयति।

[५५] एलिमार् ग्रूबे महाशयः 'परितः' इत्यस्य स्थाने पदपाठेन संपुष्टं 'पततः' इति पाठं स्वीकरोति (द्वितीयपादात् पुनरावृत्तम्)। भाष्यकारेणादृतः 'परितः' पाठोऽपि परम्पराप्राप्तः।

[५६] ग्रूबेमहोदयेनात्रोररीकृतः पाठः 'सर्वास्त्वा अहोरात्रा' इति। भाष्यकारः 'अहोत्राः' इति पठति अस्माकं मतुं तु 'हौत्रा' (हौत्रम् इत्यस्य बहुवचनं)=होमयागाः इत्यस्य पक्षेऽस्ति।

॥ *भाष्यम्* ॥

वरीयं वर्यं वरणीयं वरिष्ठं वरणार्हं सोमं। वारं उदकरूपं द्रवरसं प्रति पतन्तं गच्छन्तं त्वा त्वां। यज्ञस्य यज्ञानां समूहः। [तस्य] याः दक्षिणाः, समृद्धिहेतवः, ताः दक्षिणाः त्वा त्वां रक्षंतु। पूर्वमस्तु ते। ते तव कार्यसिद्धिः पूर्वं प्रागेव आदावेव शीघ्रमेवास्तु। हे सुपर्ण, गरुड। ऋचः यजूंषि च त्वां परितः समन्तात् पान्तु। [अथ] च अपरं सर्वाः अहोत्राः (०त्राणि) कर्मविशेषाः त्वा त्वां अभि अभ्येत्य श्रयंतां सेवंताम्।

अथोपक्रमकाले सुपर्णः स्वपितरमिष्टदेवतां स्मरति।

गरुड उवाच –

स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं
महद्भूतं वायसं देवतानाम्।
असुरघ्नमिन्द्रसखं समत्सु
बृहद्यशो नावमिवारुहेम॥५॥

॥ *पदपाठः* ॥

स्वस्ति० अयनं। तार्क्ष्यं। अरिष्ट० नेमिं। महत्० भूतं। वायसं। देवतानां। असुर० घ्नं। इन्द्र० सखं। समत्०सु। बृहत्। यशः। नावंऽइव। आ। रुहेम॥

॥ *भाष्यम्* ॥

स्वस्त्ययनं तार्क्ष्यं। वयं तार्क्ष्यमृषिं कश्यपमस्मत्पितरं स्मृत्वा मनसा प्रणम्य च समत्सु संग्रामेषु बृहत् यशः आरुहेम। किमिव? नावमिव तरणसाधनं। किंलक्षणं तार्क्ष्यं? स्वस्तेः अविनाशस्य अयनं स्थानं प्रापकं अरिष्टनेमिं। न रिष्टः नेमिः मर्यादा शास्त्रमर्यादा यस्य। '*रिष्*' हिंसायां। रिष्टः हिंसितः महद्भूतं महानुभावं देवतानां सुराणां वायसं वयःप्रमाणज्ञं। असुरघ्नं। असुराः कामक्रोधलोभगर्वशोकमोहाः। इन्द्रस्य सखा इन्द्रसखः। यज्ञप्रवर्तकत्वात्।

सुपर्णः अमृतार्थी कार्यसिद्धये इष्टदेवताः स्मरति –

अंहोमुचंमांगिरसं गयं च
स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्।

प्रयंतपाणिः शरणं प्रपंद्ये
स्वस्ति संबाधेष्वभंयं नो अस्तु॥६॥

॥ *पदपाठः* ॥

अंहःऽमुचं। आंगिरसं। गयं। च। स्वस्त्यांत्रेयं। मनंसा। च। ताक्ष्यं। प्रयंतऽपाणिः। शरणं। प्र। पद्ये। स्वस्ति। सं० बाधेषु। अभंयं। नः। अस्तु।

॥ *भाष्यम्* ॥

अहं आंगिरसं अंगिरसो वंशे उत्पन्नं गयं ऋषिं प्लुतेः सूनुं शरणं प्रपद्ये। कीदृशं गयं। अंहोमुचं। अंहांसि पापानि मोचयतीत्यंहोमुक् तं च। अपरं स्वस्त्यात्रेयं नाम अत्रिसूनुं शरणं प्रपद्ये। मनसा चेतसा। ताक्ष्यं पितरं च। प्रयतौ संपुटीकृतौ पाणी यस्य मे। नः संबाधेषु कालेषु नः अभयमस्तु। संपूर्णा बाधा पीडा येषु ते संबाधाः। इति एकोनविंशो वर्गः ॥

॥ अथ विंशो वर्गः ॥

अथ गरुडे अमृतकोशगृहद्वारे आगते सति इन्द्रश्चिन्ताविष्टः गुरुं पृच्छति –

अपिं स्वित्किञ्चिंदिह भूतमस्तिं
भविष्यद्वाऽपिं बृहस्पते।

यन्मे रक्षां निहिंतामतींत्य
वीर्येंण सोमं सहंसा हरेंदितः॥७॥

॥ *पदपाठः* ॥

अपिं। स्वित्। किं। चित्। इह। भूतं। अस्तिं। भविष्यत्। वा। अपिं। बृहस्पते। यत्। मे। रक्षां। नि० हिंतां। अतिं० इत्य। वीर्येणं (वीर्येंण)। सोमं। सहंसा। हरेंत्। इतः॥

॥ *भाष्यम्* ॥

हे गुरो। अपि संभावनायां। स्विदिति प्रश्ने। इत्थं मया संभाव्यते। इह त्रिलोक्यां एतादृशं भूतं प्राणिस्वरूपं किंचिदपि अस्ति। भूतं पुरा जातं न वा? त्वं तु त्रिकालदर्शी। यद्वा। ईदृशं प्राणिवस्तु किमपि भविष्यत्। भविष्यति न वा? यत् प्राणि वीर्येण शक्त्या मे मम सोमं इतः सुरलोकात् हरेत्। हृत्वा प्रयातीति। किं कृत्वा? मे मम रक्षां रक्षणं नानाविधं आवरणं अतीत्य उल्लंघ्य सहसा बलेन।

कीदृशीं रक्षां। मया परितः निहितां स्थापितां प्रयुक्तां। एवमद्भुतं पूर्वं कदापि भूतं जातं, अथवा भविष्यत् कालान्तरे भविष्यति? तद्वद॥

उत्तरया बृहस्पतिरिन्द्रं प्रत्युवाच –

षष्टिं सहस्राणि रजस आचितानां
नवनवतीर्वेद्याः शतानि।

आ हरिष्यसि गरुडो वैनतेयः
प्रसह्य[५७] सोमं निहितो[५८] जिहीरिषुः॥८॥

॥ *पदपाठः*॥

षष्टिं। सहस्राणि। रजसः। आ० चितानां। नव। नवतीः। वेद्याः। शतानि। आ। हरिष्यसि। गरुडः। वैनतेयः। प्र० सह्य। सोमं। नि०हितः। जिहीरिषुः॥

॥ *भाष्यम्* ॥

हे इन्द्र। जिहीर्षुः। हर्तुमिच्छुर्गरुडः विनतासुतः त्वया आचितानां आसमंतात् रोपितानां परितः स्थापितानां, सोमस्य रक्षणार्थं परितः नियुक्तानां रजसः इति, रजसां लोकानां सुरगन्धर्वयक्षरक्षःप्रभृतीनां सोमपालानां षष्टिं सहस्राणि। तथा ९ नव संख्याकाः ९० नवतीश्च, जित्वेतिशेषः। जित्वा गरुडः प्रसह्य बलात्कारेण सोमं आहरिष्यति ग्रहीष्यति। रजस इति व्यत्ययेन बहुवचनार्थे एकवचनं। रजसामिति ज्ञेयम्। *"लोका रजांस्युच्यंत"* इति यास्कः (४.१९)। रजसां लोकानां वेद्याः परितः। आचितानां नियुक्तानां व्यापारितानां। वेदिः अमृतकुंभनिक्षेपणभूमिः। निक्षेपणप्रदेशः। सुधासंगोपनप्रदेशः। तस्याः परितो रक्षणार्थे व्यापारितानां। किंलक्षणं सोमं? निहितं। तत्र आरोपितं। गुप्तं। स्थापितं। जिहीर्षुः इति पदस्य छंदसि रेफे इकारं प्रवेश्य सुखोच्चारणार्थं पृथग्वर्णप्रयोगः। अर्थकाले जिहीर्षुरित्येव। अपरयेंद्रो गुरुं गरुत्मतः संभवं सर्वं पृच्छति। इंद्र उवाच। गुरुं प्रति –

---

[५७] 'प्रसह्य' इत्यस्य पदपाठे भाष्ये च सम्मानितस्य पदस्य स्थाने ग्रूबे 'प्रासहा' पठति। द्वयोरपि पदयोरर्थः प्रायः एक एव (बलात्)। किन्तु 'प्रासहा' प्राचीनतरम्, ऋग्वेदादिषु समादृतम् पदम्। अन्यच्च, अस्माकं पदपाठमातृका 'प्रसह्य'-पदे यदुदात्तद्वयं प्रदर्शयति (प्र०सह्य) तदशुद्धम्। अस्माभिस्तच्छोधितम्।

[५८] ग्रूबेमहाशयेनात्र स्वीकृतः, पदपाठेनापि समर्थितः, पाठः 'निहितः' इति, यस्तु भाष्यकारेण संशोध्य 'निहितम्' इतिवत् पठितः।

कुतः स्विज्जातः कस्मात्ल्लोकात्कतरस्याः पृथिव्याः।
भौवनं यो युयुत्सति धनुर्ग्राहमनुत्तमम्॥९॥

॥ *पदपाठः* ॥

कुतः। स्वित्। जातः। कस्मात्। लोकात्। कतरस्याः। पृथिव्याः।
भौवनं। यः। युयुत्सति धनुःऽग्राहं। अनुत्तमम्।

॥ *भाष्यम्* ॥

हे बृहस्पते। कुतः कस्मात् जनकाज्जातः। कस्यां वा मातरि। स्विदिति प्रश्ने। कस्मात् लोकात् आगतोऽत्र? किं भूर्लोकाद्वा, उत भुवर्लोकात्। आहोस्वित् स्वर्लोकात्? यद्वा महर्लोकादिभ्य इत ऊर्ध्वं लोकेभ्यः प्रकारान्तरेणार्थः। किं मनुष्याणां लोकात् ज्ञातिमध्यात्। उत यक्षाणां किं वा गन्धर्वाणाम्, आहोस्वित् सिद्धानां यद्वा नागानां अथवा उत रक्षसां असुराणां वा। तथा पृथिव्यां बहुविधाः संति पृथिव्यो भूमयः। मेरुपृष्ठभूमिः। हिमभूमिः। दृषद्भूमिः। मृद्भूमिः। ज्योतिर्भूमिः। अंधकारभूमिः। हेमभूमिः। रत्नभूमिः। सिकतामयी भूमिः। आदर्शतलसंनिभा भूमिः। जन्तुमती भूमिः। निर्जन्तुर्भूमिः। इत्येवमादयो बह्व्यो भूमयः नानारूपाः संति, तासां मध्ये कतरस्याः भूमेः सकाशादसाविहागतः। असौ कः। यः पुरुषः भौवनं मदीयतया सुधारक्षणे नियुक्तं विश्वकर्माणं युयुत्सति योद्धुमिच्छति। किंलक्षणं भौवनं विश्वकर्माणं। धनुर्ग्राहं। धनुर्धरं। कीदृशं। अनुत्तमम्। न विद्यते उत्तम उत्कृष्टतमोऽन्यः कोऽपि यस्मात् असौ अनुत्तमं तम्।

उत्तरया मघवानं प्रति गुरुरुत्तरमाह।

गुरुरुवाचेन्द्रं प्रति –

सुपर्णी विनंता नाम तपोऽतप्यत दुष्टरम्।
तस्यां जातो गरुडो वैनतेयो
यश्च सोमं हर्त्ता शकुनिस्तस्यं विद्धि॥१०॥

॥ *पदपाठः* ॥

सु०पर्णी। वि०नंता। नामं। तपः। अतप्यत। दुःऽतरं। तस्यां।
जातः। गरुडः। वैनतेयः। यः। च। सोमं। हर्त्ता। शकुनिः।
तस्यं। विद्धि॥

॥ *भाष्यम्* ॥

[दुष्टरमित्यस्य स्थाने] दुस्तपमिति वा पाठः[५९]। हे इन्द्र तस्य स्वरूपं विद्धि जानीहि। यः सोमं हर्त्ता। सा विनता नाम सुपर्णी पक्षिणी। शोभनानि पर्णानि पिच्छानि यस्याः सा सुपर्णी। सा दुस्तरं तपः अतप्यत। तप्यते स्म। तेपे। [अथवा] दुःखेन तप्यते इति दुस्तपं। सा का? यस्यां गरुडो जातः। स च वैनतेय इति ख्यातः। इति विंशतितमो वर्गः॥

---

[५९] 'दुश्चरम्' इति साधुतरं स्यात् (सं०)।

॥ एकादशं सूक्तम् ॥

॥ अथ एकविंशो वर्गः ॥

इन्द्र उवाच –

अहं स्विदिन्द्रं उत वैनतेयः
कतरः शुश्राव भुवनानीच्छन्।
इन्दुं पराञ्च्यं निहितं विचक्षणं
ममेत्तु सोमं सहसा हरेद्यत्॥१॥

॥ *पदपाठः* ॥

अहं। स्वित्। इन्द्रः। उत। वैनतेयः। कतरः। शुश्राव। भुवनानि।
इच्छन्। इंदुं। पराञ्च्यं। नि० हितं। वि०चक्षणं। मम। इत्। तु।
सोमं। सहसा। हरेत्। यत्।

॥ *भाष्यम्* ॥

हे बृहस्पते। स्विदिति वितर्के प्रश्ने। किं अहं वा इन्द्रः ऐन्द्रपदस्य स्वामी। अधिष्ठाता परमेश्वरः। *'इदि'* परमैश्वर्ये। सर्वेषां देवानां राजा। हे गुरो, उत अथवा। वैनतेयः इन्द्रः, ऐन्द्रपदस्य स्वामी, अधिष्ठाता, स्वर्गस्य राज्यस्य भोक्ता? ऐन्द्रपदाधिष्ठाता सुराणां प्रभुः। अनयोरुभयोर्मद्वैनतेययोर्मध्ये कः इन्द्रः। इन्द्रत्वं कः प्राप्तः। अहं वा इन्द्रः। उत वैनतयो गरुडो वा इन्द्रः। यः इन्द्रो भवति तं कथय। किं कुर्वन् सन् इन्द्रो भवति। किं कुर्वन् सन् अहमिन्द्रो भवामि। उत किं कुर्वन् सन् वैनतेयो गरुडः इन्द्रो भवति। भुवनानि त्रीणि स्वर्गमर्त्यलोकपातालाख्यानि इच्छन्। तेषां त्रयाणां भुवनानामाधिपत्यं इच्छन् सन् इन्द्रो भवति। अनयोर्मद्गरुडयोर्मध्ये कतरः इति कः इन्दुं सोमं शुश्राव। अमृतं अज्ञासीत्। अत्र श्रवणं नाम ज्ञानं, सोमं ज्ञातवान्। सोमस्य संगोपितस्य स्थानं निक्षेपप्रदेशं कः ज्ञातवान्। अहं वा वैनतेयो वा तद्बूहि। किं लक्षणं इन्दुं सोमं? परांचं निहितं। पराङ्मुखं निक्षिप्तं। संगोपितं। पराङ्मुखमिति कोऽर्थः। अतीव

अप्रसिद्धे स्थले दुर्विज्ञाने निहितमित्यर्थः। किंलक्षणं इंदुं? विचक्षणं प्रवीणं। जरामरणनिवारणदक्षं। तत् कुतः इत्थं अभूतकल्पना। एवमसंभाव्यसंभावना किमिति विधीयते। अयुक्तं कथमुद्भाव्यते। तत्राह। यत् यस्मात् कारणात्। मम इत् ममैव सोमं, मदीयां सुधां, असौ सहसा प्रसह्य बलेन हरेत्। अतो दुःसहनिर्वेदबलाद्यत्किंचिद्ब्रवीमि। इत्याशयः। सुपुरोधाः शचीपतिं प्रत्युत्तरयति।

गुरुरुवाच इन्द्रं प्रति –

तवेन्द्र जातमुत यज्जनिष्यत्
तवेन्द्र भूतमुत यद् भविष्यत्।
तव दिशः प्रदिश उद्दिशो बृहत्
तवाऽशिषा प्रशिषा सर्वमुच्यते॥२॥

॥ *पदपाठः* ॥

तव। इन्द्र। जातं। उत। यत्। जनिष्यत्। तव। इंद्र। भूतं। उत।
यत्। भविष्यत्। तव। दिशः। प्र० दिशः। उत्० दिशः।
बृहत्। तव। आ० शिषा। प्र० शिषा। सर्वं। उच्यते।

॥ *भाष्यम्* ॥

हे इन्द्र। यत् जगत् जातं इतोऽर्वागुत्पन्नं उत अपि च यद्वर्तमानं प्राणिजातं यच्च भविष्यत्। कालान्तरे जनिष्यते। उत्पत्स्यते। तत् सर्वं त्रैकालिकं प्राणिजातं देवतिर्यङ्नरादिकं तवैव उपजीवकं। त्वमेवोपजीवति त्वामेव श्रयते। सेवते। त्वं हि तस्य सर्वस्य प्रभुरधिपः। तथा यत् प्राणहीनं वस्तु। सौधविमानगृहनदीवृक्ष-पर्वतपंचमहाभूतादिकं तदपि तवैव त्वदीयमेव। तस्यापि त्वमेवेशः। किंलक्षणं प्राणं? क्षित्यादिकं। भूतं प्राचीनकाले निष्पन्नं। तथा उत, भवत् अधुनापि निःपाद्यमानं। यत् भविष्यत् आयत्यां भविष्यति। तदेव विस्तारयति। दिशः प्राच्यादयः चतस्रः तव। प्रदिशः। आग्नेयीप्रमुख्यः ईशानांताः चतस्रः तवैव। तथा प्रदिशः। पातालप्रभृतयः तथा दिग्विदिशोरंतरा वर्तमानाः। तव। उद्दिशः। ऊर्ध्वस्थाः लोकाः ताः उद्दिशोऽपि तव। तासां त्वं स्वामी। यत्किंचित् बृहत् महाप्रमाणं व्यापकं तदपि च। तवैव या आशीः शुभचिन्तनं। तया सर्वं जगत् कृतार्थं उच्यते। तथा तव या प्रशीः। तया प्रशिषा त्वदीयया सर्वं कृतार्थं उच्यते। प्रार्थ्यमानात् प्राप्तं वरदानवाक्यमाशीः। अप्रार्थ्यमानाल्लब्धं वरदानवचः प्रशीः, इति इयान् भेदः। तया प्रशिषा सर्वं वस्तु इष्टं मनोरथगोचरं लभ्यते। कृतार्थं चोच्यते॥

अथापरया विनतोड्डीय सूर्यमण्डलपर्यन्तं गत्वा तत्रार्करथस्थं स्वज्येष्ठपुत्रमरुणं प्रति व्याकुलांतःकरणत्वाद्युक्तायुक्तविवेकशून्या सत्येवमाह। विनतोवाचारुणं प्रति –

महान्घोषं उपरिं श्रूयतेऽसौ
कथं पुत्र भ्रातरं नाऽभिधावसि॥
एकः सुपर्णो बहवश्च देवा
नह्येनमेकः प्र सहेत शक्रः॥३॥

॥ *पदपाठः* ॥

महान्। घोषः। उपरिं। श्रूयते। असौ। कथं। पुत्र। भ्रातरं। न।
अभि। धावसि। एकः। सु०पर्णः। बहवः। च। देवाः। नहि।
एनं। एकः। प्र। सहेत। शक्रः।

॥ *भाष्यम्* ॥

विनतोवाचारुणं प्रति –

हे पुत्र अरुण उपर्युपरि अन्तरिक्षे अत्यूर्ध्वं स्थिते। स्वर्लोकेऽसौ महान् प्रबलो घोषः कोलाहलः श्रूयते। युद्ध्यमानानां वीराणां परुषो ध्वनिः। तथापि हे पुत्र अरुण त्वं भ्रातरं गरुडं परैरनेकैरेकमेवाभिभूयमानं जानन्नपि कथं नाभिधावसि। अभिलक्ष्य किं न धावसि साहायिकं विधातुं। सुपर्णः खल्वेक एव। सुधारक्षकाः देवास्तु बहवः, [अ]परिसंख्येयाः मिलिताः। यदि शक्र एक एव भवेत् असहायः। तर्हि एनं सुपर्णं न सहेत। अस्य पराक्रमं सोढुं न शक्नुयात्। परंतु तथा नास्ति। अतो गरुडः पराभूयते। तं गरुडं पराभूतं जानन् त्वं, हे अरुण, कथं अभिलक्ष्य न धावसि॥

इत्थमत्याकुलमनस्का पंगोर्गतौ सामर्थ्यं नास्तीति विवेकशून्यत्वादरुणमुपालम्भनेन धिक्करोति। अपरया सूर्यसारथिर्योद्धुमशक्नुवान आत्मानं गर्हयन् परितप्तहृदयो मातरं बोधयन्नाह।

अरुण उवाच मातरं प्रति –

अभ्राता भ्रात्रा गरुडोऽरुणेना-
पुत्रा शुंगा विनता सुपर्णी।

न॒हि मा॑तररु॒णो या॑ति नू॒नं
गच्छं॑ स्व॒यं त्रि॑दि॒वं सो॑महा॒रः॥४॥

॥ *पदपाठः* ॥

अ॒भ्रा॒ता। भ्रात्रा॑। ग॒रु॒डः अ॒रु॒णेन॑। अ॒पु॒त्रा। शु॒ंगा। वि०न॑ता।
सु०प॒र्णी। न॒हि। मा॒तः॒। अ॒रु॒णः। या॒ति॒। नू॒नं। गच्छ॑। स्व॒यं।
त्रि॒०दि॒वं। सो॒म॒० हा॒रः॥

॥ *भाष्यम्* ॥

अरुणः कथयति। हे मातः विनते। गरुडः अरुणेन मया भ्रात्रा अभ्रातैव। नास्ति भ्राता अस्येति अभ्राता। अरुणेन पुत्रेण मया भवती शुंगाख्या विनतापरपर्याया खल्वपुत्रैव। नूनं निश्चितं। हे मातः अरुणः अयं मल्लक्षणः कदाचिन्नहि याति। हे विनते, सुपर्णं इति उपदिश 'हे सुपर्ण, त्वं स्वयं गच्छ स्वर्लोकं सुधामाहर्तुं। अरुणविषयामाशां मा कृथाः'। किं भूतस्त्वं। सोमहारः। सोमस्य हर्ता।

इत्येकविंशोवर्गः ॥

॥ अथ द्वाविंशो वर्गः ॥

अपा॑द् भौ॒वनो॒ न॒ हि शं ब॒ट् क॑रो-
त्यति॑हा त्वा॒सौ नह॑सः प्र मा॑द्यते।
अ॒न्धो जागृ॑वि॒र्नह॑सः प्र मा॑द्यते
क॒थं सु॑प॒र्णो ग॑रु॒डोऽति॑मोक्षते॥५॥

॥ *पदपाठः* ॥

अपा॑त्। भौ॒वनः॑। न॒। हि। शं। बट्। क॒रो॒ति॒। अति॑० हा।
त्वा॒। अ॒सौ। नह॑सः। प्र। मा॒द्य॒ते॒। अ॒ंधः॑। जागृ॑विः। नह॑सः। प्र।
मा॒द्य॒ते॒। क॒थं। सु० प॒र्णः॑। ग॒रु॒डः॑। अति॑० मो॒क्ष॒ते॒॥

॥ *भाष्यम्* ॥

अरुण उवाच मातरं प्रति –

हे मातः। इन्द्रेण सुधारक्षणे नियुक्तो भौवनो विश्वकर्माख्यो देवः गरुडे गते सति, बट् इति सत्ये, शं सुखं न करोति। भविष्यदर्थे वर्तमानार्थलकारः। करिष्यति। अर्थात् स्वस्य आत्मनः सुखकृत् न भविष्यति। संग्रामे न विजेष्यतीत्याकूतं। संग्राममेव न करिष्यति। किंलक्षणो भौवनः। अपात् पादहीनः पंगुः। स तु

शिबिकारुढः उह्यते। तथाऽपरो नहसनामादेवोपीन्द्रेण सुधायां नियुक्तोस्ति। असौ नहसः। एतत्संज्ञो देवः। अति इति अतीत्य संग्रामांगणं अतिक्रम्य उल्लंघ्य हात्वा त्यक्त्वा च युद्धं हात्वा परित्यज्य च। अथवा सत्त्वं त्यक्त्वा यद्वा धैर्यं विहाय अपि वा लज्जां हात्वा हित्वा। युद्धप्रदेशात् पलायनं कृत्वा। प्रभुणा आज्ञाते कार्ये सुधात्राणे प्रमाद्यत एव प्रमादमेव करिष्यति। तत्कार्यं न साधयिष्यति। किंच असौ नहससंज्ञको देवः गरुडस्य तेजसा दग्धचक्षुः सन् अन्धो भविष्यति। तथा अजागृविर्भविष्यति। जागृविर्जागरूकः गतनिद्रः। न जागृविः। अजागृविः एवंविधः कार्यसाधने निद्रालुः। अलसः। नहसः। एतन्नामा देवः प्रकर्षेण माद्यत एव। कार्यं कर्तुं प्रमत्त इव भविष्यति। इत्थमेतदादयः सर्वेऽपि योद्धारः युद्धं त्यक्त्वा पलायिष्यंते परंतु गरुडः संग्रामं कथं मोक्षते। कथं मोक्ष्यति। 'मुच्लृ' मोक्षणे। कथं त्यक्ष्यति। न त्यक्ष्यति। संग्रामविमोचनं न करिष्यति। कीदृशः गरुडः सुपर्णः शोभनपतनः। पतनं गमनं। शोभनगमनः। सुपक्षो वा। अति युद्धप्रदेशमतिक्रम्य कथं धैर्यं मोक्ष्यति॥ अरुणं उवाच मातरं प्रति –

ओजॅव॒ सहॅव॒ नभॅव॒[६०]
बलंमिव॒ाभ्रमिं॑व॒ भीरिं॑व।
म॒हद् बलंमप्रतिधृ॒ष्यमे॒तद्
ग॒रुत्मं॑त्युप॒मा नास्तिं शुंगे॥६॥

॥ *पदपाठः* ॥

ओजः॑ऽइव। सहः॑ऽइव। नभः॑ऽइव। बलं॑ऽइव। अ॒भ्रंऽइं॑व। भीः॑ऽइं॑व। म॒हत्। बलं॑। अ॒प्र॒ति॰ धृ॒ष्यं। ए॒तत्। ग॒रुत्मं॑ति। उ॒प॰ मा। न। अस्तिं॑। शुंगे॒।

॥ *भाष्यम्* ॥

हे शुंगे, गरुत्मति सुपर्णे एतत्प्रत्यक्षं बलं शौर्यं महत् वर्तते। अप्रमेयं। कीदृशं बलं। अप्रतिधृष्यं। न वर्तते प्रतिधर्षको यस्य तत् अप्रतिधृष्यं। धर्षणं पराभवः। धर्षकः अभिभविता। पराभवकर्ता। यद्वा एवं व्युत्पत्तिः। न प्रतिधर्षितुं अभिभवितुं शक्यं अप्रतिधृष्यं। किमिव अप्रतिधृष्यं अनाधृष्यं बलम्? ओज इव ओजस्तेजः। पुनः किमिव। सहो धैर्यं हृदयबलं, तदिव अप्रतिधृष्यं। पुनः किमिव। नभः आकाशं(:) तदिव। पुनः किमिव। बलमिव। बलं सैन्यं। यथा

---

[६०] आर्षं सन्धेर्द्विस्त्वम् (नभस् इव, नभः इव, नभ इव, नभेव)। 'ओज इव' इत्यस्य स्थाने पदपाठमातृका 'रुजःऽइव' इति पठति।

गजाश्वरथपदातिव्याप्तं चतुरंगसैन्यमप्रतिधृष्यं भवति। तद्वदेकस्यापि गरुडस्य बलं सामर्थ्यं अप्रतिधृष्यं। दुःसहं। किं बहुनोक्तेन। हे शुंगे विनते अस्य गरुडस्य काचिदप्युपमानास्ति। एतादृशः कोऽपि नास्त्येव।

अरुण उवाच जननीं प्रति –

वातोऽस्य प्राणान्मरुतोऽस्य पक्षा-
वग्निः शिरो रक्षतु जातवेदाः।

अहं पुरस्तादहमस्मि पश्चाच्-
चन्द्रो ललामं गरुडस्य पृष्ठे॥७॥

॥ *पदपाठः* ॥

वातः। अस्य। प्राणान्। मरुतः। अस्य। पक्षौ। अग्निः। शिरः। रक्षतु। जात० वेदाः। अहं। पुरस्तात्। अहं। अस्मि। पश्चात्। चन्द्रः। ललामं। गरुडस्य। पृष्ठे।

॥ *भाष्यम्* ॥

हे मातः। मया पूर्वं "अभ्राता भ्रात्रा गरुडोऽरुणेने"त्येतस्यामृचि तुर्यपादे त्वां प्रति एवमुक्तम्। हे विनते। त्वं तत्र गत्वा गरुडं इत्थमादिश। हे गरुड। अरुणः खलु पंगुत्वादागन्तुं न शक्नोति साहायिकं ते कर्तुं, ततस्त्वमेव स्वयमेकाकी त्रिदिवं स्वर्गं गच्छ, कीदृशस्त्वं? सोमहारः सोमाहरणकर्ता सोममाहर्तुमित्यर्थः। इत्येवं मया अरुणेन हे मातः चतुर्थपादे त्वन्मुखेन गरुडं प्रति ख्यापितं। चतुर्थः पादः "गच्छ स्वयं त्रिदिवं सोमहार" इति। तस्मादहं गमनाशक्तोप्यस्मै अरुणाय (गरुडाय?) इत्थमाशिषमाशास्ते (आशासे)। आशीर्वादं प्रयुंजे। वातोऽस्य प्राणान्मरुतोस्य पक्षावित्यृचा॥ अस्याश्चायमर्थः। वातो वायुः अस्य गरुडस्य प्राणान् रक्षतु त्रायतां। मरुतः एकोनपंचाशत् साकं जनित्वात् समा(न)वयसो ज्यैष्ठ्यकानिष्ठ्यवर्जिताः इतरेतरं भ्रातरो देवविशेषाः इन्द्रानुचराः अस्य पक्षौ द्वावपि रक्षंतु त्रायन्ताम्। अग्निः शिरः। अहं तु पुरस्तादस्मि। सूर्यरथस्य गत्या कदाचित् पूर्वभागे वर्तमानः सुदृष्ट्या अस्य कुशलचिंतकोऽस्मि। तथा पश्चादस्मि। कदाचिदादित्यरथगत्या पश्चिमभागे वर्तमानः सन् कुशलं वांछिष्यामि। किंच। गरुडस्य पृष्ठे चन्द्रो ललाम। ऊर्ध्वं खे गतो [गतस्य] गरुडस्य पृष्ठोपरि चन्द्रमंडलं पृष्ठवंशे ललामवद्रत्नमिव लांछनं भविष्यति। लोकैर्लांछनमिव द्रक्ष्यते। इदमत्राकूतम्। चन्द्रमाः पृष्ठोपरि स्थितोऽस्य त्राणं करिष्यति। तर्हि एकाकिनोऽपि किं भयम्। इतः परं 'इदं देवानामभिघाति वज्र'मित्येतस्याः प्राक् इन्द्रबृहस्पतिसंवादः।

अपरयेन्द्रः खे गरुडेन सार्द्धममृतपालकानां युद्धे प्रारब्धे तत्कोलाहलं शृण्वन् गुरुं पृच्छति।

(*इतस्ततो निहितेषु विखण्डितेषु त्रिषु पत्रार्धेषु विकीर्णः संपादकेन यथाकथञ्चित् संस्कारितः पाठः*)।

इन्द्र उवाच गुरुं प्रति –

किन्नु घोषः श्रूयते यत्र सोमो
बृहस्पते हन्त वेदावं गत्वा।

ज्या ह शिङ्क्ते[61] यदाऽवसृष्टा
रोरूयते वधिरः[62] सोमपालः॥८॥

॥ *पदपाठः* ॥

किं। नु। घोषः। श्रूयते। यत्र। सोमः। बृहस्पते। हंत। वेद। अव। गत्वा। ज्या। ह। शिङ्क्ते। यदा। अव०सृष्टा। रोरूयते। वधिरः[62]। सोम०पालः॥

॥ *भाष्यम्* ॥

नु इति प्रश्ने वितर्के वा। हे बृहस्पते। हन्तेदानीं तत्र प्रदेशे उत्पन्नो घोषो युद्धप्रयुक्तः कोलाहलः श्रूयते। तत् किं कारणं। तत्र कुत्र? यत्र सोमः सुधास्ति। एतत्कारणं भवान् किं वेद जानाति नो वा? हेति प्रसिद्धौ। यदा ज्या मौर्वी अवसृष्टा विसृष्टा सती आकर्णान्तमाकृष्य सहसा विमुक्ता सती कस्यापि शिङ्क्ते शब्दायते। टंकाररवं जनयति। तदा सोमपालः वधिरः कलकलस्वनेनाति-परुषेणाभिभूतश्रोत्रः सन् रोरूयते। रोरवणं कुरुते। प्रबलं ध्वनिं मुंचति। एतत्कारणं सम्यक् नावबुद्ध्यते। अ[व] अवेहि जानीहि। उपसर्गबलाद् धातोरध्याहारः। यद्वा अवेत्ययं नोपसर्गः। किन्तु अवरं अधस्तात् सूचयति। अवगत्वा इन्द्रस्य सर्वोच्चस्वर्गाद् अधो गत्वा। (*संस्कारितम्*)।

[बृहस्पतिरु]वाचेन्द्र प्रति –

---

[61] सर्वत्रैव मातृकासु 'शिङ्ते' इत्येव पाठः। एतदेव ग्रूबेमहोदयेनापि स्वीकृतम्। किन्तु 'शिञ्ज्'-धातोर्निष्पन्नस्यैतस्य क्रियापदस्य 'शिङ्क्ते' इत्येव रूपं भवितव्यम्।

[62] उभयत्र (मूले पदपाठे च) 'बधिरः' इति पाठः किन्तु 'वध्' धातोर्निष्पन्नस्यैतत्पदस्य वकारादित्वमेव शस्तम्।

अहमेतं मंघवन् वेद घोषं
सुपर्णस्यैष पततः शचीपते।
वैनतेयो हरति यस्य सोमं
निहत्य तवं सोमपालान् गरुत्मान्॥९॥

॥ *पदपाठः* ॥

अहं। एतं। मघ०वन्। वेद। घोषं। सु०पर्णस्य। एषः। पततः।
शचीं०पते॥ वैनतेयः। हरति। यस्य। सोमं। नि०हत्य। तव।
सोम०पालान्। गरुत्मान्॥

(*पाठभ्रंशः*) मघवन्। एषः अहं सुपर्णस्य एतद्घोषं वे[द] वेद्मि। किंलक्षणस्य सुपर्णस्य? पततः। पततीति पततः। दूरादागच्छतः। तस्य कस्य, तव। यस्य तव सोमं [हर]ति। लोकपालान् अग्न्यादीन् निहत्य नितरां हत्वा।

"[हे मघवन् इन्द्र] अहम् एतं घोषं [शब्दं] वे[द] वेद्मि। एष घोषः पततः सुधाकलशं प्रत्याकाशादधो निपततः सुपर्णस्य शोभनपर्णस्य गरुडस्यास्ति, शच्या एतन्नाम्न्याः इन्द्रपत्न्याः पतिर्भर्ता, तत्संबुद्धौ। यस्य तव सोमं, विनतापुत्रो वैनतेयो गरुत्मान् इदानीम् त्वया नियुक्तान् अग्न्यादीन् लोकपालान् निहत्य नितरां हत्वा हरति अपनयति। सोमः सपद्येव ह्रियमाण अस्तीत्याशयः॥" (*संपादकः*) इति द्वाविंशो वर्गः॥

॥ द्वादशं सूक्तम् ॥

॥ अथ त्रयोविंशः वर्गः ॥

अपा॑द्भौवनः क्षिप्रध॑न्वा क्वा॑सी-
द्यस्याग्निं बाण॑मुखं ति॒र॒श्चता॑।
यस्य॑ बा॒हुभ्या॑ वीय॑ते साय॑को वृषा॑[६३]
त्रिंश॑त्स्त॑ब॒न्यान्ययु॑तानि ष॒ष्टिम्॥१॥

॥ *पदपाठः* ॥

अपा॑त्। भौव॑नः। क्षिप्र० ध॑न्वा। क्व॑। आ॒सी॒त्। यस्य॑। अ॒ग्निं।
बाण॑०मुखं। ति॒र॒श्चता॑। यस्य॑। बा॒हुभ्या॑। वि० ईय॑ते। साय॑कः।
वृषा॑। त्रिंश॑त्। स्त॒ब॒न्या॑नि[६४]। अयु॑तानि। ष॒ष्टिम्॥

॥ *भाष्यम्* ॥

इन्द्रो गुरुं प्रति वद[ति] . . . [असौ] भौवनः विश्वकर्मा तस्मिन् काले अमृतहरणकाले। (*पाठभ्रंशः*)

कीदृक् भौवनः अपात् पंगुः। पुनः कीद्क्। क्षिप्रं वेगवत्तरं धनुषा बाणान् मुञ्चतीति क्षिप्रधन्वा। एतेन बाणानां लघुगतित्वं सूच्यते। अ . . . न प्रवर्त्तमानं। तिरश्चता पार्श्वान्निर्गमा . . .मकौ। तिर्यग्गत्या प्रवर्तमानं कोऽपि . . . अग्निमयं। अग्निस्वरूपं। प्रज्व[लता] अग्निना व्याप्तं। पुनरसौ कः। यस्य भौवन[: षष्टिं]त्रिंशच्च शत्रूणामयुतानि वीयते। . . . विविधं ९० नवति [त्रिंशत्+ षष्टिं] रिपूणामयुतानि व्याप्नोति। वि . . . बाणोऽपि तावत्संख्याको भूत्वा इत्यर्थः। यद्वा जात्यभि . . .॥ (*खण्डितम्*)

---

[६३] 'सायकोऽवृथा' इति साधीयान् पाठः। प्राचीनेषु नागराक्षरेषु थकारषकारयोः साम्यत्वाद् भ्रमः।

[६४] मूले पदपाठे च 'स्तवन्यानि' इति पाठः।

"[मया सोमरक्षणे नियुक्तः पादहीनः (अतः सर्वदा तत्रैवावस्थितः) स वृषा, बाणानां वर्षयिता, भौवनः कुत्रासीत्, क्षिप्रधन्वनस्तीव्रगत्या बाणान् क्षेप्तुं समर्थस्य यस्य, तिरश्चीनतया वामदक्षिणपार्श्वयोर्निमुक्ताः ('अवृथा' इति पाठे अमोघाः) अग्निमुखा अग्निमुद्गिरन्तः सायकाः रिपूणां षष्टि-त्रिंशच्च अयुतानि स्तबन्यानि स्तबकानि(न्) संकुलकानि समूहान् वा, एकपद एव, समकालमेव विद्धयन्ति व्याप्नुवन्ति वा? इत्याशयो मन्त्रस्य।]" (*सम्पादकः*)

अपादं वै भीषयमाणः सुपर्णः
क्षिप्रधन्वा चरति क्षिप्रेण शूरः।

नैनं चरन्तं परि बाण आंस
आ यत्सोमं यदार्चद्[६५] दिव्युत्तमायाम्॥२॥

॥ *पदपाठः* ॥

अपादं। वै। भीषयमाणः। सु० पर्णः। क्षिप्र० धन्वा। चरति। क्षिप्रेण। शूरः। न। एनं। चरन्तं। परि। बाणः। आस। आ। यत्। सोमं। यत्। आर्चत्। दिवि। उत्० तमायां॥

॥ *भाष्यम्* ॥

"[सुपर्णः अपादं भौवननामानं सोमपालं भीषयमाणं भयाक्रान्तं कुर्वन् सोममर्चयन् तं प्रदक्षिणीकृत्य परिभ्राम्यति। यदा क्षिप्रधन्वा शूरश्च स भौवनः तमभिलक्ष्य क्षिप्रं बाणममुञ्चत् तदा नैरन्तर्येण भ्रमणकारणात् तं सुपर्णं बाणो नैवाविध्यत्। एवम् उत्तमायां दिवि, दिवः सर्वोच्चे स्थाने स्थितं सोमं स आर्चत् पूजयामास यदि वा आर्च्छत् अपजहार॥]" (*सं०*)

क्वाऽर्बुदो नहुषः कार्द्रवेय
उलूको बल्बूलः श्वसनः क्वासीत्।

सपत्निमिषः[६६] प्रलिशः क्वासी-
द्यन्म इन्दुं हरति वैनतेयः॥३॥

---

[६५] अत्र 'आर्छत्' (आर्च्छत्)=अपजहार, इति मूलपाठस्य विकृतिः संभाव्यते।

[६६] 'स्वपन्ननिमिषः' इति साधीयान् पाठः।

॥ *पदपाठः* ॥

क्व॑। अ॒र्बु॒दः। न॒हु॒षः। का॒द्र॒वे॒यः। उ॒लू॒कः। ब॒ल्बू॒लः। श्वस॑नः।
क्व॑। आ॒सी॒त्। स॒प॒त्० नि॒मि॒षः। प्र० लि॑शः। क्व॑। आ॒सी॒त्।
यत्। मे॒। इन्दु॑ं हर॑ति। वै॒ने॒ते॒यः।

॥ *भाष्यम्* ॥

"[इन्द्रो बृहस्पतिं पृच्छति यत् तेन सोमरक्षणार्थं बहवः सर्पाः नियुक्ताः, तेषां नामानि परिगणयन् स जिज्ञासते यत् अर्बुद-नहुष-काद्रवेय-उलूक-बल्बूल-श्वसननामानः सर्पाः, अथ च अनिमिषं स्वपन्, चक्षुषी उन्मील्य निर्णिमेषं स्वपन् प्रलिशो नामाजगर एते सर्वे तस्मिन् समये कुत्रासन्, कथं च स्वं नियोगं नैवापालयन् यत् मया रक्षितं तदमृतभूतं सोममेष पक्षिराट् सुपर्णो बलाद् हरति।]" (*सं०*)

कक्कुब्भ॒ण्डश्च॒क्रतु॑ण्डु॒ः क्वा॑सी-
दश्वमु॒खः कु॒ण्डक॑र्णः क्वा॑सीत्॥

विक्रोश॑नः ख॒रक॑ण्ठ॒ः क्वा॑सीद्
यन्म॒ इन्दु॑ं हर॑ति वैनते॒यः॥४॥

॥ *पदपाठः* ॥

क॒कुप्० भ॒ण्डः। च॒क्र० तु॑ण्डः। क्व॑। आ॒सी॒त्। अ॒श्व॒०मु॒खः।
कु॒ण्ड०क॑र्णः। क्व॑। आ॒सी॒त्। वि॒० क्रोश॑नः। ख॒र० क॑ण्ठः।
क्व॑। आ॒सी॒त्॥

॥ *भाष्यम्* ॥

"[अन्येऽस्मिन् पद्ये नामोल्लेखपूर्वकं वर्णिताः ते रक्षकाः क्व, अथ च किं कुर्वाणाः आसन् यत् सुपर्णो गरुत्मान् मदीयं सोमं हरति?]" (*सं०*)

कशम्बूको वैणुको अश्वक्रन्दो-
ऽलग॒र्द्धः पर॑ुष॒ः क्वा॑सीत्।

न॒भोरू॒पसं॑रू॒पौ क्वा॑स्तां
यन्म॒ इन्दु॑ं हर॑ति वैनते॒यः॥५॥

॥ *पदपाठः* ॥

क॒शं॒बू॒कः। वे॒णु॒कः। अश्व॑ं०क्रन्दः। अ॒ल॒०ग॒र्द्दः। पुरु॑षः। क्व॑। आ॒सी॒त्। न॒भो॒रू॒प० सं॑रू॒पौ। क्व॑। आ॒स्ता॒म्॥

॥ *भाष्यम्* ॥

"[कशम्बूकादयोऽनुचराः सप्त इन्द्रेण सोमरक्षणे नियुक्ताः कथं स्वं नियोगं सम्यक्तया नानुतिष्ठितवन्तः येन वैनतेयः सोममिदानीं मे अपहरन्नास्ते इति इन्द्रस्य प्रश्नो बृहस्पतिं प्रति।]" (*सं०*)

उ॒प॒तीरं वर्त॑मानः शशा॒क्षः
क्रो॒धेन॑ म॒र्तो[६७] अज॑नस्य क॒र्ता।
व्या॒दा॒य॒-स्वा॒पी विभि॑दुः क्वा॑सी॒द्
यन्म॒ इन्दुं॑ हर॑ति वैनते॒यः॥६॥

॥ *पदपाठः* ॥

उ॒प०ती॒रं। वर्त्त॑मानः। श॒श॒०अ॒क्षः। क्रो॒धेन॑। म॒र्तः। अज॑नस्य। क॒र्ता। व्या॒दा॒य॒०स्वा॒पी। विभि॑दः। क्व॑। आ॒सी॒त्॥

(*खण्डितभाष्यस्यावशिष्टोंऽशः*)

एवमजनस्य कर्ता। तथा विभिदो नाम किं . . . शत्रूणां भेत्ता। विशिष्टा भिदा भेदनं यस्य, सै (?) . . . मुखं [व्या] दाय स्वपितीति व्यादायस्वापी। व्यादाय प्रस्- . . . [इ]न्दुं हरति स्म . . .॥ (*अग्रतोऽनुपलब्धम्*)

"[उपतीरं, तीरस्य समीपे उपतीरं, प्रवेशद्वारनिकटं, सोमस्य रक्षणे नियुक्तत्वात्तत्रैव सातत्येन वर्तमानः शशाक्षो नाम व्यालो यः क्रुद्धः सन् मृत्युरिव, काल इव, सर्वान् परितः संस्थितान्, सोमाहरणेच्छया समेत्यागतान् तस्करान्, निर्मथ्य तत्र सर्वमजनं जनरहितं प्राणिविरहितं करोत्यथ च स विभिदो नामापरो व्यालो यः सर्वदैव तत्र मुखं व्यादायोद्घाट्य स्वापी स्वपनशीलः, शयानो वर्तते, सोमजिहीर्षया समागतांश्च सर्वान् निगिरति, स वैनतेयेन सोमापहरणकाले कुत्रासीदितीन्द्रस्य गुरुं बृहस्पतिं प्रति प्रश्नः। अत्र '*स्वप्*' इति धातोरक्षिणी निमील्य निद्रातीत्येवंप्रकारकोऽर्थो नैव ग्राह्यः, यतस्तेन नैवाभीष्टसिद्धिः। भूमौ शयानस्तिष्ठति मुखं व्यादायेत्येव कवेराशयः। "क्रोधेन मर्त्तः" इति पाठे

---

[६७] कदाचिल्लेखकभ्रान्त्या समुत्थितः "मृत्युः" इत्यस्यापपाठः।

'मर्त्त'-शब्दश्चिन्त्यः। मन्यामहे यदयं 'मृत्युः' इत्यस्यैवापपाठः।]" (*सम्पादकः*)।
इति त्रयोविंशो वर्गः॥

॥ अथ चतुर्विंशो वर्गः ॥

गतिं॑ वि॒ज्ञाय॑ शकु॒नस्य॑ स॒र्पास्
तेजो॒ब॒लेन॑ गरु॒डस्य॑ शक्र।
ते पं॑न्न॒गा वि॒हगे॑न्द्रस्य स्प॒र्शाद्
भी॒ताः शिर॒सांस्यप्य॑दधुस्त॒नूभि॑ः॥७॥

॥ *पदपाठः* ॥

गति॑ं। वि॒०ज्ञाय॑। शकु॒नस्य॑। स॒र्पाः। तेज॒ः ऽ ब॒लेन॑। गरु॒डस्य॑। शक्र। ते। प॒न्न॒गाः। वि॒हग॑ं०इन्द्रस्य। स्प॒र्शात्। भी॒ताः। शिरां॑सि। अपि॑० अ॒द॒धुः। त॒नूभि॑ः॥

[इदा] नीम् उत्तरं गुरुराह। बृहस्पतिरुवाच - हे शक्र। ते सर्पाः [विहगेन्द्रस्य] गरुडस्य [स्पर्शात् चञ्चुप्रहाराद् भीताः भयाकुलाः सन्तः स्वानि शिरांसि] उत्तमांगानि अप्यदधुः अपिहितवन्तः। [केन प्रकारेण?] [तनूभिः] शरीरैः [स्वकीयानि शिरांसि शिरोऽतिरिक्तशरीरभागेनाच्छादितवन्तः]। यद्वा तनूभिर्गुहाभिः। गुहासु [पलाय्य निलीनाः] किंलक्षणाः स[र्पाः] . . . तेजोबलेन तापेन। कीदृशाः सर्पाः प[न्नं?] नीचैर्यथा स्यात्तथा गच्छन्तीति पन्न[गाः] . . . अद्य:[?] इत्युद्भावनामात्रं। कीद(दृ?)शस्य [शकुनस्य? विहगेन्द्रस्य। विहायसा गच्छन्तीति विहगाः पक्षिणः, तेषामिन्द्रो राजा, तेषु श्रेष्ठः, तस्य गरुडस्य गतिं वेगेन पतनं विज्ञाय ज्ञात्वा, दृष्ट्वा वा, तस्य तेजोबलेन ओजसा शरीरसामर्थ्येन भीताः सन्तः ते सर्पाःचञ्चुप्रहारमुत्प्रेक्षमाणाः स्वकीयानि शिरांसि पिहितवन्तः।]
(*पत्रस्यार्धभाग एवावशिष्टः। कोष्ठगतं संपादकेन पूरितम्*)

ये वि॒द्युतौ॑ चर॑तः स॒र्वतो॑ घ्न॒ती
अन्नं॑ रक्ष॑न्ती॒ अभ॑या॒ भया॑ च॑।
चक्षु॑र्मु॒खा॒वस्व॑॑प॒न्नीक्ष॑माणाः
क॒थं स्विद॒॑देवाति॑ं पिपाति॒ गृध्र॑ः॥८॥

॥ *पदपाठः* ॥

ये इति॑। वि॒द्युतौ॑। चर॑तः। स॒र्वतः॑। घ्न॒ती इति॑। अन्न॑ं। रक्ष॑न्ती

इति। अभया। भुया। च। चक्षुःऽमुखौ। अस्वपन्। ईक्षमाणाः।
कथं। स्वित्। एव। अति। पिपाति। गृध्रः॥

[ये विद्यु]तौ सौदामिन्यौ [अभया-भया नाम्न्यौ] सर्वतः सर्वाभ्यो दि[ग्भ्यः] समागतान् दस्यून् घ्नती विनाशयन्त्यौ स्थिते। अथ च सर्वतः सर्वासु दिक्षु चरतः [सोमं परिवृत्य चक्ररूपेण भ्राम्यतः]। किं [कुर्वत्यौ]? अन्नम् अदनीयं पेयं सोमं रक्षन्त्यौ। पुनः किंल[क्षणे] . . . [चक्षुर्मुखौ, लिंगव्यत्य] यश्छान्दसः। स्त्रीलिंगार्थे पुंल्लिंगम्। चक्षुर्मुख्यौ। ययोर्मुखस्थाने चक्षुरेव। उ . . . मस्ति। विश्वतोमुखे। विश्वतो लोचने इ . . . स्फुरणरूपं तदेव चक्षुः। मुखचक्षुषोर्भेदस्या . . . (*पत्रं विखण्डितम्*)

"[ये त्वभयाभयानाम्न्यौ विद्युतौ सोमं रक्षन्त्यौ सततं तत्परितो भ्राम्यतः, चक्षुःस्फुरणमेव च ययोर्मुखं, स्वकीयेन वीक्षणेनैव तेजसा वा ये कमपि भस्मसात् कर्तुं समर्थे स्तः, ते अतिक्रम्य, अभिभूय, निर्जित्य वा कथमेष गृध्रः (गरुडः) सोममपहृत्य गच्छति। गरुडस्य कृते शक्रेण प्रयुक्तं 'गृद्ध' इत्यभिधानम् अवमाननार्थम्, अथ च सोमं प्रति तस्य गृध्नुतामपि संसूचयति। 'अति पिपाती'ति अस्फुटार्थम् (कदाचित् आर्षम् 'अतियियाति=अतिक्रम्य याति। यियाति=अतिशयेन, सत्वरं गच्छति?]"। (*सं०*)

ये विद्युतौ चरतः सर्वतो घ्नती
अन्नं रक्षन्ती अभया भुया च।
ताभ्यां समख्यद् गरुडो वैनतेयो
विषूच्यौ ते अयाट् स्वरभया भुयां च॥९॥

॥ *पदपाठः* ॥

ताभ्यां। सं। अख्यत्। गरुडः। वैनतेयः। विषूच्यौ। ते इति।
अयाट्। स्वः। अभयां। भुयां। च॥

"[बृहस्पतेरुत्तरमिन्द्रं प्रति। भवता नियुक्ते अभया-भया-नाम्न्यौ ते विद्युतौ येऽन्नं सोमं रक्षन्त्यौ सोमं परितः सर्वासु दिक्षु भ्रमन्ति, सोमं मोष्टुकामं जनं च घातयन्ति, ताभ्यां सह गरुडः प्रथमोद्भवाया आदिविद्युतः कनिष्ठभ्रातृत्वात् समख्यत् सख्यं साधितवान्। सख्या गरुडेन प्रार्थिते सत्यौ ते विषूच्यौ, सूक्ष्मत्वात् सर्वतः प्रसरणशीले, सोमं विहाय स्वं नियोगं च परित्यज्य स्वर् दिवं गतवत्यौ पलायित इत्यर्थः प्रतीयते। अथवा, 'अयाट्' इत्यस्पष्टार्थं क्रियापदम् एकवचनत्वाद् वाक्ये कर्तृपदेन 'गरुडः' इत्यनेन संगच्छतेतराम्। द्वितीयान्ते च अभया-भया-पदे।

अतः 'अयाट्' इत्यस्य 'यापयामास', 'प्रेषयामास' इत्यपि अर्थः ऊहितुं शक्यते। एवं सति 'गरुडः अभयां भयां च स्वः प्रति यापयामास' इति प्रकारान्तरेण व्याख्यानम्।]" (*संपादकः*) इति चतुर्विंशो वर्गः॥

॥ त्रयोदशं सूक्तम् ॥

॥ अथ पञ्चविंशो वर्गः ॥

या मे मायाऽनिमिषतो जवीयसी
सङ्कल्पज्योतिरनिवर्त्तमाना।

क्षुरपविब्रह्मन् क्व नु सा बभूव
यन्म इन्दुं हरति वैनतेयः॥१॥

॥ *पदपाठः* ॥

या। मे। माया। अनि०मिषतः। जवीयसी। सं०कल्पज्योतिः[६९]।
अनि०वर्तमाना। क्षुर०पविः। ब्रह्मन्। क्व। नु। सा। बभूव।
यत् मे०॥

"[पुनरयमिन्द्रस्य प्रश्नो बृहस्पतिं प्रति। हे बृहस्पते, या मे मम मायानाम्नी शक्तिः सोमरक्षणार्थं नियुक्ता, या च निमिषतोऽप्यधिकं[७०] जवीयसी वेगवती, मदीयेन हृद्गतेन संकल्पैनैव जाज्वल्यमाना सती सोमतस्करं भस्मसात्कर्तुं क्षमा, अनिवर्तमाना न कदापि प्रतिनिवर्तमाना पलायमाना वा, सा कुत्रासीत् यत् सा सोमचौरं वैनतेयं नैव नाशितवती येन स मदिन्दुं हरति।]" (*सं०*)

या तें मायाऽनिमिषतो जवीयसी
संकल्पज्योतिरनिवर्तमाना।

---

[६८] एतद्विशेषणपदं मायया सह नैव संगच्छते। चक्रस्यैवैतत् स्वरूपं संभाव्यते। तस्य प्रसंगे पुनरपि चोद्धृतम्। पाठाविलत्वात् तत एव कदाचिदागत्य अस्यामृचि प्रविष्टम् इति प्रतीयते।

[६९] 'संकल्पज्योति'रिति समस्ते पदे उदात्तस्य द्वित्वं बुधैश्चिन्तनीयम्। पूर्वपदप्रधानो बहुव्रीहिरतः 'संकल्पज्योतिः' इतिवद् भाव्यम्।

[७०] मूले पदपाठे च स्थितस्य 'अनिमिषतः' इत्यस्य स्थानेऽस्माकं 'निमिषतः' (निमिषादपि जवीयसी) एवाभीष्टम् यत्तु तृतीयचतुर्थपद्ययोरपि विद्यते।

तामा॑त्मसा॒ची ग॑रु॒डो वैन॑ते॒यो
ज॒वाज्ज॒वीया॒न्न्यज॑हा॒द् बले॑न॥२॥

॥ *पदपाठः* ॥

या। ते॒। ०॥ तां। आ॒त्म॰ सा॒ची। ग॒रु॒डः। वैन॑ते॒यः। ज॒वात्। जवीयान्। नि। अज॑हात्। बले॑न॥

॥ *भाष्यम्* ॥

"[या ते शक्र 'निमिषतो जवीयसी'त्यादिगुणविशिष्टा माया तां स्वात्मनिष्ठबलेन जवादपि जवीयान्, वेगादपि वेगवत्तरो गरुडो वैनतेयः पराजित्य गतः। तव माया केवलं निमिषतो जवीयसी, किन्तु वैनतेयो जवादपि जवीयोऽतस्तामतिशेते इत्याशयः।]" (*सं०*)

यन्मे॑ च॒क्रं नि॑मि॒षतो जवी॑यः
संक॒ल्पज्योति॒रनि॑वर्तमानम्।
क्षु॒रप॑वि ब्रह्मन् क्व१॑ नु तद् ब॑भूव
यन्म॒ इन्दुं॑ हर॑ति वैनते॒यः॥३॥

॥ *पदपाठः* ॥

यत्। मे॒। च॒क्रं। नि॒०मि॒ष॒तः। जवी॑यः। सं॰क॒ल्पज्योति॑ः। अनि॑०वर्तमानं। क्षु॒र०प॑वि। ब्र॒ह्म॒न्। क्व॑। नु। तत्। ब॒भू॒व॥ यत्। मे॒। ०॥

॥ *भाष्यम्* ॥

"[पुनरपि गुरुं पृच्छति शक्रः। यन्मदीयं चक्रं तत्र सोमस्य रक्षायै नियुक्तं वर्तते, यच्च निमिषपतनादपि वेगवत्। निमेषपतने यः कालांशोऽपेक्ष्यते ततोऽप्यल्पीयसा कालेन शत्रोः शिरश्छिनत्ति। संकल्पमात्रेण ज्वालामालाभिरावृतं सत् अग्निमुद्गिरति। स्वकीयप्रान्तभागे परिधौ च क्षुरैर्युक्तं वर्तते। शत्रून् अनिहत्य न कदापि निवर्तते। तादृशं मच्चक्रं कुत्रासीत् यदेष वैनतेयो मम सोममपहरति।]" (*सं०*)

यत्ते॑ च॒क्रं नि॑मि॒षतो जवी॑यः
संक॒ल्पज्योति॒रनि॑वर्तमानम्।

तदा॒त्मसा॒ची[७१] गं॑रु॒डो वैं॑नते॒यो
जु॒वाज्जवीं॑या॒न्यज॑हा॒द् बलें॑न॥४॥

॥ *पदपाठः*॥

यत्। ते॒।०। तत्।०॥

॥ *भाष्यम्* ॥

"[एतत्सर्वगुणविशिष्टं तव यच्चक्रं तद् आत्मसाची स्वकीयेन स्वात्मनिष्ठबलेन साची पतन् वैनतेयो वेगादपि वेगतरमुड्डीयमानस्तन्न्यक्कृत्य, तत् चक्रमतिक्रम्य, तत् पृष्ठतः त्यक्त्वा, पलायितः।]" (*सं०*)

पर्व॑ताऽष्ठी॒राः क्षु॒रप॑व्यः सुबु॑ध्न्यो
मो॒दा ह्र॒दा ह्र॒दिनी॑: सू॒र्यं॑वर्चसः।
च॒न्द्र इं॑व भा॒न्तीर्बं॑हु॒धा वि॒श्वरू॑पाः
क॒थं स्विंद्दे॒वाऽतिं पिपाति॒ गृध्रं॑:॥५॥

॥ *पदपाठः* ॥

पर्व॑त० अष्ठी॒राः। क्षु॒र० प॑व्यः। सु०बु॑ध्न्यः। मो॒दाः। ह्र॒दाः। ह्र॒दिनी॑:। सू॒र्यं० वर्चसः। च॒न्द्रः॒ऽ इं॑व। भा॒न्तीः। ब॒हु॒धा। वि॒श्व० रू॑पाः। ०।

॥ *भाष्यम्* ॥

"[पर्वताष्ठीराः सोमं परिवृत्य संस्थितानां पर्वतानाम् अष्ठीराः (लाः) महन्ति शिलाखण्डानि, वर्तुलाः पाषाणशिलाः वा; क्षुरैर्युक्ताः सोमं परितः भ्रमन्त्यः पव्यः चक्राकाराणि यन्त्राणि; बुध्नमधस्तलं गर्तो वा। सुबुध्न्यः अतीवगभीराः ह्रदाः जलपूर्णाः ('मोदाः' इत्यस्य स्थाने 'सोदाः' इत्येव साधु) परिखाः . . .]" (*सं०*)

. . . प्रमोदभरसम्पन्नाः। आनंदघनाः। किंलक्षणाः ताः मोदाः? एतन्नाम्न्यः शक्तयः। सूर्यवर्चसः। वर्चस्तेजः। सप्रतापतेजोबहुलाः। पुनः के सुधाध . . . मुक्ता [?]। [सुबुध्न्यः अतीवगभीराः] ह्रदाः अगाधजलाः महागर्ताः नदा इत्यर्थः। कीदृशाः ते नदाः। चन्द्रवत् भांतः भ्राजमानाः [भास्व]रवर्णाः शीतलाश्च।

---

[७१] अत्र 'आ॒त्मसा॒ची' इत्यत्र उभयोः पदयोरुदात्तत्वं परं, द्वितीये मन्त्रे उत्तरपदस्यैव (आ॒त्म॒सा॒ची) इति बुधैर्निभालनीयम्।

भांत इति विशेषणमर्थवशाल्लिंगविपरिणामतः। पुनः काः अमृतस्य [र]क्षणाय [का]रणत्वे[न] कल्पिताः। ह्रदिन्यः। नद्यः। ऋङ्मध्येन ह्रदिनीरिति द्वितीयाकर्मणि। . . . ति . . . कर्मत्वं। कीदृशो ह्रदिन्यः। चन्द्र इव भांत्यः। शोभमानाः। धवलोदका इत्यर्थः। पु . . . [सो]म संगोपनाय प्रयुक्ताः। विश्वरूपाः। नानाविधरूपाः शक्तयः योगिन्यः विश्वानि स[र्वा]णि अनेकप्रकाराणि रूपाणि यासां ताः विश्वरूपाः। कीदृश्यो विश्वरूपाः? बहुधा वि[विध]प्रकारं प्रवर्तमानाः। नानाविधाभिर्मायाभिर्युद्ध्यमाना इत्यर्थः। पुनः कीदृश्यः विश्वरूपाः शक्तयः? सूर्यवर्चसः उग्रतेजसः। इह पंचानामन्तर्द्धानानां क्षुरपविमोदह्रदह्रदिनीविश्वरूपाख्यानां व्यस्तान्वितत्वदोषमथाश्रित्य औचित्यमात्रबलाद्यथायोग्यं विशेषणानि प्रयुक्तानि। असौ गृध्रः सोमे लुब्धः पक्षी गरुडः एताः पंच अन्तर्द्धानत्वे प्रयुक्ताः स्थापिताः सर्वा अपि कथं अति पिपाति अतिक्रम्य गच्छति। अंतः प्रविशति स्म।

चतुर्थपादे पाठान्तरं। '*कथं स्विदेवाप्यति याति गृध्रः*'। पदानि तु। कथं। स्वित्। एव। अपि। अति। याति। गृध्रः। एताः कथमतियाति। अतिक्रामति। स्विदिति प्रश्ने। (*भाष्यमादौ क्वचिन्मध्ये च खण्डितम्*) (*सं०*)

बृहस्पतिः प्रत्युत्तरमुवाच –

ता ग्रीवच्छिन्ना[७२] अपि च मूर्द्धभिन्नाः[७२]
कृत्ताः संचन्ते बहुलानि शक्र।
अपाद् भौवनो निहंतस्तदासीन्-
महद् वैशसमकरोत्सुपर्णः॥६॥

॥ *पदपाठः* ॥

ताः। ग्रीव०छिन्नाः। अपि। च। मूर्द्ध०भिन्नाः। कृत्ताः। सचंते बहुलानि। शक्र। अपात्। भौवनः। नि० हंतः। तत्। आसीत्। महत्। वैशसं। अकरोत्। सुपर्णः॥

॥ *भाष्यम्* ॥

इह केचित् कुसांप्रदायिकाः जडाः चतुर्थपादे वैकारशकारयोरंतरा यकारं प्रवेशयंति। '*महद्वै यशसमिति*'। तद् वृथा। महद्वैशसमित्येव शुद्धं सत्सम्प्रदायागतं बोद्धव्यम्। गुरुः 'पर्वताष्ठीरा' इत्येतस्यामृचि निर्दिष्टानां पंचानां सोमांतर्द्धानानां

---

[७२] 'ग्रीवच्छिन्नाः' इत्यत्र उत्तरपदस्य, अथ च 'मूर्द्धभिन्नाः' इत्यत्र पूर्वपदस्य उदात्तत्वं कथमित्यन्वेष्टव्यम्। 'वैशस'मित्यत्र सर्वानुदात्तत्वमपि चिन्त्यम्।

गतिमिन्द्रेण पृष्टोऽनया 'ता ग्रीवच्छिन्नाः' इति यथास्वमुत्तराण्याह। हे इन्द्र। त्वया मोदा इति नाम्न्यः शक्तयः कुत्रेति पृच्छ्यते। ताः मोदानाम्न्यः योगिन्यः गरुडेन ग्रीवच्छिन्नाः कृताः। ग्रीवासु छिन्नाः ग्रीवच्छिन्नाः। ह्रस्वत्वं छांदसं। छिन्नग्रीवा इत्यर्थः। याश्च त्वं विश्वरूपा इति नाम्न्यः शक्तयः कुत्र गता इति पृच्छसि। ताः विश्वरूपाः योगिन्यः गरुडेन मूर्द्धभिन्नाः कृताः। मूर्द्धसु भिन्नाः विदारिताः मूर्द्धभिन्नाः। ता ग्रीवच्छिन्नाः मूर्द्धभिन्नाः इति स्त्रीलिंगानि सर्वाणि द्वितीयांतानि कर्मकत्वात्। बहुलानीति नपुंसकं प्रथमाबहुवचनं कर्तृत्वात्। अयमन्वयः। बहुलानि तानि प्राणिजातानि श्वशृगालकाकगृद्धादीन्यामिषभक्षकानि(णि), ताः सर्वाः उभय . . . मोदाख्याः विश्वरूपाख्याश्च कर्मभूताः सर्वं ते [सचन्ते] सेवंते खादन्ति भक्षयन्ति। अनु . . . आसन्। गरुडेन ताः शस्त्र्यः(?) कृताः, छिन्नाः खण्डशः कृताः। ताः गरुडः अपि [आ] हारेण योजन . . .। गरुडः ताः अदहत् भस्मसात् अकरोत्। याश्च ह्रदिन्यः आ . . . शब्दात् गरुडः ताः ह्रदिनीः अशोषयत्। शोषितवान्। शुष्कोदका अकार्षीत्। तथा ये ह्रदाः नदाः आसन्, च-शब्दात् गरुडः तान् ह्रदान् नदान् अशोषयत्। शोषितवान्। शुष्कोदकान् अकरोत्। च-शब्दात् क्रियापदाऽध्याहारः। तथा यः भौवनो विश्वकर्मा आसीत्। स तेन नितरां हतः। तदा। एवं सुपर्णः वैशसं हननं अकरोत्। वैशसं वधं अकरोत्। *'ताश्छिन्नग्रीवा अपि च मूर्द्धभिन्नाः'* इति पाठान्तरम्। (*पत्रं स्थाने स्थाने कीटभक्षितम्, सं०*)। इति पंचविंशतितमो वर्गः॥

॥ अथ षड्विंशो वर्गः ॥

'उदश्रयंतु सर्पा हर्षमाणाः' इत्यस्याः स्थानमन्यत्र (*फलश्रुतिप्रसंगे, सं०*)। इन्द्रः पृच्छति गुरुम् –

आदित्या रुद्रा वसवोऽथ साध्याः
सोमं रक्षन्तो बहुधा निविष्टाः।
मरुतो ब्रह्मन् क्व१ नु ते बभूव(वुः)[७३]
यन्म इन्दुं हरति वैनतेयः॥७॥

---

[७३] मातृकाणामालोचनेन ज्ञायते यद् "बभूवुः" इत्येव पाठः पारम्परिकः शुद्धश्च। १७३८तमे वैक्रमे वर्षे लिखिताऽस्माकं पदपाठमातृकापि 'बभूवुः' इत्येव पाठं स्वीकरोति। ग्रूबे महाशयोऽपि सुपर्णाध्यायस्य चिकित्सिते संस्करणे 'बभूवु'रित्येव स्वीचकार। तथाप्यस्माकं भाष्यकारस्य सविधे या मातृकाऽऽसीत्तत्र 'बभूव' इत्यशुद्धः पाठः समतिष्ठत, अतः एषा भ्रान्तिः। (अग्रेऽपि द्रष्टव्यम्)

॥ *पदपाठः* ॥

आदि॑त्या। रु॒द्राः। वस॑वः। अथ॑। सा॒ध्याः। सोम॑। रक्ष॑न्तः।
ब॒हु॒धा। नि०विं॑ष्टाः। मरु॑तः। ब्रह्म॑न्। क्व॑। नु। ते। ब॒भू॒वुः[७३]।०॥

॥ *भाष्यम्* ॥

हे गुरो एते मरुत्पर्यंताः देवाः सोमं रक्षंतः संतः बहुधा[बहु]भिः। प्रकारैः नानारूपवेशैः परितः परिवेष(श)रूपेण निविष्टाः व्यवस्थिताः। हे ब्रह्मन् ते सर्वे [क्व नु खलु] बभूव[७३] इति बभूवुः। व्यत्ययेन बहुत्वस्थाने एकवचनं। 'पुत्रं तु ब्रह्मणस्पति'रित्यादौ यथा व्यत्ययेनैकवचनस्थाने बहुवचनं। शेषं गतार्थम्॥

गुरुरुवाच –

प्राञ्च॑ आय॒न् वस॑व॒ः प्रेक्ष॑माण॒ा[७४]
उद॑ञ्चो विश्वे॒ मरु॒तोऽथ॑ सा॒ध्याः।
दक्षि॑णा रु॒द्राः स॒ह गं॑न्धर्वसे॒नया॑
प्र॒तीच॑ आदि॒त्यान॑नयद् वैनते॒यः॥८॥

॥ *पदपाठः* ॥

प्राञ्च॑ः। आ॒य॒न्। वस॑वः। प्र० ईक्ष॑माणाः। उत्० अ॑ञ्चः।
विश्वे॑। मरु॑तः। अथ॑। सा॒ध्याः। दक्षि॑णा। रु॒द्राः। स॒ह। ग॒न्ध॒र्व०
से॒नया॑। प्र॒तीच॑ः। आ॒दि॒त्यान्। अ॒न॒य॒त्। वै॒न॒ते॒यः॥

॥ *भाष्यम्* ॥

हे इन्द्र। वसवः ८, प्रांचः पूर्वदिशि आयन् [अग]मन् गरुडत्रासात्। '*अय*' गतौ। विश्वे इति विश्वेदेवाः, तथा मरुतः ४९, अथ साध्याः एते उदंचः उदीच्यां आयन् आगच्छन्। रुद्राः ११, दक्षिणा इति दक्षिणस्यां आयन्। गताः। कथं। गंधर्वाणां सेनया सह। वैनतेयः आदित्यान् १२, प्रतीचः प्रत्यङ्मुखान् प्रतीच्यां अनयत् प्रापितवान्॥

इन्द्र उवाच –

वै॒श्वा॒न॒रो जा॒तवे॑दा॒ः क्वा॑सी॒द्
यो म॒ इन्दु॑ं परि॒गृह्याधि॑ तिष्ठति।

---

[७४] 'प्रेक्ष्यमाणा' इति ग्रूबेमहाशयेन स्वीकृतः पाठः। अस्माकं मते तु 'प्रेर्यमाणाः' इति साधीयः।

अर्चिर्ज्वलन्तमनिघृष्टतेजसं
कथं स्विदेवाप्यति याति गृध्रः ॥९॥

॥ *पदपाठः* ॥

वैश्वानरः। जात०वेदाः। क्व। आसीत्। यः। मे। इदुं। परि०
गृह्य। अधि। तिष्ठति। अर्चिः०ज्वलन्तं। अनिघृष्ट०तेजसं।
०। अपि। अति। याति। गृध्रः॥

॥ *भाष्यम्* ॥

हे ब्रह्मन् सः अग्निः क्व। स कः? यः मे इदुं गृहीत्वा तिष्ठति। किं कृत्वा? अधि इति स्वस्थानं अधिरुह्य। गृध्रः गरुडस्तं वैश्वानरं कथं अति याति। अतिक्रामति। उल्लंघ्य गच्छति। स्विदिति प्रश्ने वितर्के वा। प्रकोपाद् गृध्र इति अवमानवचनं प्रयुङ्क्ते। कीदृशं जातवेदसं? अर्चिर्ज्वलन्तं। अर्चिर्भिः ज्वालाभिः ज्वलतीति अर्चिर्ज्वलन्। तं। कीदृशं वैश्वानरं? अनिघृष्टतेजसं। न निघृष्टं केनचित् प्रच्यावितं क्षरितं तेजो यस्य असौ अनिघृष्टतेजाः। तम् ॥

बृहस्पतिरुवाच –

घृतस्य सिन्धूननयद् वैनतेयो
बद्धं बद्धान्ययुतानि षष्टिम्।
तैस्तर्पयित्वा तवं जातवेदसं
हिरण्मयः स्त्रोत्यपतच्छकुन्तः॥१०॥

॥ *पदपाठः* ॥

घृतस्य। सिन्धून्। अनयत्। वैनतेयः। बद्धं। बद्धानि। अयुतानि।
षष्टिं। तैः। तर्पयित्वा। तव। जात० वेदसं। हिरण्मयः।
स्त्रोति। अपतत्। शकुंतः॥

॥ *भाष्यम्* ॥

सिन्धवो ह्रदाः। मेर्वादिप्रमुखनानादिव्यभूमिषु वर्तमानाः। तान् घृतह्रदान् अनेकान् नानाप्रदेशेभ्यः अनयत् वैनतेयः आनिनाय। कतिसंख्याकान् घृतह्रदान्? ६० षष्टिं अयुतानि। एतावत्संख्याकान् षट्लक्ष्याणीत्यर्थः। तान् अमृतरक्षणे नियुक्तस्य वैश्वानरस्य समीपे गरुडः आनीतवान् पक्षाभ्यां कृत्वा। किंलक्षणानि षष्टिं अयुतानि? बद्धानि नियतानि। अन्यूनानि। अनतिरिक्तानि च। पूर्णान्येवेत्याशयः।

बद्धं सत्यं। तैः षड्लक्षसंख्यैः घृतस्य सिंधुभिः आज्यह्रदैः हे इन्द्र तव जा[तवेदसं] वैश्वानरं तर्पयित्वा असौ हिरण्मयः शकुंतः पक्षी सुपर्णः[७५]। स्त्रोति इति स्त्रो[तसि] . . . के सागरमध्ये अपतत्। उष्णेन तापेन संतप्तः सन्। स्त्रोतस्-शब्दस्य ङौ परे छांदसेन टिलोपेनैतद्रूपं सप्तम्येकवचनांतम्। स्त्रोति[७६] इति। अनेन तर्पणोपायेन वैश्वानरमाराध्य व[शम्]आनीय तस्मात् प्रदेशात् दूरतरं प्रेष्य, प्रवेशसौकर्यं कृतवान्। अपरया गुरुरेवो[वाच]–

वैश्वानरं तर्पयित्वा[७७] घृतेन
सर्वान्नन्यान्त्सोमपालान् विजित्य।
महामेघेव निम्नानि समानि कुर्वन्
परांङ् गच्छद् गरुडो वैनतेयः॥११॥

॥ *पदपाठः* ॥

वैश्वानरं। तर्पयित्वा[७७]। घृतेन। सर्वान्। अन्यान्। सोम०पालान्। वि० जित्य। महामेघःऽइव। निम्नानि। समानि। कुर्वन्। परांङ्। गच्छत्। गरुडः। वैनतेयः।

॥ *भाष्यम्* ॥

वैनतेयो गरुडः वैश्वानरं षड्लक्षाणां घृतह्रदानां घृतेन तर्पयित्वा, अन्यांश्च सर्वान् यमादी[न्] ईशानांतान् लोकपालान् दिक्पालान् विजित्य विविधप्रकारैर्जित्वा, तान् सर्वान् वैश्वा[न]रादीन् पराङ् इति पराङ्मुखान् सम्पाद्य पराङ्मुखीकृत्य

---

[७५] हिरण्यं नाम सुवर्णम्। सुवर्णं तु अग्नेः संभूतम् 'अग्नेरपत्यम्' इति प्राचीना धारणा, अतोऽत्यन्तानलसंयोगेऽपि नैव तस्य विनाशः। सुपर्णस्तु हिरण्मयः। अतोऽग्निस्तं दग्धुं नैव प्रभवति। अक्षतशरीरः स ज्वालाभ्यो निष्क्रामति। सुवर्णस्यादाह्यत्वे प्रमाणम् – "सुवर्णं तैजसम्। असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽपि अनुच्छिद्यमान-जन्यद्रव्यत्वात्" (सिद्धान्तमुक्तावली-तेजोनिरूपणम्)। "अग्नेरपत्यमेतद् वै सुवर्णमिति धारणा" (*महाभारते*, अनुशासनपर्वणि ८५.२४७॥)

[७६] दुर्व्याख्येयस्यासंगतस्य च 'स्त्रोति अपतत्' इति पदद्वयस्य शुद्धो मूलपाठः 'सोऽत्यपतत्' इत्येवं प्रतिभाति (=हिरण्मयः स शकुन्तः जातवेदसम् अत्यपतत्, अतिलंघ्य गतः)। 'स्त्रोति स्त्रोतसि अपतत्' इति सर्वथा विरुद्धमर्थं जनयति।

[७७] पूर्वस्मिन् मन्त्रे तर्पयित्वा इति पदमन्तोदात्तम्। परमस्मिन् मन्त्रे तदेव पकारस्योदात्तत्वात् (तर्पयित्वा) मध्योदात्तम् इति विसंगतिः। सामान्यतः क्त्वान्तानामन्तोदात्तत्वमेव, अतः पूर्वं शुद्धम्।

गच्छत्। अडागमाभावश्छांदसः। अगच्छत्। अमृतनिक्षेपणस्थानं सुगमं कृत्वा अगच्छत्। तत्र अगमत्। किं कुर्वन् सन् अगच्छत्? [निम्नानि स्थ]लानि समा[नि] कुर्वन् मृत्तिकया पूरयित्वा। अमृतस्थानात् परितः ये गर्ता . . . वा प्रमुखाः आसन्। तथा ये नदाः नदीश्च (!) आसन् ताः शोषयित्वा, तासां निर्जलान् मध्यगर्तान् मृद्भिः प्रपूर्य समा[नि]स्थलानि कुर्वन् अमृतबिले गतः। यथा महामेघः प्रबलपर्जन्यः विषमानि(णि) गर्तवंति स्थलानि उन्नतानि संपादयति। उन्नतस्थलानि खनित्वा परिखीकुर्वन्। इति षड्विंशतितमो वर्गः॥

॥ चतुर्दशं सूक्तम् ॥

॥ अथ सप्तविंशो वर्गः ॥

उत्तरस्या ऋच 'एक'माद्यमर्धर्चं बृहस्पतेर्वाक्यम् तदनन्तरमिन्द्रस्य। गुरुरुवाच –

एकौ बहून् भीमबलोऽध्यतिष्ठत्
तवैव[७८] शक्तः सदृशो[७९] बलेन।
यन्मे रक्षान्[८०] धर्षितवाञ्छकुन्तस्-
तेनाऽस्य क्रुद्धः प्र हरामि वज्रम्॥१॥

॥ *पदपाठः* ॥

एकः। बहून्। भीम०बलः। अधि। अतिष्ठत्। तव। एव[७८]।
शक्तः। स०दृशः[७९]। बलेन। यत्। मे। रक्षान्[८०]। धर्षित०वान्।
शकुन्तः। तेन। अस्य। क्रुद्धः। प्र। हरामि। वज्रम्॥

॥ *भाष्यम्* ॥

एकः गरुडः बहून् सोमपालकान् अधिरुह्य। आक्रम्य। अतिष्ठत्। आक्रम्य अभिभूय विजित्य। कीदृशः? हे इन्द्र। बलेन सामर्थ्येन तवैव सदृशः तुल्यः। अतएव भीमबलः। भयंकरशक्तिः। किंलक्षणो गरुडः? शक्तः। सर्वकार्यकरणसमर्थः। अथोत्तरार्धेनेन्द्रः स्वप्रकोपं विवृण्वन्नाह गुर्वादीन् प्रति।

इन्द्र उवाच –

यत् यस्मात् कारणात् शकुन्तोऽसौ पक्षी गरुडः मे रक्षां सोमरक्षां इति

---

७८ 'तव एव' इत्यस्य स्थाने 'तव इव' (तवेव) पाठः साधीयान्।

७९ 'सदशो' इति ग्रूबेमहाशयेन स्वीकृतः पाठः क्वचिदन्यत्रापि प्राप्यते।

८० भाष्यकारस्त्वत्र 'रक्षां' इति पठति तथैव च व्याकुरुते ('रक्षान्धर्षितवान्' इत्यनेनैष भ्रमः)।

सोमरक्षकान् सर्वान् चेतनाचेतनान् धर्षितवान् पराभू[तवा]न् तेन हेतुना अहं क्रुद्धोऽस्मि। अस्य गरुडस्यांगे वज्रं प्रहरामि। वज्रप्रहारं मुञ्चामि।

ए[वं प्र]तिज्ञाय गरुडसमीपे गत्वेन्द्रः सुपर्णपृष्ठे वज्रप्रहारं मुमोच। वज्रं तु वज्रोपरि आस्फालितं यथा निःफलं भवति तथैवासीत्। गरुडपृष्ठवज्रयोः परस्परास्फालनादग्निः पपात। न च गरुड[दे]हे व्रणमात्रमभवत्। ततो वितथप्रयत्न इन्द्रो गरुडं प्रति आगत्येदमवोचत्।

इन्द्र उवाच –

तपोमयं क्षुरपविं स्ववीर्यं
येन वृत्रस्य हृदयं निकृत्तम्[८१]।
तन्मे वज्रं प्रतिहतं शकुन्ते[८२]
बृहस्पते किन्नु भूतं सुपर्णः॥२॥

॥ *पदपाठः* ॥

तपःऽमयं। क्षुर०पविः। स्व०वीर्यं। येन। वृत्रस्य। हृदयं। नि० कृत्तं। तत्। मे। वज्रं। प्रति० हतं। शकुंते।[८२] बृहस्पते। किं। नु। भूतं। सु०पर्णः।

॥ *भाष्यम्* ॥

हे बृहस्पते। नु इति वितर्के। तत् मे वज्रं शकुंते अमुष्मिन् पक्षिणि पातितं सत् प्रतिहतं। प्रत्युत भग्नधारमिवास। वंध्यमास। हे बृहस्पते। असौ सुपर्णः किं भूतं? एवंविधं आश्चर्यरूपं अपरिमेयबलं किं भूतं? किं प्राणि? तद् ब्रूहि। तत् किं वज्रं! येन वज्रेण वृत्रस्य वृत्रासुरस्य हृदयं नितरां कृत्तं विदारितं। '*कृती*' छेदने। कीदृशं वज्रं। तपोमयं। तपोबलेन व्याप्तं। दधीचऋषेः तपसा महाप्रभावं। तस्यास्थिमयत्वात्। पुनः कीदृशं? क्षुरपवि क्षुरधारं। स्ववीर्यं स्वस्यैव वीर्यं यस्मिन् तत् स्ववीर्यं सहायानपेक्षमित्यर्थः।

गुरुरुवाच –

एष छन्दांसि सहितानि शक्र
यजुर्मयः सामतनूः सुपर्णः।

---

[८१] ग्रूबेमहाशयः अत्र 'निकृन्तम्' इति पठति, तदशुद्धम्।

[८२] 'शकुन्ते' इत्यस्य सर्वानुदात्तत्वं चिन्त्यम्। नैतत् संबुद्धिपदम्।

इन्दुं पीत्वा वीर्यवान्स्ताक्ष्र्यपुत्रस्
तेन वज्रः[८३] प्रतिहतस्तवात्र ॥३॥

॥ *पदपाठः* ॥

एषः। छंदांसि। सहितानि। शक्रः। यजुःऽमयः। साम०तनूः। सु०पर्णः। इन्दुं। पीत्वा। वीर्य०वान्। ताक्ष्र्य० पुत्रः। तेन। वज्रः[८३]। प्रति०हतः। तव। अत्र॥

॥ *भाष्यम्* ॥

हे शक्र। एष गरुडः। सहितानि। एकत्र मिलितानि चत्वारि छंदांसि विद्धि। छंदोमयः। वेदमयशरीरत्वमेव प्रकटयन्नाह। यजुर्मयः सामतनूः। सामान्येव तनूर्यस्यासौ सामतनूः। उपलक्षणमेतत्। ऋङ्मयोऽथर्वमयश्च। कीदृक्। इंदुं पीत्वा वीर्यवान्। सोममदेनोत्कटबलः। तेन हेतुना अत्रास्मिन् सुपर्णे तव वज्रः प्रतिहतः। पफाल। वंध्यो जातः।

अथ प्रहारे निःफले सति इन्द्रः सामवाक्यैः सुपर्णमनुनयन् स्वार्थसिद्धिं प्रार्थयते। इंद्र उवाच। गरुडं प्रति –

इदं देवानामरिंघाति वज्रं-
मावृत्रंपूर्वमनिहत्य शत्रुम्।

तदावृत्तं[८४] तत् सुराणां न साधु
वज्रस्य मानः क्रियतां गरुत्मन्॥४॥

॥ *पदपाठः* ॥

इदं। देवानां। अरिं०घाति। वज्रं। आ०वृत्रंपूर्वं। अनि०हत्य। शत्रुं। तत्। आ०वृत्तं। तत्। सुराणां। न। साधु। वज्रस्य। मानः। क्रियतां। गरुत्मन्।

---

[८३] 'वज्र'पदस्य पूर्वस्यामृचि नपुंसके, एतस्यां तु पुंल्लिंगे प्रयोग इति बुधैर्निभालनीयम्!

[८४] भाष्यकारस्तु 'तदावृत्तम्' इत्यस्य स्थाने कदाचिद् 'अनावृत्तम्' इति पाठं स्वीकरोति, किन्तु मूले पदपाठे च वर्तमानस्य 'तदावृत्तम्' इत्यस्यापि बोधस्तस्यास्ति। साधिष्ठः पाठस्तु 'यदावृत्त'मिति। (अग्रेऽपि द्रष्टव्यम्)

॥ *भाष्यम्* ॥

हे गरुत्मन्। तत् इदं वज्रं आवृत्रपूर्वं यथा स्यात्तथा सुराणां शत्रुं अनिहत्य अहत्वा न आवृत्तं।[८४] न आवर्त्तते स्म। न निवृत्तं। आवृत्रपूर्वमित्यस्य कोऽर्थः? वृत्रः पूर्वो मुख्यो येषां ते वृत्रपूर्वाः। वृत्रपूर्वान् वृत्रादीन् अभिव्याप्य इति आवृत्रपूर्वं। अभिविधावाङ्। आवृत्रपूर्वं यथा स्यात्तथा। अयमाशयः। वृत्रप्रभृतीनपि सुराणां शत्रून् अहत्वा न आवृत्तं न निवृत्तं पूर्वकाले। अधुना तद्वज्रं अहत्वा आवृत्तं निःफलं जातम्। तत् साधु न। तत् युक्तं न। किंभूतं वज्रं। देवानां अरिघाति। अरिघ्नं। अरीन् घातयतच्छीलं (घातयत् शीलं) अरिघाति। हे गरुत्मन्। तस्य वज्रस्य मानः सत्कारः क्रियताम्। यद्वा एवं पाठः। *आ(अना-?)वृत्तपूर्वमनिहत्य शत्रुं*। तस्मिन् पाठे अयमर्थः। इदं वज्रं शत्रुं अनिहत्य अहत्वा कदाचित् आवृत्तपूर्वं न। कदाचिदपि विफलं न आवृत्तं। पूर्वं पूर्वकाले। [यदद्य आवृत्तं] तत् सुराणां साधु न। हितं न। हे गरुत्मन् वज्रस्य मानः पूजा क्रियताम्, यद् इदं दधीच-ऋषेरस्थिस्वरूपम्।

एवमिन्द्रेणानुनीतः सन् सामवाक्यपूर्वकं प्रार्थितश्च सन् गरुडोऽपीन्द्रमनोरथं प्रमाणयिष्यन्नाह॥ गरुड उवाच इन्द्रं प्रति –

और्वं तनूजं विसृजाम्यनिन्द्य
तच्छिन्धि वज्रेण भव त्वमीड्यः।

हितं देवानां प्रियमेव तुभ्यं
साम्नाऽस्मि कर्ता न बलेन शक्र॥५॥

॥ *पदपाठः* ॥

और्वं। तनूजं। वि। सृजामि। अनिंद्य। तत्। छिंधि। वज्रेण। भव। त्वं। ईड्यः। हितं। देवानां। प्रियं। एव। तुभ्यं। साम्ना। अस्मि। कर्ता। न। बलेन। शक्र॥

॥ *भाष्यम्* ॥

हे अनिन्द्य इंद्र। त्वत्कामनासिद्धये अहं और्वं ऊरौ भवं तनूजं विसृजाम्येकं। उत्सृजामि। मुंचाम्यधुना। हे इंद्र त्वं स्ववज्रेण तत् च्युतं मदीयं पिच्छं छिंधि। खण्डय। खण्डितं कुरु। तथा सति त्वं च ईड्यो भव। स्तुत्यो भव। कृतकृत्यो भव। पूर्णमनोरथो भव। एवं करणं देवानां हितं। तुभ्यमपि प्रियमेव। एतदपि पुच्छविमोचनं तु अहं साम्ना सामवाक्येनैव प्रियवाक्येनैव अनुनयेन प्रार्थितः सन् कर्त्ताऽस्मि। परं तु बलेन कोऽपि चेत् पिच्छमपि मोचयितुमिच्छति तर्हि अहं एतत् पत्रविमोचनकर्त्ता नास्मि।

गरुड उवाच –

ऋषेर्मानं करिष्यामि वज्रं यस्यास्थिसम्भवम्।
वज्रस्य च करिष्यामि तव चैव शतक्रतो॥६॥

॥ *पदपाठः* ॥

ऋषेः। मानं। करिष्यामि। वज्रं। यस्य। अस्थि०सम्भवं। वज्रस्य। च। करिष्यामि। तव। च। एव। शतक्रतो इति शत०क्रतो॥

॥ *भाष्यम्* ॥

हे शतक्रतो। अहं तस्य ऋषेर्दधीचेः मानं करिष्यामि। दास्यामि। मानं सत्कारं पूजां करिष्यामि। आज्ञास[म्पाद]नं करिष्यामि। तस्य कस्य ऋषेः? यस्य अस्थिसंभवं इदं वज्रं हस्ते धारयसि। अस्य वज्रस्य आयुधस्य च मानं पूजां करिष्यामि। गौरवं सम्पादयिष्यामि। तव च मानं गौरवं करिष्यामि। पिच्छं त्यक्ष्यामीत्यर्थः। अन्यथैतेषां त्रयाणां लघुत्वं भवेत्॥ इति सप्तविंशतितमोवर्गः॥

॥ अथ अष्टाविंशो वर्गः ॥

वामदेव ऋषिरुवाच –

छिन्नं त्रिधा तत्कुलिशेन पत्रं
तस्याग्रखण्डादभवन्मयूरः।
मध्ये द्विवक्त्रा भुजगेन्द्रराजी
मूले च शत्रुर्नकुलस्त्वहीनाम् (नकुलः फणीनाम्)[५]॥७॥

॥ *पदपाठः* ॥

छिन्नं। त्रिधा। तत्। कुलिशेन। पत्रं। तस्य। अग्र०खण्डात्। अभवत्। मयूरः। मध्ये। द्वि०वक्त्रा। भुजगेन्द्र०राजी। मूले। च। शत्रुः। नकुलः। फणीनां॥ [तु। अहीनाम्।]

॥ *भाष्यम्* ॥

तत् पत्रं। पिच्छं इन्द्रेण कुलिशेन वज्रेण त्रिधा छिन्नं। त्रिखण्डं कृतं। तस्य अग्रखण्डात् मयूरः शिखी अभवत्, उत्पन्नः। मध्ये इति मध्यखण्डात् भुजगेन्द्रराजी

---

[५] 'अहीनाम्' इति भाष्यकारधृतपाठः। पदपाठे तु 'फणीनाम्' इति विद्यते। एतदेव ग्रूबेमहाशयेनाप्यंगीकृतम् ('नकुलः फणीनाम्)।

नाम काचिज्जातिरभवत्। शलको नाम प्राणी उत्पन्नः। मूले इति मूलखण्डात् नकुलजातिरभूत्। नकुलो रक्तमुखः जातिविशेषः। स च अहीनां सर्पाणां शत्रुर्हन्ता। एवं जाते सति ततः इन्द्रः सुपर्णमिदमपृच्छत्।

पृच्छामिं त्वा शकुने किंबलोऽसि
कस्तें भागः समुं सह्यो[८६] द्विजेन्द्र।
आ चक्ष्व मे वीर्यमसह्यसाहं
सख्यं चं नो भवति शाश्वतीभ्यः॥८॥

॥ *पदपाठः* ॥

पृच्छामिं। त्वा। शकुने। किं०बलः। असि। कः। ते। भागः। सं। ऊँ इतिं। सह्यः[८६]। द्विज०इन्द्र। आ। चक्ष्व। मे। वीर्यं। असह्य०सहं। सख्यं। च। नः। भवति। शाश्वतीभ्यः॥

॥ *भाष्यम्* ॥

इन्द्र आह। हे शकुने विहग। हे द्विजेन्द्र, द्विजाः पक्षिणस्तेषामिन्द्र, पक्षिराज। हे असह्यसाहं। सहं एवं साहं। आदन्तत्वमार्षं। सोढुं शक्यं सह्यं। न सह्यमसह्यं। असह्यं साहं बलं यस्यासावसह्यसाहः। त्वा त्वां प्रति अहमिदं पृच्छामि। किं? त्वं किंबलः असि। किं इति कियत् बलं यस्यासौ स किंबलः। तव बलं कियदस्ति। हे शकुने। ते तव कः भागः अंशः देहोद्भ[वः] संसह्योऽस्ति। सम्यक् सोढुं शक्योऽस्ति। त्वं हि प्रकृत्या सर्वात्मना दुःसह एवासि। त्वच्छरीरे तु को विभागः अंशः किमंगं कस्मिन्नवसरे वा केनोपायेन वा कोऽप्यंशः सह्यः सोढुं शक्योऽस्ति तद्वद। त्वं स्ववीर्यं स्वसामर्थ्यं मह्यमाचक्ष्व। नः अस्माकं त्वया सार्धं शाश्वतीभ्यः समाभ्यः शाश्वतीनां समानार्थेव निरन्तरभावीनि वर्षाणि अक्षयं भवितुं सख्यं सखित्वं मित्रत्वं भवति भविष्यति। अतः सखित्वात्स्वशक्तिं मदग्रे कथ[य]। तव शक्तिः कियती। 'शाश्वतीभ्यः समाभ्य' इति चतुर्थीबहुवचनादयमर्थो लभ्यते। आचंद्रार्ककालाय। आचन्द्रार्कंस्थायि आवयोः सख्यमस्तु। इति। गरुडः प्रत्युत्तरं अब्रवीत् –

अष्टौ भूमीर्नवदिशस्त्रीन्त्समुद्राञ्छचीपते।
परस्सहस्रं पर्वतान्वहेयं कामयेयं चेत्॥९॥

---

[८६] 'सह्यः' इति पदस्य सर्वानुदात्तत्वं चिन्त्यम्। 'सह्यः' इत्येवं रूपं शुद्धं स्यात्।

॥ *पदपाठः* ॥

अ॒ष्टौ। भूमी॑:। नव॑। दिश॑:। त्रीन्। स॒मु॒द्रान्। श॒ची॒०प॒ते॒। पर॑:ऽसहस्रं। पर्व॑तान्। व॒हे॒य॒ं। का॒मये॑यं। चे॒त्॥

॥ *भाष्यम्* ॥

गरुड आह। हे शचीपते। अहं चेत् कामयेयं इच्छेयं एवं कर्तुमिच्छामि तत्सर्वं वहेयं। वो(ढुं अ)हं शक्नोमि। अष्टौ भूमीः। इमाः पातालानि सप्त। अष्टमी इयमेव पृथिवी। एताः अष्टौ भूमीः। तथा त्रीन् समुद्रान्। एको लवणोदकः। एको मृष्टोदकः। विचित्ररसानां पंचानां सागराणानां समुदायः सर्वोऽपि एक एव समुद्र इत्येकत्वेन समूहो विवक्षितः। अनेनाकूतेन त्रित्वं निर्दिष्टम्। ९ नव दिशः। इमाः प्राच्यादयः सकोणाः ८ अष्टौ। नवमी ऊद्ध्वा दिक्। तदुक्तं शांखायनकल्पे –'*अथ यन्नवविधं तन्नवरात्रेण चतस्रो दिशश्चतस्रोऽवान्तरं दिश ऊद्ध्वेयं नवमी दिक् नवाक्षरा बृहतीति*'॥ ननु अधस्तनादिदिक् सत्यपि कथं नोक्ता। दश दिश इति सत्यं। अष्टौ भूमीरित्यत्र पाताललोकानां सर्वेषामन्तर्भावात् पौनरुक्त्यं स्यात् तस्मान्नवेत्युक्तम्। परः सहस्रान् पर्वतान् वहेयं। वोढुं शक्नोमि। सहस्रात् परे अधिकाः परःसहस्राः तान् परःसहस्रान्। अष्टौ भूमीरित्यत्र पृथिव्या अन्तर्भावो पृथिव्यां तु पर्वतानामन्तर्भावे सत्यपि तेषां महाभारव[त्त्वा]त् पृथगुपादानं न पुनरुक्तिदोषमावहति। अहं निजेच्छया एतत्सर्वं समुच्चितमेव युगपद्धेलामात्रेण वहामि। एतावत् मे वीर्यं। इत्येवं गरुडेन स्ववीर्ये यथार्थवाक्येनाविष्कृते, इंद्रः 'हे सुपर्ण, त्वमिमं मदीयममृतकलशं गृहाण। गृहीत्वा चेष्टस्थानं प्रति नीत्वा स्वकार्यं साधय। परं तु इमं समयं मया क्रियमाणं पालयेथाः। अनेन समयपरिपालनेन गृहाण। सत्यवचनेन एतं समयं प्रथममंगीकुरुष्व। पश्चात्सोमकलशमादत्स्व। आदाय च यथेष्टं याहि'। कोऽयं समय इत्याशङ्कायां समयव्यापिनीमृचमिंद्र आह –

इन्द्र उवाच –

इन्दुं॑ चेत्स॒र्पाः पा॑स्यन्ति॒ त्वया॑ दु॒त्तं वि॑हङ्गम।
अज॑न्तं ते क॑रिष्या॒मि[८७] तन्न सा॒धु भ॑विष्यति॥१०॥

---

[८७] 'करिष्यामि' इति क्रियादं स्ष्टतया 'करिष्यन्ति' इत्यस्यापपाठः। अमरत्वं प्राप्ताः विषधराः क्रमशः सकलं प्राणिजातं दष्ट्वा यमलोकं प्रापयिष्यन्तीत्याशयः। 'ते'-पदस्य उदात्तत्वादत्र भाष्यकारेण कृतः 'तव' अर्थः नैव संगच्छते। तत्-शब्दस्यैवैतत् पुंल्लिंगे प्रथमाबहुवचनान्तम्। (अपरपृष्ठेऽपि द्रष्टव्यम्)

॥ *पदपाठः* ॥

इन्दु॑ं। चे॒त्। स॒र्पाः। पा॒स्य॒न्ति॒। त्वया॑। द॒त्तं। वि॒० ह॒ꣳग॒म्। अज॑नं। ते। क॒रि॒ष्या॒मि॒[८७]। तत्। न। सा॒धु। भ॒वि॒ष्य॒ति॒॥

॥ *भाष्यम्* ॥

पाठान्तरं तु। *'हेलनं ते करिष्यामि यन्न साधु भविष्यति'* इति। *'अमानं ते करिष्यामी'* ति वा। इन्द्र आह। हे विहंगम हे सुपर्ण। चेत् सर्पाः इममिन्दुं सोममममृतं पास्यन्ति। अस्य पानं करिष्यन्ति तर्हि अहं ते तव गृहं अजनं जनशून्यं हीनं करिष्यामि। सर्वान् गृहवासिनः हत्वा॥ अथवा। ते तव अमानं अवमानं धिक्कारं करिष्यामि। न मानः अमानः। तं अमानं सन्मानविपर्ययं। यद्वा हेलनं प्रकोपं ते करिष्यामि। तत्तु नव (तव) साधु श्लाघ्यं न भविष्यति। हितं न भविष्यति। कीदृशमिन्दुं। त्वया दत्तमर्पितं संतं। अथ गरुडः अविरोधार्थीदमिन्द्रं प्रत्युत्तरमाह।

नाहमिन्दु॑ं परास्या॒मि स॒र्पेभ्य॑ः शत्रुबाधन।
ह॒त्वा तु दर्शा॑यिष्या॒मि श॑ꣳक्र॒ मा सौ॑म्य मे कुपः॥११॥

॥ *पदपाठः* ॥

न। अ॒हं। इंदु॑ं। प॒रा॒स्या॒मि। स॒र्पेभ्य॑ः। श॒त्रु॒० बा॒ध॒न॒। ह॒त्वा। तु। दर्शा॑यिष्या॒मि। श॒क्र॒। मा। सौ॒म्य॒। मे॒। कु॒प॒ः॥

॥ *भाष्यम्* ॥

गरुडो वदति। हे शक्र। हे शत्रुबाधन। शत्रूणां बाधाकर। शत्रून् बाधते इति शत्रुबाधनः। अहं सर्पेभ्यः इन्दुं सोमं न परास्यामि न प्रक्षिपामि न दास्यामि। किं तर्हि करिष्यामि। इतः सोमं हत्वा सर्पेभ्यो दर्शयिष्यामि। हे शक्र हे सौम्य। प्रसन्नमूर्ते। त्वं मे मह्यं मा कुपः। कोपं मा कार्षीः। *'क्रुधद्रुहेर्ष्यासूयार्थानामि'*ति (पा० १.४.३७) चतुर्थी। इति अष्टाविंशतितमोवर्गः॥

॥ पञ्चदशं सूक्तम् ॥

॥ एकोनत्रिंशो वर्गः ॥

तत इंद्रेणानुमतो वैनतेयः सोमकलशं हृत्वा समातृकाणां नागानां दर्शयामास एवं वदन्। किं?

अयं वं आहृतः सोमस्तं पश्यन्त्विह पार्थिवाः।
अहं चं मुक्तोऽस्म्यरुणश्चं मुक्तो
मुक्ता चं शुङ्गा विनता सुपर्णी॥१॥

॥ *पदपाठः* ॥

अयं। वः। आ०हृतः। सोमः। तं। पश्यन्तु। इह। पार्थिवाः।
अहं। च। मुक्तः। अस्मि। अरुणः। च। मुक्तः। मुक्ता। च।
शुंगा। वि०नता। सु०पर्णी॥

॥ *भाष्यम्* ॥

हे नागाः। वः युष्मभ्यं अयं सोमः आहृतः मया स्वर्गादानीतः। वः युष्मदर्थे पार्थिवाः कद्रूसुताः सर्वेऽपि भवन्तः तं सोमं पश्यन्तु। पृथिवी कद्रूः। सा हि कद्रूः पृथिव्या अवतारः अत एवमुच्यते। पृथिव्याः अपत्यानि पार्थिवाः। मया निवेदितं सोममृतं पश्यंतु। एनं गृह्णंतु। यथासुखं पिबन्तु। अनेन भवद्भ्योऽमृतार्पणेन अहं दासीपुत्रोऽपि दासत्वात् मुक्तोऽस्मि। च अपरं। अरुणः मद्भ्राता पंगुः सूर्यसारथिश्च प्राक् दासीपुत्रत्वाद्दासत्वं प्राप्तः। सोऽपि अधुना दास्यान्मुक्तः। च अपरं विनता मे माता शुंगेत्यपरपर्याया दास्यात् स्वयंकृतदोषोत्पादितात् मुक्ता। अमीषां सर्वेषामस्माकं दासत्वं गतम्।

सुपर्ण ऋगंतरेण स्वदास्यविमोक्षणं विशदयन् स्वस्य दौर्जन्यमपमार्ष्टुं सर्पेभ्यो हितमुपदिशति। गरुड उवाच सर्पान् प्रति,

अयं सोमः काद्रवेया मया स्वस्-
तृतीयात् पृष्ठाद्रजसो विमानात्।

आनी॑त॒ इन्दु॑स्तदु॑ वो ब्रवीमि॒
सं॒प॒श्यथै॑नं॒ प्र जि॑घाति॒ राजा॑॥२॥

॥ *पदपाठः*॥

अ॒यं। सोम॑ः। का॒द्र॒वे॒याः॑[ऊ]। मया॑। स्व१॑रिति॑ स्वः॑। तृ॒तीया॑त्। पृ॒ष्ठात्। रज॑सः। वि॒०मना॑त्। आ॒०नी॑तः। इंदु॑ः। तत्। ऊँ इति॑। वः॒। ब्र॒वी॒मि॒। सं। प॒श्यथ॑। ए॒न॑ं। प्र। जि॒घा॒ति॒[ए]। राजा॑॥

॥ *भाष्यम्* ॥

हे काद्रवेयाः मया स्वर् इति स्वर्गलोकात् अयं सोमः आहृतः आनीतः। किंलक्षणात् स्वः स्वर्गलोकात्। तृतीयाद्रजसः। रजःशब्दो लोकपर्यायः। *'लोका रजांस्युच्यंत'* इति यास्कः (४.१९)। तृतीयात् लोकादित्यर्थः। किंलक्षणात् तृतीयलोकात्। विमानात्। विमानमयात्। स्वर्गे हि सर्वेऽपि सुरगणाः वैमानिकाः एव वसन्ति। ते च विमानारूढा एव यान्ति। एवं विमानत्वं तृतीयत्वं। भूर्लोक-भुवर्लोक-स्वर्लोक इति क्रमात्। किं लक्षणात्। पृष्ठात्। स्वर्गस्य पृष्ठात्। सेव्यप्रदेशात्। यद्वा स्वः इति षष्ठ्येकवचनं। स्वःपृष्ठात्। नाकस्य पृष्ठात्। उक्तं च श्रुतौ मन्त्रभागे। *'नाकस्य पृष्ठे अधितिष्ठति श्रितो यः पृणातीति'* (ऋ० १.१२५.५)। तथा *'तृतीये पृष्ठे अधिरोचने दिवः'* (ऋ० ९.८६.२७) च। पृष्ठत्वं प्रसिद्धं। तत् तस्मात् कारणात् अहं वः युष्मान् प्रति ब्रवीमि। एनं सोमं सम्यक् यूयं पश्यथ? काकूक्त्या क्रियापदं प्रश्नार्थत्वात्। *प्रजिघाति* राजा। [पाठान्तरे] *प्रतिहाति* राजा। राजा इंद्रः एनं सोमं प्रजिघाति प्रेरयति। स्वकीयं नाकलोकं प्रति प्रेरयिष्यति। नेष्यति। तस्मात् रक्षणे यत्नं कुरुत। यद्वा एनं प्रति इं(द्रो) हाति जहाति त्यजति त्रपां [कृपां ?]। दयालुरपि निर्दयो भविष्यति। अथ [आदि-] वर्णलोपेन जहातीत्यर्थे हातीत्येवमेव। राजा सुराणां पतिः। अथवा *प्रतिहन्तीति* पाठः। सुरराजः एनं सोमं प्रति ये आकांक्षां कुर्वंति। ये तृष्णां कुर्वंति तान् तान् आकांक्षां कुर्वतः इंद्रोः हंति नाशयति। तस्मात् अमृते स्वप्राणरक्षणे च प्रयत्नं कुरुत। इंद्राद्भयं शंकनीयं।

[ऊ] 'का॒द्र॒वे॒याः' (हे कद्रूपुत्राः) इति संबुद्धिपदं सर्वानुदात्तत्वं विहाय कथमत्र 'वै॒न॒ते॒य'वद् अन्तोदात्तत्वं बिभर्ति, इत्यस्य कारणं चिन्तनीयम्। तदेव परस्यामृचि 'उ॒रो॒ग॒माः' इत्यत्र।

[ए] 'प्र-जिघाति' इत्यस्य स्थाने भाष्यकारः 'जिहीर्षति' इत्यपि संहितापाठे पाठान्तरत्वेनोल्लिखति, किन्तु नैतत् पदं कुत्रापि भाष्ये व्याख्यातं वर्तते। अपरे च पाठान्तरे 'प्रति-हाति' 'प्रति हन्ति' च, ये व्याख्याते।

इत्थं सुपर्णेन सोमकलशे नागेभ्यो दत्ते आत्ममातुः सपुत्रायाः दास्यमोक्षे सम्पादिते, पुनः पुनः प्रमाणवाक्यैर्दृढीकृते च, ततो दास्यविनिर्मुक्तकुटुंबे गरुडे यथेष्टगते सति, सपदि शक्रस्तत्रागत्य नागान् प्रति निःशंकमेवमुवाच। इंद्र उवाच नागान् प्रति।

अहं हरामि वः सोमं(मः)[१०] सर्वेषामनु धावताम्।
यो वीरः सोऽनु सदतु सर्वे वा वीरयध्वमुरोगमाः॥३॥

॥ *पदपाठः* ॥

अहं। हरामि। वः। सोमं। सर्वेषां। अनु। धावतां। यः। वीरः।
सः। अनु। सदतु। सर्वे। वा। वीरयध्वं। उरःऽगमाः॥

॥ *भाष्यम्* ॥

इंद्रः कथयति। 'अहं हरामि वः *सोमः*' हे नागाः अयं सोमः। वः युष्मभ्यं। गरुडेन दत्तं(:), तमिमं सोममहं हरामि। अथवा *अहं हरामि वः सोम*मिति पाठः। वः युष्माकं सोममहं हरामि। युष्माकं सर्वेषामेनं सोममनु लक्ष्यीकृत्य धावतां मध्ये यः कश्चिद्वीरः शूरो भवति। सः एनं सोमं अनु लक्ष्यीकृत्य सदतु। उपविशतु। सोमसमीपे तिष्ठतु। सीदतु इत्यस्य स्थाने सदत्विति छांदसः प्रयोगः। वा अथवा। हे उरोगमाः उरगाः यूयं सर्वेऽपि यदि शूराः भवथः। तर्हि सर्वे यूयं वीरयध्वं वीरत्वं कुरुत। शौर्यं दर्शयत। पराक्रमं कुरुत। अहं प्रसिद्धवृत्त्या सोमं हरामि। यदि शक्तिर्भवति तर्हि मया सह युध्यध्वं। इत्यर्थः। एवमुच्चैर्ब्रुवन्निंद्रः सोमकलशं हृत्वा दिवं गतः। ते नागास्तु निराशा बभूवुः। गरुडः प्रागेव यथेष्टं क्वापि गतवान्। गरुडस्यासंभिधाने(? अभिसंधानेन) इन्द्रो हृत्वा स्वर्गं गतः। इदं वृत्तं ज्ञात्वा गरुडः स्वर्गे इंद्र-समीपे गत्वा इंद्रं प्रति इत्थमुवाच –

अयं त आहृतः सोमो यं तेऽहमहरम्पुरेन्दुमिन्द्र[११]।
अहं च मुक्तोऽस्म्यरुणश्च मुक्तो
मुक्ता च शुंगा विनता निरोधात्॥४॥

---

[१०] 'सोमः' इत्येष भाष्यकारेण धृतोऽशुद्धः पाठः। मूले, पदपाठे च 'सोमम्' इत्यस्यैव निरवद्यपाठस्य स्वीकृतिः।

[११] 'पुरा'पर्यन्तमेवेयमनुष्टुप्पंक्तिः। 'इन्दुमिन्द्र'इत्यरिक्तान्यनपेक्षितानि पदानि। अग्रिमा पंक्तिस्त्रिष्टुप्।

॥ *पदपाठः* ॥

अयं। ते। आ० हृतः। सोमः। यं। ते। अहं। अहरं। पुरा।
इंदुं। इंद्र। ०। निरोधात्॥

॥ *भाष्यम्* ॥

गरुड उवाचेन्द्रं प्रति –

गरुडो ब्रूते। हे इंद्र। ते त्वया अयं प्रत्यक्षं दृश्यमानः सोमः आहृतः नागानां समीपात् आनीतः। अयं कः। यं ते त्वदीयमिंदुं सोमं। पुरा पूर्वस्मिन् मुहूर्ते अहं स्वयमेव अहरं स्वर्गात् हृतवानस्मि। अनेन त्वदीयेन सोमेन नागेभ्यो निवेदितेन अहं अस्मि मुक्तः निरोधात्। दासत्वात् दास्यात्। अरुणश्च निरोधात् मुक्तः। मम माता विनता च मुक्ताः। शुंगेति नाम्नी सा च निरोधात् मुक्ता॥ इत्थं त्वया उपकृतमिति भावः। अथेंद्रः स्वर्गे आगतं समीपस्थं गरुडं प्रति किंचित्प्रष्टुकामः प्रसंगोत्पादनाय प्रथमं स्वपराक्रमान् वर्णयति द्वाभ्यामृग्भ्यां।

इन्द्र उवाच गरुडं प्रति –

अहं पिप्रुन्नमुंचिं शंबरं च
हत्वा पुरेमं विप्रंचित्तिं विजित्यं।
द्यावांपृथिवी परिं दधे
वासंसीव वृत्रहा॥५॥

॥ *पदपाठः* ॥

अहं। पिप्रुं। नमुंचिं। शंबरं। च। हत्वा। पुरा। इमं। विप्रं०चित्तिं।
वि० जित्यं। द्यावां० पृथिवी इतिं। परिं। दधे। वासंसीऽइव।
वृत्र०हा॥

॥ *भाष्यम्* ॥

इन्द्रो वदति। हे गरुड। पुरा पूर्वस्मिन् काले अतीतकाले अहं ऋगादावुक्तांस्त्रीन् असुरान् हत्वा इमं प्रसिद्धं विप्रचितिं नामानं दानवं जित्वा इमे द्यावापृथिवी परिदधे परिधानीयं कृतवान्। कटिवेष्टनं कृतवान्। के इव। वाससी इव। *'अर्द्धमिदस्य प्रतिरोदसी उभे'* (ऋ० ६.३०.१) इति श्रुतेः। कीदृगहं। वृत्रहा। वृत्रं नाम असुरं हतवान् इति वृत्रहा॥ इंद्र उवाच गरुडं प्रति॥

अ॒हं ब॒ले॒नात्य॑ति॒तरं स॒पत्ला॒न्त्
सर्वं॑ भवामी॒द॒म॒हं बले॑न।

ए॒वं ब॒लस्यातिं॑बलस्य मे स्व॒तः(सु॒तः)[१२]
क॒थं स्वि॒दिन्दु॒ं सह॑सा जहर्थ॥६॥

॥ *पदपाठः* ॥

अ॒हं। बले॑न। अति॑। अ॒त॒रं। स॒ं०पत्ला॑न्। सर्वं॑। भ॒वा॒मि॒। इ॒दं।
अ॒हं। बले॑न। ए॒वं॰ ब॒लस्य॑। अति॑॰ बलस्य। मे॒। सु॒तः।
क॒थं। स्वि॒त्। इंदु॑ं। सह॑सा। ज॒ह॒र्थ॒॥

॥ *भाष्यम्* ॥

हे गरुड। अहं बलेन शक्त्या सपत्नान्। रिपून् अतिशूरानपि अतरं। तीर्णः। अहं बलेन शक्त्या इदं सर्वं विश्वं जगत् स्वयं भवामि। पृथिव्यादिरूपैः अहमेव भवामि विलसामि। तादृशस्य मे इंदुं सोमं, हे गरुड, त्वं कथं जहर्थ। केन प्रयोजनेन हृतवानसि। किमर्थं हृतवानसि? तद् ब्रूहि। कीदृशः(स्य) मे। मम एवं बलस्य। एवं पूर्वोक्तं पिप्रुनमुच्यादिहननसाधकं बलं यस्यासावेवंबलः। तस्य एवंबलस्य। तथा अतिबलस्य अति उत्कटं द्यावापृथिव्योः परिधानकरणादिकं बलं यस्यासावतिबलः। अस्य अतिबलस्य। स्विदिति प्रश्ने वितर्के च। कथमित्यनेन प्रयोजनं पृच्छति। तव सोमस्य ईदृग्दुःखाहरस्य प्रयोजनं किं? तदेव ब्रूहि। केन आहरणसाधनेन जहर्थ हृतवानसि। इत्याशंक्य स्वयमेव तद्वर्णयति। स्वतः सहसेति। स्वतः समुत्पन्नेन सहसा बलेन। स्वतः शरीरादुत्क्षिप्तेन सहसा बलेन। अनन्योत्पाद्येन। तवेदं सहः बलं कस्या[प्या]राधितस्य देवस्यानुग्रहात् त्वया न लब्धं। किंतु स्वत एवोत्पन्नं। तपश्चरणादिनिरपेक्षतया। यद्वा *'एवं बलस्याति बलस्य मे सुतः'* इत्ययमेव पाठः समीचीनः। मे मम सुतः। कनीयान् भ्राता। 'सूनुर्भ्रातरि पुत्रे चे'त्यभिधानग्रंथे सूनुर्लघुभ्रातेत्युक्तं। लघुरेव मंतव्यः। पुत्रे चेति पुत्रसाहचर्यात्

---

[१२] पदपाठकारेण, ग्रूबेमहोदयेनापि स्वीकृतस्य 'सुतः' इत्यस्य स्थानेऽत्र विद्यमानो यः 'स्व॒तः' इति पाठः, स तु लिपिदोषादुत्पन्नः। उकारस्य मात्रायाः वकाररूपेण पठनात्। भाष्यकारस्तु 'स्वतः' इत्यस्य स्थाने 'सुतः' इत्यपि पाठान्तरं स्वीकरोति, किन्तु 'अनुजः' इति रूपेण तद् व्याख्याति। वस्तुतः सवनार्थकस्य 'सु'-धातोर्निष्पन्नमेतन्निष्ठान्तं पदं सोमस्य विशेषणम्। 'मे सुतः[सोमः]' मदर्थं लताभ्यः सुतः निष्पीडितः इत्यर्थः। पदपाठे प्रथमं 'स्व॒तः' इति विलिख्य तदनन्तरं तत् 'सु॒तः' इति रूपेण परिवर्तितम्। किन्तु शुद्धं तु वस्तुतः 'सुतम्' (....मे सुतमिन्दुम्) इत्येव।

सूनुरित्यस्याभिधेये तात्पर्यं न शब्दे। अतः सुतोऽपि सूनुपर्यायत्वात् कनीयान् भ्राता भवति। इति एकोनत्रिंशत्तमोवर्गः।

॥ अथ त्रिंशो वर्गः ॥

कथं जहर्थेति पृष्टस्योत्तरं प्रत्यर्पयति –

मा॒ता मम॑ विन॑ता सुप॒र्णी
दा॒स्याद् दु॒:खम॑गमत् स्प॒र्द्धये॑न्द्र।
तस्यै॑ नि॒ष्क्रय॒स्तव॒ सोम॑ आसी॒त्
तमाह॑रं ते न वि॑घृ॒ष्टम॒न्यै:॥७॥

॥ *पदपाठः* ॥

मा॒ता। मम॑। वि०न॑ता। सु॒०प॒र्णी। दा॒स्यात्। दु॒:ऽख॑म्। अ॒ग॒म॒त्।
स्प॒र्द्धया॑। इ॒न्द्र॒। तस्यै॑। नि॒:ऽक्रय॑:। तव॑। सोम॑:। आ॒सी॒त्। तम्।
आ। अ॒ह॒र॒म्। ते॒। न। वि॒० घृ॒ष्ट॑म्। अ॒न्यै:॥

॥ *भाष्यम्* ॥

हे इंद्र, मम माता विनता दुःखं अगमत् प्रापत्। कस्मात्? दास्यात्, दासभावात्। कया दास्यमुत्पन्नं? स्पर्द्धया। असूयया। संघर्षेण। द्वेषेण। तस्यै मात्रे तवायं सोमः त्वदीयः सोमः निःक्रयः आसीत्। दासत्वनिःकृतये आसीत्। सोमार्पणेन दास्यात् निःकृतिः सर्पैरंगीकृता। अतः ते त्वदीयं तं सोममहमाहरं। आहृतवानस्मि। सोमहरणं कृतवानस्मि। किंलक्षणं सोममृतं। अन्यैः परैः विघृष्टं स्पृष्टं न। केनापि न स्पृष्टः। केनचित् अधुनापि स्प्रष्टुं न शक्यत एव।

गरुड उवाचेन्द्रं प्रति –

तव॑ सुप॒र्णो म॑घव॒न्स्तवेन्दु॑र्
भू॒तोऽसि॒ भव्य॑श्च भ॒वंश्च॑ शक्र।
त्वं गो॒प्तासि॒ शर॑णं त्वं सं॑मुद्रस्
तवे॒दं विश्व॒ं भुव॑न॒ं सं सु॒शा॑धि॥८॥

॥ *पदपाठः* ॥

तव॑। सु॒०प॒र्णः। म॒घ॒०व॒न्। तव॑। इंदु॑:। भू॒तः। अ॒सि॒। भव्य॑:।

च॒। भ॒वन्। च॒। श॒क्र॒। त्वं। गो॒प्ता। अ॒सि॒। शर॑णं। त्वं।
स॒मु॒द्रः। तव॑। इ॒दं। विश्वं॑। भुव॑नं। सं। सु॰ शा॒धि॒॥

॥ *भाष्यम्* ॥

गरुड आह। हे मघवन्। अयं सुपर्णो वैनतेयो मल्लक्षणो जनः तवैव। तावक एव। त्वद्दासः। इंदुः सोमश्च अमृतमयः तवैव। त्वदीय एव। यद्यपि मया आहृतः तथापि त्वत्स्वामिक एव। त्वं भूतोऽसि। अतीतकालोऽसि। भव्यो भविष्यंश्चासि। भविष्यत्कालोऽसि अनागतकालात्मासि। च अपरं भवन् वर्तमानकालोऽप्यसि। हे शक्र। त्वं सर्वस्य लोकस्य गोप्तासि। त्वं विश्वस्य शरणमसि। त्वं समुद्रोऽसि। असूयारहितोऽसि। मुत् हर्षः। आनंदः। मुदा सानंदेन सह वर्त्तंत इति समुदः पूर्णकामाः लोकाः। तान् राति[= लाति, *ला* आदाने] आदत्ते गृह्णाति अनुगृह्णातीति समुद्रः। सुखितेषु अनुग्रहमेव करोषि। न स्पर्द्धां। मत्सरं वा। इति समुद्रः। किंच इदं विश्वं तव। तावकमेव। विश्वस्य स्वामी त्वमेव। विश्वस्मिन्ममाप्यंतर्भावात्। तव सुपर्ण इत्युक्त्या विशेषतो मदीयप्रभुत्वाच्च मां सुतरां सं इति सम्यक् शाधि शिक्षय। आदिश। आज्ञापय नियुंक्ष्व। यतस्तवाहं नियोज्योऽस्मि। त्वं तु प्रभुत्वात् नियोक्तासि। अतः मां शाधि। *शासु* अनुशिष्टौ। अस्य धातोर्लोटि परस्मैपदं मध्यमपुरुषैकवचनं।

इत्थमिंद्रगरुडयोः संवादे प्रवर्तमाने पुत्रविरहं क्षणमात्रमप्यसहमाना विनता तद्दिदृक्षया स्वर्लोकमाजगाम। आगत्य च सविनयेन वचसा पुत्रस्यापराधमपमार्ष्टुमाह द्विपदामृचमिंद्र प्रति॥ विनतोवाचेंद्रं प्रति –

शूरं सु॑पर्णम॑रुणात्कनि॑ष्ठ-
मन्नं॒ प्रती॑या॒भि व॑दे॒ममि॑न्द्र॥९॥

॥ *पदपाठः* ॥

शूरं॑। सु॰प॒र्णं॑। अ॒रु॒णात्। कनि॑ष्ठं। अन्न॑म्। प्रती॑य। अ॒भि। व॒द॒। इ॒मं। इ॒न्द्र॒।

॥ *भाष्यम्* ॥

शूरं सुपर्णमरुणात्कनिष्ठमन्नं प्रतीयाभिवदेममिंद्र॥ इत्येषा द्विपदा।

अन्नमत्रामृतमेव। हे इंद्र। इमं सुपर्णं अन्नममृतमुद्दिश्य स्वर्लोके प्रागागतं, मातुर्दास्यविमोक्षणायामृतमाकांक्षन्तं, अमृतार्थे कृतापराधं प्रतीय ज्ञात्वा एनं अभि। अभिलक्ष्य। अभिमुखो भूत्वा सानुग्रहो भूत्वा वद। वात्सल्योपेतं वाक्यं वद। अनेन गर्वाहंकारादिदोषतो नापराद्धं। यत्तवामृतमाहृतं। किंतु आपन्निवारणार्थं

अपराद्धं। तस्मादस्मिन् कृपा विधेया। अत्र सोपयोगपदाध्याहारो युक्तो ज्ञेयः। अरुणादपि कनिष्ठमित्येतद्द्योत्पादनार्थं। बालत्वान्नास्य दोषः। बालत्वादौद्धत्यमपाप्रष्टुं अस्मिन् वत्सलो भवेत्यर्थः। अथेंद्रो विनतां विनीतामालक्ष्य सानुग्रहमना अमुष्यै वरं दित्सुराह। इंद्र उवाच विनतां प्रति॥

वरं॑ ददामि ते सौम्ये[१३] यं कं च॒ मन॑सेप्ससि।
मत्स॑ख्या॒दन्न॒ममृत॑त्वं वा॒चि त्वमे॒तदु॒भय॑ं वृणीष्व[१४]॥१०॥

॥ *पदपाठः* ॥

वर॑ं। द॒दा॒मि॒। ते॒। सौ॒म्ये॒। यं। कं। च॒। मन॑सा। ई॒प्स॒सि॒।
मत्०स॑ख्यात्। अन्न॑ं। अ॒मृत॑०त्वं। वा॒चि। त्वं। ए॒तत्। उ॒भय॑ं।
वृ॒णी॒ष्व॒॥

॥ *भाष्यम्* ॥

***'त्वमेतदुभयं तवेहेति* [तव इह इति]' केचित्पठन्ति।**

हे सौम्ये, अक्रूरे क्षांते दांते विनते। तं वरं ते तुभ्यमहं ददामि। तं कं च वरं [यं] मनसा ईप्ससि वांछसि। मम सख्यात् स्नेहात् अन्नममृतं लभ्यते। वाचि वाण्यां च अमृतत्वं माधुर्यं लभ्यते। त्वं हे विनते, एतदुभयं वृणीष्व याचस्व। सुधां पानार्थं। वाङ्माधुर्यं सकलार्थसिद्धये। त्वमेतदुभयं [प्राप्स्यसि]। 'तवेहेति' पाठे एवं योजना। हे विनते हे सौम्ये प्रसन्नमुखि अहं, ते तुभ्यं तं वरं इष्टं ददामि। तं कं वरं? यं कं च वरं त्वं मनसा ईप्ससि वांछसि। मम सख्यं मत्सख्यं। मैत्रे (मैत्रं) प्रसन्नत्वं। मत्प्रसादात् अन्नं पायसमोदकमंडकापूपौदनादिकविधं लभ्यते। वाचि अमृतत्वं। अपशब्दादिदोषराहित्येन दिव्यत्वं च लभ्यते। दिव्यवाक्त्वं प्राप्यते। तव इहैतस्मिन्प्रत्यक्षशरीरे त्वदीये पक्षिणीदेहे, एतदुभयमपि प्रागेव सिद्धं वर्तते। उभयं किं? यथेष्टमन्नमोदनादिकं। दिव्यवाक्त्वं च। अतः प्रसादातिशयादुत्फुल्ल-मनसा मया 'वरं ददामि ते सौम्ये मत्सख्यादन्नममृतत्वं वाची'ति यदुक्तं तन्न क्षोदक्षमं। अविचारितत्वात्। अतस्तव पुत्राय वरं दा[दित्]सामि। तदेव तवेष्टतमम्।

अपरया द्विपदयेंद्रो वैनतेयाय वरदित्सया ब्रूते॥ इंद्र उवाच गरुडं प्रति –

---

[१३] 'सौम्ये' इत्येतन्निश्चप्रचं 'सौम्य॒' (सौ॒म्य॒) इत्यस्यापपाठः (गरुडस्यकृते)। भाष्यकारस्तु 'सौम्ये' एव शुद्धं मन्यमानः, एतत्संबोधनपदं विनतया संबध्नाति, यत्तु प्रसंगविरुद्धम्॥

[१४] 'वृणीष्व' इत्यस्य स्थाने मातृकाद्वयं "तवेह" इति पठति।

तार्क्ष्यपुत्र त्वं ब्रूहि मनसेप्सितं। वरं वृणीष्व वैनतेय॥११॥

॥ *पदपाठः* ॥

तार्क्ष्य० पुत्र। त्वं। ब्रूहि। मनसा। ईप्सितं। वरं। वृणीष्व। वैनतेय॥

॥ *भाष्यम्* ॥

'तार्क्ष्यपुत्र त्वं ब्रूहि मनसेप्सितं वरं वृणीष्व वैनतेय', इति द्विपदा। हे तार्क्ष्यपुत्र। सुपर्ण। त्वं ब्रूहि वद। मनसा वांछितं वरं वृणीष्व, हे वैनतेय।

गरुड उवाचेंद्रं प्रति –

नागान्वृणे [95]भक्ष्यमहं शचीपते
वहेयं यज्ञं प्र विशेयं वेदान्।
अधीयीरन् मा ब्राह्मणाः स्वर्गकामास्
ते चाप्नुयुस्त्रिदिवे संसदं नौ॥१२॥

॥ *पदपाठः* ॥

नागान्। वृणे। भक्ष्यं। अहं। शचीο पते। वहेयं। यज्ञं। प्र। विशेयं। वेदान्। अधीयीरन्। मा। ब्राह्मणाः। स्वर्गο कामाः। ते। च। आप्नुयुः। त्रिο दिवे। संο सदं। नौ॥

॥ *भाष्यम्* ॥

हे शचीपते यदि त्वं प्रसन्नोऽसि, यदि मह्यं वरं दित्ससि तर्हि अहं इमं वरं वृणे। इमं कं वरं? नागान् सर्वानपि भक्षं वृणे। भक्षत्वेन वृणे। नागाः मम भक्ष्याः सन्तु। तथा यज्ञं इति जात्यभिप्रायेणैकवचनं। यज्ञान् सर्वान् वेदरूपेण वहेयं। वेदाः खलु मन्त्रब्राह्मणाभ्यां यज्ञान् वहंति। तथा वेदान् चतुरोऽपि प्रविशेयं। वेदानां मध्ये प्रविशामि तदात्मत्वेन। स्वर्गकामाः विप्राः मां सुपर्णाध्यायात्मकं अधीयीरन्। अधीयंतु। पठंतु। ते च विप्राः त्रिदिवे स्वर्गे नौ आवयोः संसदं सभां सुधर्मानामिकां आप्नुयुः प्राप्नुवंतु। इत्यमुं वरमहं वृणोमि।

[इतः परं ऋग्द्वयस्य मूलं भाष्यं च मातृकायां नास्ति]

---

[95] भाष्यकारस्तु 'भक्ष्यम्' इत्यस्य स्थाने 'भक्षम्' इति मूलपाठत्वेनाङ्गीकुरुते। पदपाठेनापि एतत् संपुष्यते। 'भक्षः–भक्ष्यम्' इत्दुभयोः समानार्थत्वात् वाक्याशये न किमपि अन्तरम्।

नागास्ते भक्षः सन्तु विहङ्गमेन्द्र
वह यज्ञं प्र विश शूर वेदान्।
अध्येष्यन्ते त्वा ब्राह्मणाः स्वर्गार्थाः[९६]
प्राप्स्यन्ति च त्रिदिवे संसदं नौ॥१३॥

॥ *पदपाठः* ॥

नागाः। ते। भक्षः। सन्तु। विहंगम०इंद्र। वह। यज्ञं। प्र। विश। शूर। वेदान्। अध्येष्यंते। त्वा। ब्राह्मणाः। स्वर्ग० अर्थाः। प्राप्स्यंति। च। त्रि०दिवे। सं० सदं। नौ॥

[*भाष्यमनुपलभ्यते*]

"[हे विहंगम, आकाशचारिन् गरुड, नागाः सर्पास्ते तव भक्षो भोज्यं भवन्तु इति मदीया आशिषः। हे शूर वीर, त्वं यज्ञं वह, सुपर्णरूपायां वेदिकायां देवेभ्य उत्सृज्यमानं द्रव्यं देवान् प्रति वह, प्रापय। देवतार्थे द्रव्यत्यागो यज्ञः। स्वर्गार्थाः स्वर्गकामाः, स्वर्गमुद्दिश्य प्रवर्तमानाः प्रयतमानाः वा ब्राह्मणास्त्वां अध्येष्यन्ते, त्वं च सर्वत्र वेदेषु छन्दोरूपेण प्रविष्टः स्थास्यति। 'छन्दांसि एव सुपर्णः' इति पूर्वे उक्तत्वात्। ऐहिकीं लोकयात्रामतीत्य एतादृशाः ब्राह्मणाः स्वर्गम् आगत्य अस्माकं संसदं सान्निध्यं प्राप्स्यन्ति।]" (*सम्पादकः*)

उदश्रयन्तु[९७] सर्पाः हर्षमाणाः सुपर्णं दृष्ट्वा त्रिदिवे पतन्तम्।
तान्भक्षयित्वा बलवाञ्छकुन्तो वर्द्धयन्बलमस्याध्यवर्द्धत॥१४॥

॥ *पदपाठः* ॥

उत्। अश्रयंतु[९७]। सर्पाः। हर्षमाणाः। सु०पर्णं। दृष्ट्वा। त्रि०दिवे। पतन्तं। तान्। भक्षयित्वा। बलं०वान्। शकुंतः। वर्द्धयन्। बलं। अस्य। अधि। अवर्द्धत।

---

[९६] 'स्वर्गार्थाः' इत्यस्य स्थाने 'स्वर्गकामाः' इति साधीयान् पाठोऽपि हस्तलेखेषु प्राप्यते।

[९७] 'उदश्रयन्तु' इति पाठश्चिन्त्यः। 'उदाश्रयन्त' (लङि), 'उदाश्रयन्तु' यदि वा 'उच्छ्रयन्तु' इति साधीयांसः पाठाः अभविष्यन्। 'उदाश्रयन्त' इति पाठे स्वीकृते 'उदतिष्ठन्' इति निर्गलितोऽर्थः ऋच उत्तरार्धेनानायासं संगच्छते।

॥ *भाष्यम्* ॥

"[उदश्रयन्तु उत्तिष्ठन्तु व्याकुलिता, भयेन रोमहर्षिताश्च सर्पाः सुपर्णम् आकाशे भ्रमन्तमुड्डीयमानं दृष्ट्वा तस्य स्वोपरि पातमुत्प्रेक्षमाणाः। तान् सर्पान् भक्षयित्वा शकुन्तो गरुडः पूर्वापेक्षया बलवत्तरो जातः, एवं क्रमशश्च तस्य बले महती वृद्धिरभवत्॥]" (*सम्पादकः*)। इति त्रिंशत्तमो वर्गः॥

॥ अथैकत्रिंशो वर्गः ॥

सुषूपर्वण्यवसानं महाद्रौ
कृत्वा नीडं शल्मलौ तं महान्तम्।
गरुत्मन्तं गरुडं वैनतेयं
पतत्रिराजमवसे जोहवीमि॥१५॥

॥ *पदपाठः* ॥

सु। सु०पर्वणि। अव० सानं। महाद्रौ। कृत्वा। नीडं। शल्मलौ। तं। महांतं। गरुत्मंतं। गरुडं। वैनतेयं। पतत्रि० राजं। अवसे। जोहवीमि।

॥ *भाष्यम्* ॥

अथ वामदेव ऋषिर्गरुडाराधनकामस्तमेवानयार्च्या आह्वयति। वामदेवो ब्रवीति। अहं महाद्रौ हिमालये नीडमावासगृहं आश्रमं कृत्वा तस्मिन् आश्रममध्यवर्तिनि नीडे पर्णकुटीरे अवसानं विश्रामं निवासं कृत्वा तत्र आसीनः सन् सुपर्वणि शोभनपर्वणि पुण्यकाले सूर्योपरागादौ तं गरुडं सुजोहवीमि। सुष्ठु यथा स्यात् तथा जोहवीमि। आह्वयामि। किंलक्षणे महाद्रौ पर्वते। शल्मलौ। *'शल्मलिः सुशरो भवति शरवान्वेति'* यास्कः (१२.१.९)। सुशरे। शोभनशरवणोपेते। शरवति। कीदृशं तं गरुडं, महांतं। शरीरेण गुणैश्च। गरुत्मंतं सुपक्षं। वैनतेयं पतिव्रता [विनता-]तनयं पक्षीन्द्रं अवसे स्वरक्षणार्थम्।

वामदेव उवाच –

स मैं स्तुतश्छन्दसा त्रैष्टुंभेन
होत्रैव घर्मः प्र जिंहाति वाचम्।

शुभं सुषीमं च सुखं च धेहि
वैनतेयो[१८] जह्येनः सपत्लान्॥१६॥

॥ *पदपाठः* ॥

सः। मे। स्तुतः। छंदसा। त्रैस्तुभेन। होत्रा।ऽइव। घर्मः। प्र। जिहाति। वाचं। शुभं। सु०सीमं। च। सु०खं। च। धेहि। वैनतेयः। जहि। एनः। स० पत्लान्॥

॥ *भाष्यम्* ॥

स गरुडः मे मया त्रैष्टुभेन छन्दसा त्रिष्टुप्छन्दसा स्तुतः सन् वाचं वरप्रदानस्वरूपां वाणीं प्रजिहाति आविष्करोति प्रकटयति। केन क इव? होत्रा घर्म इव। यथा होत्रा यज्ञे स्तुतः घर्मः, महावीरः प्रवर्ग्यः, ज्वालां प्रजिहाति आविष्करोति। *'शतयोजनेह वा एष इतस्तपतीति'* श्रुतेः वाचं प्रजिहाति प्रेरयति प्रकटयति, वरदानं वाणीं श्रावयति इत्यर्थः। किंच अहं वामदेवः एनं गरुडं एवं प्रार्थये। हे वैनतेय। मह्यं शुभं कल्याणं धेहि देहि। सुषीमं। सुष्ठु वर्णाश्रमधर्ममर्यादापालने शक्तिं च धेहि देहि। सीमा मर्यादा। सुखं संतोषं धेहि देहि। किंलक्षणस्त्वं? वैनतेयः विनता पतिव्रता तस्याः सुतः। तादृशस्त्वं एनः पापं जहि नाशय तथा मे सपत्लान् रिपून् जहि नाशय। वामदेव उवाच –

यद्यप्यस्तोकं यदि वाप्यहाऽशिंखं[१९]
सुपर्णं (वै?) मनसा श्रद्दधानः।
स एव नौ मृळतां दीर्घमायुर्
ददातु नश्चक्षुर्बलेन चिराय॥१७॥

॥ *पदपाठः* ॥

यदि। अपि। अस्तोकं। यदि। वा। अपि। अह। अशिंखं[१९]। सु०पर्णं। मनसा। श्रत्०दधानः। सः। एव। नः। मृळतां। दीर्घं। आयुः। ददातु। नः। चक्षुः। बलेन। चिराय॥

---

[१८] अत्र वैनतेय-पदं संबुद्धौ एव (आद्युदात्तं 'वैनतेय' इति) साधु स्यात्, जहि-धेहि-क्रियापदयोः तेनैव संगतिः।

[१९] 'अहासिषं' (त्यक्तवानस्मि) इत्यस्य विकारः प्रतीयते।

॥ *भाष्यम्* ॥

वामदेवो ब्रूते। अहं श्रद्दधानः श्रद्धालुः सन् मनसा सुपर्णं इति याचे। इतीति किं। स एव सुपर्णः नः अस्मभ्यं दीर्घं आयुर्ददातु। तथा बलेन सह चक्षुर्ददातु। नेत्रतेजो ददातु। चिराय चिरकालं दीर्घमायुर्ददातु। तथा स एव सुपर्णः नः अस्मान् मृळतां सुखयतु। किंलक्षणं आयुः। यद्यपि प्रकृत्या विधातृलिखित-ललाटरेखायां, अस्तोकं बहुलम्। अ इति खेदे। यदि वा मम आयुः प्रकृत्या अशिखं अल्पमेवास्ति चेत्। तथापि स एव चिराय दीर्घं ददातु। न विद्यते शिखा वृद्धिर्यस्य तत् अशिखं वृद्धिहीनं अल्पं ह्रस्वमित्यर्थः। विधातृलिखितकपालरेखायां यद्यपि ह्रस्वमेव चेत् तथापि स एव सुपर्णो दीर्घं चिराय आयुर्ददातु।

[अथ फलश्रुतिः]

अथ वामदेवक्रियमाणेन गरुडाराधनेन स्तवनेन च संतुष्ट इंद्रो वामदेवाश्रम आगत्य तस्यैवर्षेः सन्निधौ सुपर्णाध्यायाध्ययनफलश्रुतिं वामदेवं श्रावयति स्वयमेव मघवा॥ इंद्र उवाच वामदेवं प्रति –

यः सौ॑प॒र्णमधी॒यीत नित्यं॒ पर्व॑णि-पर्वणि।
वी॒रोऽस्य॑ पु॒त्रो जा॑येत मे॒धावी॑ ब्रह्मवर्च॒सी[१००]॥१८॥

॥ *पदपाठः* ॥

यः। सौ॒प॒र्णं। अ॒धि॰ ई॒यी॒त। नित्यं॑। पर्व॑णि॰ पर्वणि। वी॒रः। अ॒स्य॒। पु॒त्रः। जा॒ये॒त॒। मे॒धावी॑। ब्र॒ह्म॰व॒र्च॒सी॥ ०॥

॥ *भाष्यम्* ॥

हे वामदेव नित्यं निश्चितं यः पर्वणि२ पुण्यकाले युगादिप्रभृतौ संक्रमणव्यतीपात-द्वादशीप्रभृतौ चेदं सौपर्णं सुपर्णसंबंधि श्रौतमाख्यानमधीते अस्य अध्येतुश्चेत्पुत्रकामना स्यात् तर्हि अचिरात्पुत्रो जायते। कीदृक् मेधावी ग्रन्थग्रहणधारणशक्तः। ब्रह्मवर्चसं ब्राह्मं तेजः। स्वधर्मानुष्ठानसंभवं यत्तेजः तदस्य। तेजस्वीति ब्रह्मवर्चसी॥

इंद्र उवाच –

यः सौ॑प॒र्णमधी॒यीत नित्यं॒ पर्व॑णि-पर्वणि।
अनं॑न्त॒(तं)[१०१]-स्वर्गं॑मारो॒हेद् गच्छे॒न्मम॑ स॒लोक॑ताम्॥१९॥

॥ *पदपाठः* ॥

०॥ अनं॑न्तं। स्वर्गं॑। आ॒रो॒हेत्। गच्छे॑त्। मम॑। स॒॰ लोक॑तां॥

---

[१००] अस्मिन् मन्त्रे फलसंसूचिका क्रिया 'जा॒ये॒त' सर्वानुदात्ता किन्तु अग्रिमे मन्त्रे उभयमपि क्रियापदं (आ॒रो॒हेत्, गच्छे॑त् च) सोदात्तमिति विसंगतिः।

[१०१] सर्वास्वपि संहितापाठमातृकासु 'अनन्त'-पदमनुस्वारविरहितमसमस्तं च प्राप्यते। पदपाठमातृकास्तु 'अनन्तम्' इति पठन्ति।

॥ *भाष्यम्* ॥

हे वामदेव श्रृणु। यः त्वद्दृष्टमिदं सौपर्णं सुपर्णमाहात्म्यं सदा पर्वकाले स्वर्गकामः अधीते, असौ अनंतं अंतरहितं पुनःपातवार्जितं स्वर्गमारु(रो)हेत्। ननु स्वर्गाः नानाविधाः श्रूयंते। तेषां मध्ये कं लोकं प्राप्नोतीत्यत आह। ममेंद्रस्य सलोकतां गच्छेत्। समानो लोको यस्येति सलोकः। तस्य भावः सलोकता तां। अमरावतीं दिव्यनगरीं लभेतेत्यर्थः।

इंद्र उवाच –

अस्तिक्यादिह सौपर्णं यः श्रृणोतिं प्रणामंवान्।
आपद्भ्यः सर्वाभ्यो मुच्येत द्विषद्भ्यश्च प्रमुच्यंते॥२०॥

॥ *पदपाठः* ॥

आस्तिक्यात्। इह। सौपर्णं यः। श्रृणोतिं। प्र०नामंवान्।
आपत्०भ्यः। सर्वाभ्यः। मुच्येत। द्विषत्०भ्यः। च। प्र० मुच्यंते।

॥ *भाष्यम्* ॥

हे वामदेव। यः इदं त्वया दृष्टं एकत्रिंशद्वर्गमयं सौपर्णं सुपर्णदेवताप्रधानं वैदिकं आख्यानं आपन्निवारणकामः इह पर्वकाले पठेत्। कथं? आस्तिक्यात् वेदे विश्वासपूर्वकं। अस्ति वेदप्रामाण्यबुद्धिर्यस्य, वेदविरुद्धे मार्गे दृढतरमप्रामाण्य-निश्चयवती च बुद्धिर्यस्यासावास्तिकः। आस्तिकस्य भावः आस्तिक्यं। तस्मात् आस्तिक्यात्। प्रणामवान् भक्तिनम्रः। सुपर्णभक्तः। असौ सर्वाभ्यः आपद्भ्यः मुच्येत। तथा यः शत्रुपीडानिवृत्तिकामः पठति। असौ द्विषद्भ्यः शत्रुभ्यः। मुच्यते। शत्रुपीडाभ्यः मुच्यते।

इंद्र उवाच –

आख्यानं गर्भिणी येदं शृंणुयात् प्रंतिपर्वं चेत्।
पुमांसं जनयेत् पुत्रं बलिनं शत्रुतापंनम्[१०२]॥२१॥

॥ *पदपाठः* ॥

आख्यानं। गर्भिणीं। या। इदं। श्रृणुयात्। प्रति०पर्वं। चेत्।
पुमांसं। जनयेत्। पुत्रं। बलिनं। शत्रु०तापंनं।[१०२]

---

[१०२] भाष्यकारस्त्वत्र 'शत्रुतापनमुत्तमम्' इति पठति।

॥ *भाष्यम्* ॥

या पुत्रकामा स्त्री प्रतिपर्व सर्वेषु पर्वकालेषु पूर्वोक्तेषु इदं सुपर्णाख्यानं अमृताहरणाख्यं आदितः आन्तं शृणुयात्। पर्व पर्व प्रति इति प्रतिपर्व। सा प्रथमं गर्भं धारयति, ततः गर्भिणी सती चेत् शृणोति तर्हि पुत्रं जनयेत्। प्रसूते। कीदृशं पुत्रं। पुमांसं पुरुषार्थसाधनसमर्थं। शत्रुतापनं च। शत्रून् तापयति संतापयतीति शत्रुतापनस्तं शत्रुतापनं। उत्तममित्युत्कृष्टं। निर्दोषं सर्वगुणाधिकरणं च।

इंद्र उवाच गरुडं प्रति –

सौपर्णं चक्षुर्भवति श्रोतॄणामनसूयताम्[१०३]।
स्वर्गांश्च लोकान् गच्छेयुरावयोः कीर्त्तनात्सदा॥२२॥

॥ *पदपाठः* ॥

सौपर्णं। चक्षुः। भवति। श्रोतॄणां। अनसूयतां[१०३]। स्वर्गान्। च। लोकान्। गच्छेयुः। आवयोः। कीर्त्तनात्। सदा॥

॥ *भाष्यम्* ॥

इंद्रः गरुडं वामदेवाश्रमे आगतं दृष्ट्वा तं प्रति हर्षितः प्रसन्नोऽब्रवीत्। हे गरुड। ये ज्ञानकामाः इदं वामदेवदृष्टमेव त्रिंशद्वर्गात्मकं त्वदाख्यानं अध्येतुमक्षमाः शृण्वंति तेषां श्रोतॄणां शृण्वतां अवश्यं सौपर्णं चक्षुर्ज्ञानं भवति सर्ववेदसकलशास्त्रविषयं। ब्रह्मविषयमात्मज्ञानं ये [इ]च्छंति तेषां तदेव। ये तु त्रैकालिकं ज्ञानं वांछंतः शृण्वंति तेषां तदेव भवेत्। चक्षुः शब्दो ज्ञानवाची। अंधानां नेत्रविकलानां आंध्यनिवृत्तिकामनया शृण्वतां चक्षुरिन्द्रियं पटुतरं भवति। कीदृशां श्रोतॄणां। अनसूयतां असूयारहितानां। परगुणेषु द्वेषः असूया। न असूयं। परेषां गुणान् द्विषंतीत्यसूयंतः तेषां अनसूयतां। शत्रंतमेतत्। न असूयंतीत्यसूयंतः। न असूयंतः। अनसूयंतः। तेषां अनसूयतां। ईदृशाश्चेद्भवंति तर्हि सिद्धिं प्राप्नुवन्ति। नेतरे। हे गरुड, आवयोर्युष्मदस्मदोः अस्मिन् अध्याये वामदेवेन ऋषिणा यत्कीर्तनं कृतं तस्मात्कीर्तनात् तत्पठनाच्छ्रवणाद्वा तेन केवलमंधत्वान् न मुच्यंते। लोचनबलं लभंते। ते तु स्वर्गान् लोकांश्च गच्छंति। तेषां स्वर्गप्राप्तिरानुषंगिकी भवति। इमं इंद्रगरुडसंवादं श्रुत्वा हर्षितो वामदेव एतावुभौ द्विपदया नमस्कुरुते। तस्यां च वाक्याभ्यासो भक्तेरतिशयाद् ग्रंथसमाप्तिनिर्मितिश्च। सैषा द्विपदा। तामेव वामदेव उवाच –

---

[१०३] ग्रूबेमहाशयोऽत्र 'अनुसूयताम्' इति पठति यत्तु 'अनुश्रूयताम्' इत्यस्य विकृतिः प्रतीयते।

नमं इन्द्रसुपर्णयोर्नमं इन्द्रसुपर्णयोः॥२३॥

॥ *पदपाठः* ॥

नमंः। इंद्र०सुपर्णयोंः। नमंः। इन्द्र०सुपर्णयोः॥

॥ *भाष्यम्* ॥

चतुर्थ्याः व्यत्ययेन षष्ठी। इंद्रसुपर्णाभ्यां नम इत्यर्थः। 'अभ्यर्हितं पूर्वं'मिति वक्तव्यादिंद्रशब्दस्य पूर्वनिपातः। यद्वा षष्ठी स्वतंत्रा। अध्याहारेण योजना च। इंद्रसुपर्णयोः पद्भ्यां नम इति।

अथ वामदेवो ग्रंथस्य श्रुतिसमं प्रामाण्यं प्रतिपिपादयिषुः साक्षादृक्संहितांतर्गतां नेमेनर्षिणा दृष्टां सौपर्णीमृचमेवात्रोदाजहार ग्रंथांते। वामदेव उवाच –

मनोंजवा अयंमान आयसीमंतरत्पुरंम्।
दिवं सुपर्णो गत्वाय सोमं वज्रिण आ भंरत्॥२४॥

॥ *पदपाठः* ॥

मनंःऽजवाः। अयंमानः। आयसीं। अतरत्। पुरं। दिवं। सु०पर्णः। गत्वायं। सोमं। वज्रिणें। आ। अभरत्॥

॥ *भाष्यम्* ॥

सुपर्णः इंद्रेणामृतरक्षणार्थं निर्मितामायसीमयोमयीं पुरं नगरीं अतरत्। अत्र लक्षणया पूः शब्देन प्राकार एवानुल्लंघ्योऽथ [तस्य] भंगश्च लक्ष्यते। तं प्राकारमतरत् तीर्णः। अतिचक्राम। उल्लंघितवानित्यर्थः। कीदृशः सुपर्णः मनोजवाः सन् अयमानः गच्छन् व्योम्नि। '*अय*' गतौ। किं कृत्वा आयसीं पुरं आयसं प्राकारमतरत्। उल्लंघितवान्। दिवं द्युलोकं, गत्वा इति गत्वा[य]। '*क्तो यक्*' (पा० ७.१.४७) इति सूत्रेण। ततो वज्रिणः इन्द्रस्य सोमं इंद्रस्वामिकममृतं आ अहरत्। आहृतवान्। आहार्षीत्। षष्ठी शेषे। संबंध इत्यर्थः। इति एकत्रिंशो वर्गः॥

॥ इति सुपर्णाध्यायभाष्यं समाप्तं ॥

॥श्रीरस्तु॥

Section II
The Restored Text

A Short Note on the Restored Text

As has been mentioned in the Introduction, the text of the *Suparṇādhyāyaḥ* has come down to us in a highly unreliable form. There are obvious lacunae (*pāṭha-bhraṁśāḥ*), somewhere even big gaps, then additions and interpolations, and on the top of all that, highly corrupt and distorted readings. Disarrangement of the textual material at some stage also seems to have taken place. The restoration of the text, therefore, throws up a great challenge to the scholars. Till now seven outstanding Indologists have endeavoured to bring about some sort of consistency in the text by examining the readings delivered by the manuscripts and suggesting their own emendations and variants.

I have critically examined all the suggestions of the previous scholars, accepts some, rejects some and suggests some of my own. Further, I propose a different placement for certain verses which he thinks have drifted to a wrong place sometimes in the past due to reshuffled state of the folia in the archetype of all the existing copies.

It goes without saying that a lot of "subjective element" plays an important, or even the major role in such an effort and much of what an editor considers right or wrong depends upon his individual perspective, although every scholar tries to be as objective and as critical as humanly possible for him.

None of the previous scholars, nor the present editor, claims that he has finally restored the text to its pristine original form. Many future scholars are expected to come up

with other, more brilliant and more acceptable suggestions for the solutions of the *grantha-granthis* (to borrow a word from the poet Śrīharṣa!) which have formed themselves due to the incapacities of the ignorant scribes. However, every scholar-editor has tried to be honest to himself and has given his best according to his intellectual capacity.

Not every bird can sore so high in the sky as Suparṇa; some fly low, some move in the mid-region and some rise very high, "up above the world". "*Nabhaḥ patanty ātmasamaṁ patatriṇaḥ*", says the Ādikavi Vālmīki and we all agree with him.

A list of scholars who have critically examined and edited the text of *Suparṇādhyāya* is given herewith, with the bibliographical details of their works. Many of their views on the *emendationes* of the text have been given a "second thought" by me and discussed in the footnotes ensuing the text of each *sūkta*.

***Please understand that in order to take note of and to fully appreciate the emendations in the following Restored Text, one has to constantly refer to the original accented text along with its* padapāṭha.**

List of Authors and their Works discussed in the Notes

Caland, Willem, 1927, "Vedische Religion (1915-27), a Review", in *Archiv für Religionswissenschaft*, 25: 283-94.

Charpentier, Jarl, 1920-22, *Die Suparṇasage; Untersuchungen zur alstindischen Literatur und Sagengeschichte,* Uppsala-Leipzig.

Grube, Elimar, 1875, "Suparṇâdhâyaḥ", Suparṇī Fabula; Dissertatio Inauguralis ad summos in Philosophia honores in Alma litterarum Universitate Friderica Guilelma, Berolini (Berlin).

Hertel, Johannes, 1909, "Der Suparṇāadhyāya, ein Vedisches Mysterium", *Wiener Zeitschrift für die Kunde des Morgenlandes*, 24(3-4): 273-346.

——, 1919, *Indische Märchen* (A complete German translation of the *Suparṇādhyāya* is included in this collection of Indian stories by the same author), Jena, pp. 344-66.

Johansson, Karl F., 1910, *Solfågeln i Indien; En religionshistorisk-mythologisk Studie,* Uppsala: Uppsala University.

Negelein, Julius von, 1924, A Review Article (in German) on the *Suparṇasage* of Charpentier, in *Goettingische Gelehrte Anzeigen* (Annual Number), 186: 65-72 & 87-119, Berlin.

Oldenberg, Hermann, 1883, "Das altindische Ākhyāna, mit besonderer Rücksicht auf das Suparṇākhyāna", *Zeitschrift der Deutschen Morgenländischen Gesellschaft*, 37: 54-86.

——, 1919, "Zur Geschichte des altindischen Erzählungsstils", in *Nachrichten von der Königl. Gesell. der Wissenschaften zu Göttingen*, Phil.-hist. Klasse, of the year 1919, Berlin, pp. 61-94.

Rau, Wilhelm, 1967, "Zum Text des Suparṇādhyāya", *Zeitschrift der Deutschen Morgenländischen Gesellschaft*, 117: 353-62.

॥ सुपर्णाध्यायः ॥

Critically Restored Text with Notes

सविमर्शं समीक्षितः पाठः

॥ प्रथमं सूक्तम् ॥

प्रथमो वर्गः (१)

[आख्यानप्रशस्तिः]

सौपर्णानि पवित्राणि सूक्तान्येकादशाभ्यसेत्।[१]
वाञ्छन् पुत्रान् पशून् वित्तं स्वर्गमायुरनन्धताम्॥१॥

[मङ्गलाशंसनम्]

सौवर्णवर्णममितद्युतिमप्रमेयं
छन्दोमयं विविधयज्ञतनुं वरेण्यम्।
पक्षौ बृहच्च भवतो रथवच्च यस्य
तं वैनतेयमजरं प्रणमामि नित्यम्॥२॥

ये बालखिल्या मुनयः प्रसिद्धा-
स्तेषां तपोऽर्धेन विवृद्धतेजाः।
जातो गरुत्मान् परमेश्वरांशः
स नोऽनिशं रक्षतु पक्षिराजः॥३॥

यन्मङ्गलं सुपर्णस्य विनताऽकल्पयत् पुरा।
अमृतार्थं प्रयातस्य तन्मे भवतु मङ्गलम्॥४॥

[ऋषिच्छन्दोदेवतादि]

सुपर्णाख्यानमेकत्रिंशद्वर्गसूक्तम्, वामदेव ऋषि-

र्गरुडेन्द्रतार्क्षविनातकद्रूसर्पादेवाः देवतास्त्रैष्टुभं[२]
छन्दः, पर्वण्यध्ययने ब्राह्मणाभिश्रावणे च विनियोगः॥५॥

द्वितीयो वर्गः (२)

[प्रस्तोता सूत्रधारो वा]

द्यावापृथिव्यौ भवतो भगिन्यौ
ते मूर्त्तिमत्यौ चरतस्तु लोकान्।
द्यौरासीत् तत्र विनता सुपर्णी
भूमिस्तु नाग्यभवत् कद्रुनाम्नी[३]॥६॥

ते देवसत्रे अपराद्धवत्यौ[४]
ततो देवैर्जपहोमैः प्रबाधिते[५]।
प्रापद्येतां[६] तार्क्षमृषिं भयार्ते
दृष्ट्वाक्षि कद्रूवा हुतिभिर्विनाशितम्[७]॥७॥

पलाशपर्णवृन्तांस्तु[८] समिदर्थे गृहाणकौ[९]।
तरन्तौ गोष्पदे कौचित् पङ्कमग्नावुभावृषी॥८॥

पङ्के सन्नान्[१०] ऋषीन् दृष्ट्वा बालखिल्यांस्तु गोष्पदे।
इन्द्रेण हसितं, क्रुद्धास्ततस्तार्क्षमृषिं[११] गताः॥९॥

[बालखिल्याः तार्क्षं प्रति]

तपोऽर्द्धं तव दास्यामः सुतमुत्पादयाण्डजम्[१२]।
इन्द्रस्य विनयेद् दर्पमात्मसम्भावितस्य यः॥१०॥

[प्रस्तोता]

तपोऽर्द्धं बालखिल्यानां तार्क्षः[१३] पीत्वा महायशाः।
विनतायां दधौ गर्भमण्डजानामनुत्तमम्[१४]॥११॥

Notes on the Restored Text vis-à-vis the Original One

१ The opening verse explicitly mentions that the text consists of *eleven* hymns whereas in the present (extended?) form it has *fifteen* hymns. It is obvious that the text has been expanded with additional material and, possibly, some hymns may also have been split and rearranged. I suspect that the first two *sūktas*, composed for the most part in Anuṣṭubh, which provide the background of the story (i.e. the plot of this dramatic work) and the fully irrelevant, long description of devouring the Niṣādas by Garuḍa, which form the bulk of the 8th and 9th *sūktas* constitute some such material.

२ The MSS read "त्रिष्टुभं", but the actual word is त्रिष्टुभ् in feminine gender. Hence the *padapāṭha* renders it as त्रैष्तुभं, modified by us into त्रैष्टुभम्, to go with छन्दस्.

३ The MSS read कद्रुनामा which has been emended by Negelein 92.8 into ०नाम्नी.

४ The MSS uniformly provide the uncomfortable reading अपराध्नुवन्त्यौ (present participle?), hence this emendment by the present editor. We need a perfect participle here.

५ The text originally reads प्रबाधितैः qualifying the word देवैः. But in this context we expect a Locative in जपहोमैः (०होमे/होमेषु) which is not there and unless there is a previous mention of some harm/injury done to either कद्रु or विनता, the rationale of approaching the Sage Tārkṣa is not there. Hence I prefer to read प्रबाधिते (harmed), Fem. dual. Nom.

६ The text in the MSS and in Grube's edition had प्रपद्येतां which was correctly restored to its intended past tense (प्रापद्येताम्) by Negelein 92.9.

७ The text has कद्रूवाहुतिभिः. Both Caland 288, n. 4 and Rau think that there is a double *sandhi* between the two words and that the second word in आहुतिभिः (कद्रूवाः + आहुतिभिः >कद्रूवा आहुतिभिः > कद्रूवाहुतिभिः). This might be correct because there are several instances of this phenomenon in our text. But we can very well operate with हुतिभिः without distorting the intended sense.

८ वृन्तस्य[गृहाणकौ] is what has been handed down in the text which is grammatically problematic. I presume that the word वृन्त was originally in Accusative case (वृन्तान्, वृन्तांस्तु/वृन्तं तु). However, it must be granted that the Genetive in वृन्तस्य may denote "a part of the वृन्त" according to Vedic linguistic usage (cf. सोमस्य

पिबति=सोमस्य कञ्चिद् अंशं पिबति। वृन्तस्य गृह्णाति=वृन्तस्य कञ्चिदंशम् गृह्णाति).

९ The MSS, so also Grube, read actually गृहाननौ which does not make sense. Rau suggests amendment of the reading in form of गृह्णानकौ which is metrically impossible (if not also on other counts) making the 5th syllable of an Anuṣṭubh heavy. I, therefore, prefer the simpler and grammatically unproblematic गृहाणः, गृहाणकः (addition of the suffix कप् in स्व-अर्थ).

१० पङ्के सन्नान् is the reading delivered by MSS. Charpentier 210.26 suggests changing of सन्नान् into मग्नान् which is plausible in view of the readings of the previous verse and of the fact that from eleventh century onward, the formation of the letters स and म is very similar and म is liable to be misread as स. However, सन्न (originally meaning "sunk deep") in the sense of "smeared" has come down right up to modern Hindi: सना हुआ (पंक में), hence also not bad.

११,१३ All MSS read here तार्क्ष्य. But since Garuḍa himself has been referred to as such in the text (as well as in the *Ṛgveda* I.79. स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः), his father could only be तार्क्ष (= belonging to the clan of तृक्षु) whereas the patronym तार्क्ष्य does not make sense in this context.

१२ Rau strangely wants to change the correct अण्डजम् (सुतम्) into a vocative अण्डज (meant for तार्क्ष-कश्यप). This is unacceptable.

१४ All MSS read आण्डजानाम् instead of the correct अण्डजानाम्।

॥ द्वितीयं सूक्तम् ॥

तृतीयो वर्गः (३)

[प्रस्तोता]

लब्ध्वा बीजवरं पुण्यं शौनकी तु गुरूदरी।
शुद्धक्षेत्रे, च सम्पूर्णे कालेऽमुक्त त्रिरण्डकम्[1]॥१॥

आतुरा सा तु सुश्रोणी क्षतं कृत्वाऽग्रजाण्डके।
भिद्यमानोर्ध्वनिष्क्रान्ता[2] विद्युन् मेघसखाऽम्बरे॥२॥

ह्रिया सा परयाऽऽपन्ना[3] चिन्तयन्ती मुहुर्मुहुः।
मध्यमं निर्बिभेदाण्डं जातोऽर्कस्य सखाऽरुणः॥३॥

अरुणेन जातमात्रेण शप्ता माता तपोधना।
दुष्कृतं किं महाऽपुण्यं पादहीनोऽस्मि चण्डि हे!॥४॥

तस्मिन् प्रसूते रविराजगाम
ब्रुवन् वाक्यं देवि देहीति मह्यम्।
तव सुतोऽयं मम वाजिवेगान्[4]
धर्तुं शक्तो, भव च मोदमाना॥५॥

चतुर्थो वर्गः (४)

[प्रस्तोता]

गरुडस्य जातमात्रस्य त्रयो लोकाः प्रकम्पिताः।
प्रकम्पिता मही सर्वा सशैलवनकानना॥६॥

गगनं नष्टचन्द्रार्कं न ज्योतींषि चकासति[5]।
देवता भयवित्रस्ता नष्टचेष्टाश्च मारुतः॥७॥

नार्यो गर्भं न गृह्णन्ति समुद्राः शोषमागताः।
गावः क्षीरविवर्जिता विद्रवन्ति भयातुराः॥८॥

ब्राह्मणा वेदविभ्रष्टाः सर्वे त्रेसुरुरोगमाः[७]।
सर्वतो गरुडं ज्ञात्वा तमेव शरणं गताः॥९॥

ततः सर्वे यथास्थानं तत्क्षणेनोरुगा गताः[८]।
गरुत्मत्संभवे नष्टा पुनः सृष्टाः स्वयंभुवा॥१०॥

मघानक्षत्रजातानां सर्ववेदशरीरिणाम्।
सहस्रवर्षगर्भाणामग्निष्टम्भः स्म जायते[९]॥११॥

Notes on the Restored Text vis-à-vis the Original One

शब्देनासौ पृथिवीं दिवं च
संनादयन्नेति नभो दिशश्च।
मन्ये शौङ्गेयो गरुडोऽरुणो वा
प्रियः पुत्रो भवति मे क्षयेऽद्य[9]॥४॥

[*गरुडो अवतीर्य मातरं प्रति*]

नैनां (न तां?) बद्धः[10] परिहरेच्छतचर्मा[11] अनुच्छिदः[12]।
यामम्ब रौहिणस्याहं श्रान्तः शाखामधारयम्॥५॥

न हस्तिनं भक्षयित्वा बिलिन्थे
सहग्राहं, भुक्तवानस्मि शुङ्गे।
दिश भूयो भक्ष्यमन्यं महान्तं
यथा तृप्तः स्वः पथेयं क्षणेन॥६॥

षोडशो वर्गः (१६)

[विनता गरुडं प्रति]

जङ्गमः[१३] स्थावराण्यत्तीत्येषा[१४] वृत्तिः सनातना।
वयांस्युभयमश्नन्ति स्थावरं जङ्गमं च यत्॥७॥

निषादराष्ट्रं बहु नैकभेदं[१५]
तदद्धि त्वं मम कामाय शूर।
नाश्रावयन्ति[१६] न यजन्ति एते
अन्नं शिवं शुश्रुमैतद् गरुत्मन्॥८॥
ब्राह्मणं स्म तु मा हिंसीश्चरन्तं जनतामनु।
देवं क्षमापरं[१७] शूर स मृत्युर्न तवापरः[१८]॥९॥

[गरुडो मातरं प्रति]

एकशीर्षा ते[१९] द्विपादा द्विहस्ता
अवगृहीता मम चेत्[२०] सुपर्णि।
पृच्छामि त्वा विनतेऽहमेतत्
किं स्विद् रूपं भवति ब्राह्मणस्य॥१०॥

Notes on the Restored Text vis-à-vis the Original One

१ The text has come down with a hiatus between these two words. I have not disturbed it.

२ परिमाय्यम् "that which can be measured", other more common word with the same meaning is परिमेयम्, also परिमाप्यम्। परिमाय्यम् belongs to the older strata of the language as क्रय्य and जय्य, etc. cf. Pāṇ. VI.1.81-82.

३ The text reads here मघवन् which is totally out of context. Indra is nowhere in the scene. I follow the *Mahābhārata* and replace it with हिमवत्. Charpentier (240.20) prefers भगवन्त्.

४ The text has संवत्सरः a word which is commonly used in the sense of "year", also a calf; extended meaning a "son". There is no doubt as to the fact that the word intended to be used here is वत्सल (affectionate, beloved one) with dialectical change of ल into र "O Himavān, sitting on your back (top, summit, high plateau), this am I, your beloved son, who has been sent by his mother. . . ."

५ प्रहितः is an *emendatio* for निहितः of the text.

६ प्रवृङ्ग्धि = cast aside, throw away (the root is वृज्-वृञ्ज् (रुधादि, वर्जति-वृणक्ति, वृङ्क्ते).

७ बिलिन्थे, No one knows what it exactly means. Hertel has taken it to mean "deep valley" (*Abgrund*). Rau is in favour of translating it with "nest" or "perching place" (*Horst*). A few scholars like Georg V. Simson have surmised that it is a rare word of Indo-European origin meaning "flat surface", "brick platform" and connect it with the Greek "plinthos" (πλινθos) which survives in Latin as "plinthus" and in English as "plinth" (cf. *Greek Etym. Dictionary of H. Frisk*, Heidelberg 1970, 562f.). However it is difficult to agree with this interpretation since Garuḍa explicitly mentions in *sūkta* 7.4 that he being a bird does not like to consume its prey sitting on the ground (नास्मान् भूमौ भक्ष्यमाणं धिनोति), instead would like to perch on a tree.

८ The text has उपजायते (is coming into being) which is perplexing. Rau (p. 358) has given a good suggestion that it may mean "approaching", "coming back". I like to take the root जीव् with the prefix उप as meaning "to make living from", "to be alive on the basis of" (cf. *ṚV* I.164.42. तद् विश्वमुपजीवति). In the later semantic development, the root also acquires the meaning of "to eat", "to take food" (cf. the Hindi word जीमना). I suppose

that the expression उपजीवति is used in this very sense here as well. "One of my two children (the charioteer of the sun-god) is asleep (because it is night), the other is busy taking his food; who is then this calling me from above in such a pleasing voice"?

९ Charpentier (245.17) has difficulty with मे क्षयेऽद्य and suggests alternative readings like मोक्षायाद्य or मोक्षे मेऽद्य since he wrongly understands the word क्षयः as meaning "doom", "destruction" (*Verderben*) whereas it is obviously used in the sense of "home", "house". "I think, one of my dear sons is now coming back home."

१० बद्धः is to be understood as meaning "rope" (from the root बन्ध् = to bind), may be also "measuring tape". From references in the Brāhmaṇas we know that such tapes were made from the fine stripes of bovine hide joined together (therefore also referred to as औक्ष्णं चर्म cf. *ŚBr*. I.2.5 तां [पृथिवीम्] औक्ष्णैश्चर्मभिः पश्चात् प्राञ्चो विभजमाना अभीयुः।"). Garuḍa says that the length (or girth) of the broken branch could not be measured even with a hundred leather tapes joined together. The word बद्धः (rather बद्धी) has survived in Hindi in the from of बद्धी which means "a binding device", a strap.

११ परिहरेत् (परि + हरेत्) = "to go around" therefore "to measure". The *Mahābhārata* has a similar verse in this context in which the परिहरेत् appears as परिणहेत् (परि + नह् = to wrap around), परिणाह (m.) is girth, circumference, volume of something round in shape (cf. स्तनयुगपरिणाहाच्छादिना वल्कलेन", *Abhijñānaśākuntalam* I.18). The verse of *Mahābhārata* under reference is as follows:

न तां वध्रः परिणहेत् शतचर्मा महानणुः।
शाखिनो महतीं शाखां यां प्रगृह्य ययौ खगः॥ — I.26.19

MSS, Grube and the *Mahābhārata* all render the word बद्धः as वध्रः which connects it with the verb वध् which is not correct. वध् means to injure, to damage, to kill, वध्रः, वध्रिः is a castrated bull, known in Hindi as बधिया (बैल).

१२ अनुच्छिदः, I take it to mean "joined together", "joined in a series by making holes at the end", अनु = the following). The *Mahābhārata* discards this rare word in favour of a simpler expression महान् अणुः (exact sense of which is equally incomprehensible !). The reading अनुच्छदः (covering each other at the ends) could also be plausible.

१३ The MSS as well as the printed text of Grube has जङ्गमम् which is certainly wrong.

१४ Particle इति has been supplied by me and it is definitely required for the sake of completion of the sentence and for the metre, unless we concede a hiatus between त्ति and ए. It has been dropped in the MSS, obviously due to haplology.

१५ The text has एकभेदम् which has been explained by Rau as meaning "uniform", "without having group or caste division" (*von einerlei Art, d. h. ohne Kasten*). Not bad. But how to explain बहु preceding it? I therefore emend it into नैक which is the same as अनेक (although a little tautological in conjunction with बहु!), "many multiple groups, therefore not united", "having differences with each other, quarrelling with each other". भेद cannot go with एक. It should be रूप (एकरूपम्), if the intended meaning suggested by Rau is to be accepted.

१६ आश्रावयन्ति has been understood by Rau to mean "to invoke in sacrifice" on the authority of the *Kaṭha Saṁhitā* 25.1, 27.6, 31.13, etc. However, to be precise: आश्रावणं is that particular rite in the sacrificial ceremony in which the "Adhvaryu" asks the "Āgnīdhra" whether all the preliminaries for invocation of deities are fulfilled and whether the "Hotā" can now proceed to invoke the deities by reciting *mantras*, lit. whether he can now "make the *mantras* be heard" (Causative of the root *śru*)? Upon receiving the consent of "Āgnīdhra", the Adhvaryu asks the "Hotā" to recite the prescribed *mantras* for invocation of deities to the sacrificial altar.

A good conjectural reading for न यजन्ति (to avoid the repetition of the sense of the previous statement) could be न पठन्ति, i.e. "they neither learn the Vedas nor recite them".

१७ Oldenberg [(2) 92 fn.1] would like to have here the word क्षमाचरं which is hardly common in Sanskrit. There is no need to replace or emend the original.

१८ All MSS read तव परः. I am absolutely sure that the original text had तव-अपरः (not anyone else for you). A long sixth syllable is also the demand of the metre.

१९ ते is added by me. Without it not only the sentence looks incomplete, but also the *pāda*. ये could be equally good.

२० The text has ते which does not seem to serve any purpose. I find that instead we need चेत् (in case). "All of them have one

head, two legs and two hands. In case I catch one, how to distinguish a brāhmaṇa from the others?"

Additional Note

[२१] Note that the *sūkta* ends here quite abruptly which is very unusual. Garuḍa raises a question and the answer of Vinatā appears only in the next *sūkta* whereas it could have been easily accommodated in this very hymn which is rather short. This would also have done justice to the principle of "सन्निधि" of Indian hermeneutics.

॥ नवमं सूक्तम् ॥

सप्तदशो वर्गः (१७)

[*विनता गरुडं प्रति*]

[1]रजस्वलो जटिलः पङ्कदन्तो-
न्नीतशिखो[2] वदति सत्यमेव।
अमित्रमध्ये न बिभेति मृत्योः
स ब्राह्मणस्तं स्म मा हन् गरुत्मन्॥१॥

षळग्नयो[3] यं पुरुषं तपन्ति[4]
जैह्वो हार्द औदरो रैतसश्च।
तप्तश्च घर्मः शिशिरञ्च शीतं[5]
स ब्राह्मणस्तं स्म मा हन् गरुत्मन्॥२॥

मत्स्य इव[6] बिलिश[7] जग्रसानो
गुरूदरो भवति ब्राह्मणेन।
अङ्गारेव[8] विदहन्नेति कण्ठं
स ब्राह्मणस्तं स्म मा हन् गरुत्मन्॥३॥

[*गरुडो मातरं प्रति*]

आहरिष्यामि ते सोमं ज्ञातो भक्षः सनातनः।
माऽन्ततो भक्षयिष्यामि उभयं स्थाष्णुं[9] जङ्गमम्॥४॥

[*प्रस्तोता*]

अष्टादशो वर्गः (१८)

ततः सुपर्णः समयाद्[10] बुभुक्षितो
मात्राऽऽज्ञप्तो[11] भक्षयन्[12] वै निषादान्।
आकृष्य पक्षावनुगम्यमानान्
संप्राप्यमानांस्तु[13] मुखे[14] प्रयच्छते॥५॥

उत्प्लुत्योत्प्लुत्य भक्षाणो[१५] निषादान् वै विहङ्गमः।
गते कण्ठे तु चैकस्मिन् दहते[१६] स्माग्निराशिवत्॥६॥

निर्धूमे निष्फुलिङ्गे च[१७] आर्तः शुङ्गावचः स्मरन्।
"अहो वीर्यं द्विजातीनां ज्ञातिमात्रोपजीविनाम्[१८]"॥७॥

[*गरुडो ब्राह्मणं प्रति*]

निष्क्रमास्मद्[१९] (०आस्याद्?) द्विजश्रेष्ठ
न भक्षस्त्वं[२०] हि मे भवेः।
एते भक्षा मयात्रोप्ता[२१]
न त्वं शोचितुमर्हसि॥८॥

[*ब्राह्मणो गरुडं प्रति*]

न मन्ये जीवदात्मानं[२२] भार्यापुत्रैर्विवर्जितः।
द्विजस्तु सनिषादीकः ससुतस्त्वन्मुखे विषम्॥९॥

[*पुनः प्रस्तोता*]

सजनं तं द्विजं त्यक्त्वा
तीर्त्वा चाज्ञां विहङ्गमः।
इतरान् भक्षयित्वैव
सिद्धिं (स्वर्गं, तृप्तिं?) यातस्ततो ध्रुवम् (द्रुतम्?)[२३]॥१०॥

Notes on the Restored Text vis-à-vis the Original One

१ This verse appears in the MSS as the last verse of the previous hymn. I have brought it here as the first verse of this *sūkta* for good reasons. The identical refrain of the 4th *pāda* (स ब्राह्मण: . . .) of this verse makes it a part of the Kulaka (group) formed by verses 1-3. Making verse 1 as part of the last hymn interrupts the answer of Vinatā on the query of Garuḍa.

२ पङ्क्तदन्तोन्नीतशिख: is again a case of double *sandhi* (पङ्क्तदन्त: + उन्नीतशिख:) with the drop of *visarga* in the first stage and thereafter *a+u* giving rise to an ओ. The formation of the compound उन्नीतशिख: and its sense are both quite clear. I, therefore, fail to understand why Charpentier (243.11) wants to change it into उष्णीषी स, Negelein (100.21) into उष्णीषी च and Rau (with a question mark) into ऊर्ध्वशिख: (p. 359)? Perhaps they all have the appearance of traditional south Indian brāhmaṇas in mind. A hundred years ago every adult man wore turban in India, not only brāhmaṇas.

३ All MSS read a dental ल (षलग्नय:) here, being of north Indian origin; but the only correct Vedic form demands a cerebral one (ळ) or a ड if the *sandhi* rule is properly applied.

४ Rau draws our attention to a similar idea expressed in *AB* 8.24.6.

५ The text has शिशिरश्च शीत:, but as शीतं is neuter gender, I have emended it accordingly.

६ Quite often the rules of *sandhi* in our text adjust themselves to the demand of the metre. Whereas we have a regular *sandhi* (drop of *visarga*) in मत्स्य इव, in अङ्गारेव the process of *sandhi* has been carried out twice: अङ्गार: इव > अङ्गार + इव > अङ्गारेव. Both *pādas* have the prescribed number (11) of syllables.

७ The word बिलिशं denotes the "hook" of a fishing rod. A fish is doomed when it tries to swallow it, so is a Brāhmaṇa for Garuḍa. The word appears as बडिशं in the *Vālmīki Rāmāyaṇa* (झषवद् बडिशं गृह्य शीघ्रमेव विनष्यति. . . .) and also in the *Mahābhārata* II.24.6 (निगीर्णं बडिशं यथा). The ड of the *Rāmāyaṇa* and *Mahābhārata* seems to presuppose a cerebral ळ. It was probably a dialectical word taken from fishers' language and had more than one form (बडिश, बळिश, बिलिश, बिडिश, etc.).

८ अङ्गारेव is yet again an incidence of double *sandhi* which takes place after the drop of the *visarga* (अङ्गार: + इव = अङ्गार इव). Instead of the recommended *hiatus* between the two in this

instance, the words are made to coalesce with each other.

[९] Charpentier (244.15) finds स्थास्नु to be grammatically more correct.

[१०] The *padapāṭha* splits this word as सं-अयात् (went, went on) where the prefix सं (= together) does not seem to carry any meaning unless we take it just as a reinforcement of अयात् (सं = सम्यक्). This verb form is related to भक्षयन् in the sense of past continuous: भक्षयन् (सं) अयात् = went on devouring. For similar expression cf. "तत् त्वा यामि ब्रह्मणा वन्दमानः" (*Ṛ.V* I.24.11) = "I go on praising you with my verses"; "यत्सत्यं विरतेऽपि गीतसमये गच्छामि शृण्वन्निव" (*Mṛcchakaṭikam* III.5) = "I still go on as though listening to it even after the song is over". Another (better?) possibility is to take समयाद् as an ablative sing. form of समयः = agreement, covenant (derived from Latin *co-venire* = to come together; समयः has the same formation सं + इ = to go together). समयाद् भक्षयन् = devouring as per agreed upon.

[११] मात्राऽऽज्ञप्तः was first suggested by J. Hertel (p. 311 fn. 1) which I fully endorse. The text originally has मात्रा आज्ञातः according to *padapāṭha*. Rau (359) finds it in order and would like to leave it as an ablative of the word आज्ञा (आज्ञा + तसिल्) in the sense "on account of 'or' because of, the permission (or order) of the mother". However, it is not convincing, since in this case we would expect the word for the mother in genetive, i.e. मातुः .

[१२] भक्षयन् is an *emendatio* of the original भक्ष यान् of the text which has caused headache to many scholars, except Charpentier (245.31ff.) who accepts it as it is. Negelein (101.30) has भक्षय वै निषादान् and Rau suggests (359) भक्षितवै निषादान् where भक्षितवै is the Vedic infinitive for भक्षयितुं which is to be syntactically taken with मात्राज्ञातः (acc. to Rau मातृ + आज्ञातः). The other good possibility is [अ]भक्षयत् (मात्राऽऽज्ञप्तोऽभक्षयद् वै . . .) = devoured.

[१३] संप्राप्यमानान् appears in the text as संप्राप्यान् which also renders the *pāda* short by one syllable. Negelein (101.30) suggests संप्राप्य तान्. Rau is satisfied with adding just a स्म at the end (सं प्राप्यांस्तु मुखं प्रयच्छते स्म) which however brings the metre in doldrums. Further, the addition of स्म with the verb in present tense makes it a form of the past which is not required. I have emended this unsatisfactory reading into a parallel Present Participle Passive form in order to go along with अनुगम्यमानान्. My second choice would be संप्राप्तान् (add तान् before तु, if necessary, i.e. संप्राप्तांस्तांस्तु).

[14] मुखं of the text is grammatically incorrect. We do not need a direct object but a locative ('puts in mouth'). Further, one expects rather प्रयच्छति.

[15] The text has a problematic reading भक्षाणां which is syntactically not connected with any other word. Hertel's brilliant emendation (311 fn. 2) भक्षाणः is quite acceptable, contrary to, भक्षान् तान् of Negelein (102.6) and भक्षानान् निखादन् of Charpentier (246.11ff.). According to the latter निषादान् is a hyper-Sanskritization of निखादन्!

[16] The MSS read दह्यते स्म (विहङ्गमः). Though grammatically not problematic, I consider this passive form unnecessary in the absence of any Instrumental (तृतीया) in the sentence and especially in view of the fact that the root दह् is both transitive (अग्निस्तृणं दहति) and instransitive (वनं दहते, the forest is on fire). विहङ्गमोऽग्निराशिवद् दहते is therefore equally correct. A good example of the use of दह् (*ātmanepada*) in intransitive sense is the following verse from the *Rasamañjarī* of Bhānudatta (verse 12):

लोलालिपुञ्जे व्रजतो निकुञ्जे स्फारा बभूवुः श्रमवारिधाराः।
दहे, समीहे भवता विधातुं धीरं समीरं नलिनीदलेन॥

[17] For the original reading निर्धूमे विष्फुलिङ्गे च Charpentier suggests (246.26) निर्धूमविष्फुलिङ्गेन. I would rather prefer निर्धूमे निःस्फुलिङ्गे च.

[18] The MSS read जाति which since many hundred years is used in the narrow sense of "caste". I think that ज्ञाति (= ज्ञानं, knowledge) suits better the context. The brāhmaṇas do not "make a livelihood" by simply having been born as such but, as the last verse of *varga* 16 and the first verse of 17 suggest, "because they indulge in severe penance and practice high moral values". In the present context stress is laid on their being knowledgeable.

[19] अस्मद् is ablative, "from us", but the text has अस्माद् which does not give any relevant meaning. Rau draws attention to a similar verse occurring in this story in the *Mahābhārata* I.25.2, which has the excellent reading आस्याद् (द्विजोत्तम विनिर्गच्छ तूर्णमास्यादपावृतात्). We ought to read hence निष्क्रमास्याद् "get out of my mouth".

[20] The text always prefers भक्षः even where भक्ष्यः could be more appropriate. The word भक्षः means "food" and it appears often in the *Ṛgveda* in this sense.

२१ अत्र = here, before you. उप्ताः originally "sown"; here most probably "thrown out" and "planted on earth", "made to stand on ground". If ०त्रोप्ता is allowed to change into न्युप्ताः (*ni* + *vap* = "to bury") which occurs in the *Ṛgveda* in the sense of "to kill" (cf. अन्यं ते अस्मन् नि वपन्तु सेनाः, *ṚV* II.33.11), it would simply mean, "Whatever was [to become] my food (*bhakṣaḥ*), I have already swallowed down the gullet. *You* ought not to become my food."

२२ जीवदात्मानं is grammatically problematic: We expect जीवन्तमात्मानं which may not have been there since it makes व, the 5th syllable heavy (*guru*).

२३ The language of this *pāda* is not impressive; भक्षयित्वा च and तृप्तिं यातस्ततः पराम्, स्वः प्रयातस्ततः परम् (or स्वर्गंयातः . . .) is expected in view of the context. The emendation of Charpentier (247.27):

सजनं तद् द्विजं त्यक्त्वा . . . विहङ्गम। इतरान् भक्षमापन्नो (!)
सिद्धिर्भवति ते ध्रुवम्॥

is much worse than the original.

As far as ध्रुवम् (for sure) is concerned, I find its use at this place quite unusual and not much contributing to the intended sense. There is a strong likelihood of its being a corruption of द्रुतम्.

॥ दशमं सूक्तम् ॥

एकोनविंशो वर्गः (१९)

[*खे उत्पतन्तं गरुत्मन्तं प्रति प्रस्तोतुः स्तुतिः, सर्वेषां वा समवेततया*]

वयसां राजानमभिमातिषाहं[1]
दिव्यं सुपर्णं वचसा[2] बृहन्तम्।
शूरं [3]सुवर्णमभियत्प्रतीपम्[4]
तार्क्ष्यं शौङ्गेयं नमसोपतिष्ठे॥१॥

[*विहायसा स्वः प्रत्युत्पतन्तं गरुत्मन्तं वीक्ष्य देवगुरुबृहस्पतिकृते प्रश्ने उत्तरयति गरुत्मान्*]

अहं सुपर्णः पततां वरिष्ठो
मात्रा शिष्टः[5] सोमहारश्चरामि[6]।
भौजिष्यमृच्छत्यरुणस्य माता
तन्मा [7]शिवेनाभिवद[8] द्विजेन्द्र॥२॥

[*बृहस्पतिः*]

अभ्यायुषा वर्चसा त्वा वदामि
कच्चिद् वस्तात् कुशलं गृहेषु।
कच्चिद् गरुत्मन्नरुणस्य[9] माता
न शोचति स्पर्द्धनं मानसे[10] वा॥३॥

[*गरुडः*]

वेदाहमन्यत्[11] कुशलं गृहेषु,
दास्याद् दुःखं वेदयते सुपर्णी।
आमन्त्रये त्वा वदतां[12] वरिष्ठ
पताम्यहं त्रिदिवमिन्दुमच्छा[13]॥४॥

[बृहस्पतिर्गरुत्मन्तम् आशिषा योजयति]

यज्ञस्तु[१४] त्वा रक्षतु दक्षिणा[१५] च
वारं वरीयः[१६] पततः पूर्वमस्तु[१७]।
ऋचो यजूंषि परितः[१८] सुपर्ण
सर्वाणि हौत्राण्यभितः[१९] (अभि त्वा?) श्रयन्ताम्॥५॥

(नेपथ्ये)

[सर्वे समवेतस्वरेण गरुत्मतो वर्चोबलवर्धनार्थं तम् ऋग्युगलेन स्तुवन्ति]

स्वस्त्यनं तार्क्ष्यमरिष्टनेमिं
महद्भूतं वायसं देवतानाम्।
असुरघ्नमिन्द्रसखं समत्सु
बृहद्यशो नावमिवारुहेम॥६॥
अंहोमुचंमाङ्गिरसं गयञ्च
स्वस्त्यात्रेयं, मनसा च तार्क्ष्यम्।
प्रयतपाणिः शरणं प्र पद्ये
स्वस्ति संबाधेष्वभयं नो अस्तु॥७॥*

विंशो वर्गः (२०)

[इन्द्राबृहस्पती स्वर्लोके परस्परं संलपतः]

[इन्द्रो बृहस्पतिं प्रति]

अपि स्वित् किञ्चिदिह भूतमस्ति
भूत[२०] भविष्यद्वाऽपि बृहस्पते।
यन्मे रक्षां निहितामतीत्य[२१]
वीर्येण सोमं सहसा हरेदितः॥८॥

[बृहस्पतिः इन्द्रं प्रति]

षष्टिं सहस्राणि रजसश्चितीनां
नवनवतीर्नद्याः शतानि।
आहरिष्यति गरुडो वैनतेयः
प्रासहा सोमं निहितं जिहीर्षुः[२२]॥९॥

---

* ऋक्परिशिष्टान्तर्गतं चतुर्थाष्टकस्य तृतीयेऽध्याये सप्तमवर्गानन्तरं स्थितमृग्द्वयम्। खिलाध्याये सप्तमसूक्तान्तर्गतम्।

[इन्द्रस्य बृहस्पतिं प्रति प्रश्नः]

कुतः स्विज्जातः?
कस्माल्लोकात्?
कतरस्याः पृथिव्या?
भौवनं यो युयुत्सति धनुर्ग्राहमनुत्तमम्॥१०॥

[बृहस्पतिः]

सुपर्णी विनता नाम तपोऽतप्यत दुष्टरम्।
तस्यां जातो गरुडो वैनतेयो,
यश्च सोमं हर्ता शकुनिः, तस्य विद्धि॥११॥

Notes on the Restored Text vis-à-vis the Original One

१ अभिमातिषाहम्, षाह्/षाट्/षाद् are the Vedic forms derived from the root सह् = to withstand, to conquer. अभिमाति is insidious, inimical, enemy.

२ The text originally has वयसा ("through the bird"?, "by virtue of age"?) which is a repetition of the opening word of this verse. It does not give any sense in conjunction with बृहन्तम्. वचसा is my conjecture which is not only nearest to the handed down reading but also has a strong case of being correct. It is a common aspect of the Vedic world-view that glorification of a god through hymns or words of praise increases his power (cf. *ṚV* 2.12.14 यस्येदं [इन्द्रस्य] ब्रह्म वर्धनम् . . .). The dwarf Viṣṇu assumes a gigantic form when gods surround him and sing his praise (cf. *ŚB* I.2.5.6-7). Even in the Kiṣkindhā-Kāṇḍa of the *Rāmacaritamānasa* of Tulasīdāsa, Hanumān recollects his real power and assumes a gigantic form before crossing the ocean to Laṅkā when other monkeys, especially Jāmavanta start singing his glory:

कवन सो काज कठिन जग माहीं, जो नहिं होत तात तुम्ह पाहीं।
राम काज लगि तव अवतारा, सुनतहिं भयउ पर्वताकारा॥ — *RCM* IV.29-30

By the way, the Hindi word बधाई [देना] which means to "congratulate" also comes from वर्धापनम् (बढ़ाना = "to increase [the self-confidence of someone and to let him feal great]".

३ The text had once more the word सुपर्ण here with which I feel uncomfortable. No poet would use the same word (or name) twice in the same verse in the same sense. Since Garuḍa is said to have wings and feathers of gold or golden colour I have replaced this second सुपर्ण with सुवर्ण, the nearest, possible alternative (which also simply means "of nice appearence", "of good colours").

४ अभियत्प्रतीपम् an *emendatio* from अभियत्प्रतीकम्। अभियत् is a person who is marching against someone, an adversary, enemy (cf. the word अभियान = campaign, attack). प्रतीप (etym. "against the current") is the one who is capable of repelling him. प्रतीक is more commonly used in the sense of "sign", "symbol".

५ मात्रा–आदिष्टः or मात्रादिष्टः (मातृ+आदिष्टः), मात्रा दिष्टः and मात्रा–आशिष्टः are all possible conjectures. मातृ (or मात्रा) आदिष्टः or दिष्टः ("as ordered", "as directed") may not be that good because it was not the mother who asked or suggested him to go. शिष्टः (or

आशिष्टः) would mean "as instructed", "well instructed", "under instructions from", etc.

[६] Rau (359) suggests सोमहरः which is not as good as the सोमहारः of our text. सोमहारः is the one who "carries" *soma* (cf. स्थाणुरयं भारहारः किलाभूद् अधीत्य वेदं न जानाति योऽर्थम् — *Nirukta*), whereas सोमहरः is the one who "steals", "snatches", "takes away" *soma*. Even though it might have happened so later, Garuḍa would not have thought of himself as so, or at least avoid to admit it before Bṛhaspati from whom he seeks blessings. And if we argue that सोमहरः means the same as सोमहारः, why then disturbs the traditional text?

[७] मा शिवेनाभिवद is an emended reading of मा अशिवेनाभिभवः = "do not weaken (let me down) with your inauspicious words (curse)", "do not rob me of my powers with your magical formulae". But, in fact, what Garuḍa actually wants, is to get blessed by Bṛhaspati, the lord of magical words (ब्रह्मणस्पतिः), for his risky enterprise. Check the next verse in which Bṛhaspati blesses (अभि + वद्) him for long life (आयुष्), physical strength and glory (वर्चस्), and the same expression अभि + वद् is used (त्वा आयुषा वर्चसा [च] अभि-वदामि).

It is, therefore, absolutely reasonable to assume that Garuḍa requests Bṛhaspati for अभिवाद[नं] and he responses with अभिवदामि. Further, since मा is unaccented in the text, it cannot be a prohibitive particle but only an *enklitkon* (*mā* = *mām*). In the later part of the story, Bṛhaspati emerges as a supporter and admirer of Garuḍa, not surprising in view of the fact that Garuḍa is the personification of the Vedic metres and Bṛhaspati is of the holy word and hymns (ब्रह्मणस्पतिः).

[८] The MSS read गरुत्मत्यरुणस्य (*padapāṭha*: गरुत्मती + अरुणस्य) which may be overstretched to yield the sense "the mother who has Garuḍa and Aruṇa as her sons", but the expression which is expected and needed here is a vocative addressing Garuḍa.

[९] The text has मानसं with which I cannot operate. Bṛhaspati seems to say "[I know that she has lost bet and has to serve a life-term of servitude to Kadrū] but I do hope that she is not too depressed and has not taken it so seriously to her heart (मानसे), because, after all, she has two competent and worthy sons like you and Aruṇa".

[१०] The text reads एतत् but the demand of the context is अन्यत्.

Bṛhaspati knows about the slavery of Vinatā (told by Garuḍa), he asks further whether otherwise all is well in the family and hopes that the mother of Aruṇa does not feel excessively distressed in her heart due to being a slave. Garuḍa replies that as far as he knows everything else is in order, only his mother feels aggrieved and unhappy about her servitude.

[११] Garuḍa is in a hurry, he takes leave of Bṛhaspati (आमन्त्रये त्वाम्) whom he addresses as "the senior-most of all poets" (वदतां वरिष्ठ). The text has पततां वरिष्ठ which seems to be corrupt because it would become a vocative addressed to Garuḍa in 2nd person, whereas it is Garuḍa who is flying "towards" (अच्छ) Soma and wants Bṛhaspati to utter blessings for success in his endeavour which he also actually receives in the next verse.

[१२] अच्छा < अच्छ. Lengthening *metri causa.*

[१३] All MSS have the corrupt reading यज्ञस्य which does not go with रक्षतु. I do not accept यज्ञश्च of Hertel (312 fn. 1) because we already have a च with दक्षिणा and the very first word does not need it.

[१४] It is tantalizing to change this original reading into दक्षिणेन. Soma is to protect Garuḍa from the front and the sacrifice from the right. To have divine protection in the front and on the right is believed to be auspicious and leading to success. (cf. सदा भवानी दाहिने सम्मुख रहें गणेश। तीन देव रक्षा करें ब्रह्मा विष्णु महेश", a Hindi benedictory verse). However, दक्षिणा (symbolically described as the "wife" of *yajña* in the Brāhmaṇas and Purāṇas) is so closely associated with sacrifice that I have not dared to change it.

[१५] वारं वरीयः (वरीयं in the MSS) refers probably to Soma as in Hymn VI.4 which can here be understood as Moon. It is astrologically auspicious to have the planet Moon in one's front (calculated according to the clockwise movement of the signs of Zodiac) while going on a journey. Johansson (54.3) prefers वारो वरीयान्.

[१६] There is a ते at the end of this *pāda* which Charpentier (249.14) has rightly deleted. As it is, the *pāda* still has twelve syllables. "तव पूर्वमस्तु" of Charpentier is not bad but it exludes पतत: which is important.

[१७] Grube has the reading पतत: which, I think, is a mistake, either

of the editor (Grube) or of some scribe, impelled by the first पतत: occurring in the second *pāda*. The *padapāṭha* very clearly reads परित: (all around).

१८ This is my *emendatio* for सर्वास्त्वाऽहोरात्रा which I do not find proper because अहोरात्रम् is neuter gender (cf. *ṚV* X.190.2). Further, it appears to be a *lectio simplicior* for our हौत्राणि (oblations/ invocations) which goes so well with Ṛcas and Yajūṁṣi, rather than "day and night". Charpentier and Rau find the text in order.

१९ The text has अभि चाश्रयन्ताम् (= अभ्याश्रयन्ताम् च). अभित: श्रयन्ताम् has first been suggested by Charpentier (249.14) which goes well with परित: . Rau, on the authority of Whitney (*Roots and Verb Forms*, Leipzig, 1885) suggests the formation of श्रयन्ताम् from a root श्रृ meaning "to cover", "to protect" instead of श्रि = "to lean on for support").

२० This second *pāda* has only nine syllables, the expression for "past" is missing. Indra is bragging about the security of Soma and asks Bṛhaspati: "Is there a person, or ever will be . . . who could violently take away my Soma?" I feel that a word expressing "has there ever been" is missing which I have supplied with भूतं and which I believe was dropped at some stage due to haplology (twice भूतं). The suggestions of both Negelein (103.32) ०भूतमस्ति अस्ति भविष्यद् . . . and Rau . . . बृहस्पतेऽस्ति (p. 360) are senseless.

२१ For यन्मे रक्षां निहितामतीत्य Charpentier (250.27) suggests . . रक्षांसि निहिता अतीत्य or रक्षांसि निहितान्यतीत्य. Rau also does not want to lag behind and suggests (360) यन्मे रक्षान् निहितानतीत्य। Thus we have a choice of three words of three different genders: रक्ष: (m.). रक्षस् (n.) and रक्षा (f.). Honestly speaking, I see no reason to change the word रक्षा (= security arrangements).

२२ This eighth verse of our 10th hymn has come down to us in a very corrupt form. I have tried to reconstruct it on the basis of the further course of the story in this text as well as its detailed description in the *Mahābhārata* (Ādi-[āstīka]parvan). Some *emendationes* by me are: चितीनां for आचितानां, नद्या: for वेद्या: आहरिष्यति for आहरिष्यसि, प्रासहा for प्रसह्य in some MSS as well as in the *padapāṭha*, निहितं for निहितो and जिहीर्षु: for जिहीरिषु:। आहरिष्यति was suggested already by Oldenberg (2). 86, fn. 3; Rau is in favour of dropping आ (only हरिष्यति) not realizing that आहरिष्यति (will bring) refers to Garuḍa *bringing* sand and

water from outside and not to carrying away Soma. निहितं जिहीर्षुः found favour with Johansson as well (54 fn. 5). निहितो जिहीर्षुः of Charpentier is useless (251.12).

॥ एकादशं सूक्तम् ॥

एकविंशो वर्गः (२१)

[इन्द्रो बृहस्पतिं प्रति]

अहं स्विदिन्द्र, उत वैनतेयः
कतरः शुश्राव, भुवनानि इच्छन्।
इन्दुं पराञ्चं निहितं विचक्षणो[1]
ममेत्तु सोमं सहसा हरेद् यः[2]॥१॥

[बृहस्पतिः]

तवेन्द्र जातमुत यज्जनिष्यत्
तवेन्द्र भूतमुत यद् भविष्यत्।
तव दिशः प्रदिश उद्दिशो बृहत्[3]
तवाशिषा प्रशिषा[4] सर्वमुच्यते[5]॥२॥

[आकाशे कोलाहलं श्रुत्वा विनता अरुणं प्रति]

महान् घोष उपरि श्रूयतेऽसौ
कथं पुत्र भ्रातरं नाभिधावसि?
एकः सुपर्णो बहवश्च देवा
न ह्येनमेकः प्रसहेत शक्रः[6]॥३॥

[अरुणो मातरं प्रति]

न हि मातररुणो याति नूनं
गच्छत्वयं[7] त्रिदिवं सोमहारः।

[विनता आत्मगतम्]

अभ्राता भ्रात्रा गरुडोऽरुणेन
अपुत्रा शुङ्गा विनता सुपर्णी॥४॥

द्वाविंशो वर्गः (२२)

[विनता अरुणं प्रति]

अपाद् भौवनो न हि शं [बट्?][४] करोति
अरिहा[५] त्वसौ, न नहुषि[१०] प्रमाद्यति[११]।
अन्धो जागृविर्न हि सः प्रमाद्यते
कथं सुपर्णो गरुडोऽतिमोक्ष्यते[१२]॥५॥

[अरुणो मातरं प्रति]

ओज इव सह इव बलमिव
नभ इवाभ्र[१३] इव[१४] भीरिव।
महद् बलमप्रधिष्यमेतद्
गरुत्मत उपमा नास्ति शुङ्गे॥६॥

[पुनरप्यरुणो मातरमाश्वासयन्, विनताया आशिषो वा प्रथमार्द्धे,[१५] द्वितीयार्द्धेऽरुणस्योक्तिः]

वातोऽस्य प्राणान् मरुतोऽस्य पक्षा[१६]-
वग्निः शिरो रक्षतु जातवेदाः।
अहं पुरस्तादहमस्मि पश्चाच्-
चन्द्रो ललामो[१७] [ललम्बे?] गरुडस्य पृष्ठे॥७॥
(cf *Mbh*. I.24.8)

[स्वर्लोके इन्द्रो बृहस्पतिं प्रति]

किन्नु घोषः श्रूयते यत्र सोमो
बृहस्पते हन्त वेदावगत्वा[१८]।
ज्या ह शिङ्क्तेऽपदाऽवसृष्टा[१९]
रोरूयते वधिरः[२०] सोमपालः॥८॥

[बृहस्पतिरिन्द्रं प्रति]

अहमेतं मघवन् वेद घोषं
सुपर्णस्यैष पततः शचीपते।
वैनतेयो हरति यत्र[२१] सोमं
निहत्य ते[२२] सोमपालान् गरुत्मान्॥९॥

Notes on the Restored Text vis-à-vis the Original One

१ The MSS read विचक्षणं (clever) which would refer to इन्दुं, or as an adverb to निहितं (विचक्षणं निहितं = cleverly or carefully deposited). However I feel that Indra wants to say something like: "who is this Vainateya about whom I am listening and who is so clever that he can carry away my Soma which I have deposited far away from the reach of the mortals"? I therefore have emended विचक्षणं into विचक्षणः to go with वैनतेयः.

२ हरेद् यत् is the original reading where यत् does not give any sense. यः goes smoothly with [सहसा] हरेत्.

३ According to Rau the word बृहत् is to be taken here in the sense of "heaven", "highest sky" (*höchster Himmel*) in which sense its use is attested in the *Ṛgveda* I.52.13 (त्वं बृहतः पतिर्भूः) and VII.18.20 (बृहतः शम्बरं भेत्). It is not clear why Johansson prefers to have बृहन् (55 fn. 2).

४ प्रशिषं = will, command; cf. उपासते प्रशिषं यस्य देवाः (*ṚV* X.121.2). Our commentator Jaya takes both these twin words in the sense of "blessing" but makes an interesting difference between the two. Blessings received from a respected person *upon ones own request* is आशीः and प्रशीः is the blessing which a respected person utters *of his own accord* without being asked or requested to do so: प्रार्थ्यमानात् प्राप्तं वरदानवाक्यमाशीः। अप्रार्थ्यमानाल्लब्धं वरदानवचः प्रशीः; इतीयान् भेदः। (comm. *ad* XI.2).

५ Taking the content of the first two verses of this *sūkta* in view, it appears that they too belong to the previous hymn and form part of the dialogue between Indra and Bṛhaspati. Such artificial grouping of the verses — ignoring the content and continuity — into hymns, each containing around ten verses is seen elsewhere also which seems to indicate that the text of the *Suparṇādhyāya* was originally in form of a continuous narration, split up later into hymns following the model of the Saṁhitās.

६ The *pāda* appears to mean: Since gods are in multiple number and the Suparṇa is alone, he is in danger. [If Indra alone were there, there wouldn't have been any problem], Indra alone cannot withstand him.

७ The MSS have गच्छ स्वयं which cannot be correct because it is a form of 2nd person(s) Imperative, whereas Garuḍa is not present before Aruṇa. Already Charpentier (254.18) corrected it rightly into गच्छतु अयं (let him go).

[८] बट् occurring in the text defies all explanations. It also unnecessarily lengthens the *pāda*. Can we take it as an older or dialectical form of the indeclinable particle बत ("for sure", "obviously")? Not much is lost even if this word is removed.

[९] The MSS have अतिहात्वा. The *padapāṭha* splits it into three words अति० हा। त्वा. The *bhāṣya* treats अति-हात्वा as one word and explains it as संग्रामांगणम् अतिक्रम्य, हात्वा = त्यक्त्वा च", (हात्वा = हित्वा) an archaic form of the root हा (जहाति).
अरिहा त्वसौ is a very good *emendatio* of Hertel (314 fn. 2) with which at least one can work. It is also acceptable to Charpentier (255.1). In हा of अरिहा or अतिहा one has to discover the root हन् (+ क्विप्) and should not operate with हा = to desert, to leave, to give up.

[१०] नहुषि is a relatively small *emendatio* for नहसः, a term which is very difficult to understand. It appears again in the next line. Charpentier changes it into नहुषः at both the places. I think that a better conjecture is नहुस् = [an approaching] stranger, neighbour. न नहुषि (= not in respect of a stranger). The *bhāṣya* takes it as a proper name (नहससंज्ञको देवः).

[११] प्रमाद्यति is the normal form of the verb (cf. 6.2 above). The text has प्रमाद्यते (Ātmane).

[१२] The text has अतिमोक्षते, but we need a passive form here ("how shall he get released" = how shall he get rid of all these adversaries).

[१३] The text has ओज इव सह इव नभ इव बलमिव अभ्रमिव. . . . In order to avoid the blemish (*doṣa*) of पतत्प्रकर्ष, I have changed a little the order of words. For ओज इव, . . . etc. Negelein suggests (105.39) ओजस्वन्तं सहस्वन्तं नभस्वन्तं . . . which does not suit the grammatical construction.

[१४] The text reads अभ्रम् इव but the word अभ्र is masculine as all synonyms of the word "cloud" are.

[१५] There is a great deal of uncertainty as to who is the speaker of the following benedictory verse. It could be a continuation of the speech of Aruṇa, benediction of the elder brother to his younger one. The latter half is certainly uttered by him in which he promises that he (i.e. along with the sun-god) would support him from the front and the back. Hertel thinks that the speaker is Soma. Rau's opinion is more covincing who cites a parallel passage with almost similar words from the

Mahābhārata (Ādiparvan, Adh. 24.8-9) in which it is Vinatā who utters this benediction for her son. The wordings of the second half of our verse, however, appear differently in the *Mahābhārata,* and in verse 24.9 she assures Garuḍa that she shall always be praying for the well-being of him. In our version of the story Garuḍa has already left for Indra's heaven, whereas in the *Mahābhārata* he is still with his mother and receives her blessings in person which is more logical. The passage under reference in the *Mahābhārata* is as follows:

पक्षौ ते मारुतः पातु चन्द्रः पृष्ठं तु पुत्रक।
शिरस्तु पातु ते वह्निर्भास्करः सर्वमेव तु॥

अहं च ते सदा पुत्र शान्ति-स्वस्तिपरा यथा।
अरिष्टं व्रज पन्थानं वत्स कार्यार्थसिद्धये॥

[१६] Rau's emendation of the personal pronoun of the first *pāda* into वातस्ते प्राणान् मरुतस्ते पक्षौ is unwarranted since Garuḍa is not present before them (Vinatā + Aruṇa).

[१७] Instead of ललामो (beautiful) our text had just ललामः which hangs in the air and looks like a perfect form (not required in this context!) of some unkonwn or less known root. The nearest possibility could be (पृष्ठे) ललम्बे/ललम्ब (hung/hanging over the back). I have just added a *visarga* to ललाम and have made it an adjective to Candra (the beautiful moon).

[१८] The archaic use of क्त्वा instead of ल्यप् although conjoined with a prefix as elsewhere in the text.

[१९] The text has ज्या ह शिङ्क्ते (mistakenly printed as शिन्ते in Grube) यदाऽवसृष्टा which appears unproblematic on its face, but Rau (360) has brilliantly (and correctly) modified यदा into ऽपदा since the archer Bhauvana is lame (अपात्). This became perhaps his chief qualification for appointment as the protector of Soma since he cannot leave the spot (!). Rau was perhaps inspired by Charpentier (256.1ff.) who had suggested an additional यदा after यदा (यदा यदाऽव०) in order to make up for the two missing syllables of the *pāda*. Both Charpentier and Negelein suggest to read *jyā* as two syllabic *jiyā* for which, however, there is no grammatical or phonetic reason; also no justification.

[२०] Rau suggests अवधिरः, thinking that he is lame all-right, but he can hear very well. (Although both Charpentier and Rau reproduce this word as बधिर, I think it is better to read वधिर

since it is derived from the root वध्.)

२१ Rau suggests हरत्यस्य (?) for यत्र. तत्र could have been equally good. I retain the original.

२२ The text had तव. Rau's suggestion (p. 361) to replace it with ते reduces the *pāda* to its desired length, hence acceptable.

॥ द्वादशं सूक्तम् ॥

त्रयोविंशो वर्गः (२३)

[इन्द्रो बृहस्पतिं प्रति]

अपाद् भौवनः क्षिप्रधन्वा क्वासीद्[1]
यस्याग्निं बाणमुखं तिरस्यति[2]।
यस्य बाहुभ्यां वीयते सायकोऽवृथा[3]
त्रिंशत् स्तबकान्ययुतानि[4] षष्टिम्[5]॥१॥

[बृहस्पतिरिन्द्रं प्रति]

अपादं वै[6] भीषयमाणः सुपर्णः
क्षिप्रमध्वानं[7] चरति क्षेमेण[8] [शूरः][9]।
नैनं चरन्तं परि बाण आस[10]
सोमं यदाऽर्च्छद्[11] दिवि उत्तमायाम्॥२॥

[इन्द्रो बृहस्पतिं प्रति]

क्वार्बुदो नहुषः काद्रवेयः
उलूको बल्बूलः श्वसनः क्वासीत्[12]?
स्वपन्ननिमिषः[13] प्रलिशः क्व आसीद्[14]?
यन्म इन्दुं हरति वैनतेयः॥३॥

ककुब् भण्डश्च चक्रतुण्डः क्वासीद्?
अश्वमुखः कुण्डकर्णः क्व आसीत्?
विक्रोशनः खरकण्ठः क्व आसीद्?
यन्म इन्दुं हरति वैनतेयः॥४॥

[बृहस्पतिरिन्द्रं प्रति]

गतिं विज्ञाय शकुनस्य सर्पा-
स्तेजोबलेन गरुडस्य शक्र।

ते पन्नगा विहगेन्द्रस्य स्पर्शाद्
भीताः शिरांस्यप्यदधुस्तनूभिः॥५॥

चतुर्विंशो वर्गः (२४)

[*पुनरपि इन्द्रः*]

कशम्बूको वेणुकोऽश्वक्रन्दो-
ऽलगर्दः परुषः क्व आसीत्?
नभोरूप-सरूपौ क्व आस्तां?
यन्म इन्दुं हरति वैनतेयः॥६॥

उपतीरं वर्तमानः शशाक्षः
क्रोधेन मृत्यु[१५]रजनस्य कर्ता।
व्यादाय स्वापी विभिदः क्व आसीद्
यन्म इन्दुं हरति वैनतेयः॥७॥

[*बृहस्पतिरिन्द्रं प्रति*]

ता ग्रीवच्छिन्ना अपि च मूर्धभिन्नाः[१६]
कृत्ताः सचन्ते बहुलानि[१७] शक्र।
अपाद् भौवनो निहतस्तदासीन्[१८]
महद् वैशसमकरोत् सुपर्णः॥८॥

[*इन्द्रो बृहस्पतिं प्रति*]

ये विद्युतौ चरतः सर्वतो[१९] घ्नती
अन्नं रक्षन्ती अभया भया च।
[२०]चतुर्मुख्यावस्वपन्नीक्षमाणे[२१]
कथं स्विदेवाप्यतियाति[२२] गृध्रः[२३]?॥९॥

[*बृहस्पतिरिन्द्रं प्रति*]

ये विद्युतौ चरतः सर्वतो घ्नती
अन्नं रक्षन्ती अभया भया च।
ताभ्यां समख्यद्[२४] गरुडो वैनतेयो
विषूच्यावयातां[२५] स्वरभया भया च॥१०॥

Notes on the Restored Text vis-à-vis the Original One

१ Easier to recite the verse would be if we split this word into क्व आसीद्. Rau (p. 360) opines that the word भौवनः is to be pronounced as two-syllabic in Triṣṭubh metre (in the *vargas* 22.1, 23.1 and in 25.6) which will balance this excess of one syllable. (But how? भौव्नः, भौनः?)

२ The text has originally तिरश्चता which (if at all there is any such word and form!) is syntactically not related to the preceding words. In fact, we need a verb here. तिरस्यति is my conjecture ("the tip of whose arrow is more destructive than the fire, overcomes fire"). Negelein's curious explanation of तिरश्चता as a "corrupt form of the root त्रस्" (107.3) is not acceptable.

३ अवृथा is my conjecture for वृषा of the text. In older MSS थ is very likely to be misread as ष. वृषा has no meaning in this context. With अवृथा we get a sensible meaning: "Shot with whose arms every arrow hits [the target] without fail". Rau suggests अमृषा (truly) which I consider a second choice.

४ स्तबकानि is an emended form of स्तवन्यानि appearing in the MSS. I take it to mean "bunch" [of arrows: thirty at a time].

५ Negelein (103.34) wants to delete षष्टिं for incomprehensible reasons.

६ I find वै not of much use. However, I have not removed it, though it lengthens the *pāda* by one syllable.

७ The manuscripts uniformly read here क्षिप्रधन्वा. It has sneaked into this *pāda* from the first verse, as rightly pointed out by Negelein (107.6) and is of little use unless it has some other case ending (क्षिप्रधन्वानम्, etc., cf. Charpentier 247.10ff.). Rau (361) discovered the word अध्वन् in the compound and suggested क्षिप्रं स्म अध्वानम् which I find excellent, *sans* स्म, and have accepted it.

८ क्षिप्रेण is the handed down text which cannot be correct. क्षिप्र is an adjective, क्षिप्रं an adverb. क्षिप्रेण चरति would be very unusual. Rau (361) suggests क्षेपेण, not a bad reading, but I opt for क्षेमेण (without getting hurt).

९ Of not much avail is this शूरः of the second *pāda* which can easily be deleted without any loss to the sense and which unnecessarily lengthens the *pāda* by two syllables.

१० आस is the perfect form (लिट्) of the root अस्-अस्यति "to shoot",

"to throw", to hurl the passive sense of "injuring", "hurling" which is to be taken in passive voice; आस = अविध्यत्. Rau's suggested reading आस्यत् is also good, but since we can very well operate with the available text, we need not change it. One can also take it as the Vedic perfect form of the root अस् ("to be", cf. तस्माद्धान्यन्नपरः किञ्चन आस — *ṚV* X.129.2). This verb form with the preposition परि (around) governing एनं चरन्तं [परि बाणः न आस] would then mean. No arrow sat itself (= reached, hit) on his body since he was flying round and round (परि + चरन्तं) while dashing against Soma (यदा आर्च्छद् सोमम्).

११ आर्च्छत् (kom ऋ > ऋच्छति + अ, Imperfect) was first suggested by Negelein (107.7) and I consider it an excellent reading to replace the original आर्चत् of the text. Rau later suggested (p. 361) आर्जत् which is not even half as good. Further the MSS and *padapāṭha* have यत् (आर्चत्) which I think must be construed as यदा-आर्च्छत् ("when he dashed against the Soma" or "when he snatched away the Soma").

१२ क्व आसीत् and क्वासीत् have been used side by side depending upon the requirement of syllables in the *pāda*.

१३ The text has सपन्निमिषः which the *padapāṭha* separates as सपत्-निमिषः, i.e. "Nimiṣa with feet". This and the following three verses enumerate the names of the serpents deputed to protect the Soma. Although a synonym for serpent is *guptapāda*, i.e. "the one whose feet are hidden" or "one who has no feet", in this case, we have to conceive of some animal looking similar to the Chinese dragon. However, I believe that it is a corrupted form of स्वपन् अनिमिषः and is used as an adjective to प्रलिश "who has the characteristic of sleeping with open eyes so that he is ever watchful on Soma". There is also a *vibhidaḥ* who sleeps with his jaws open.

The reading स्वपन्ननिमिषः of our text gives rise to a personal name (!) in the *Mahābhārata* I.28.18 which speaks of a snake called निमेष. The other four snakes mentioned in I.28.18-20 are उलूक, श्वसन (both appearing in our text too), प्रलिह (प्रलिश of SA) and प्ररुज. The warriors of the *Mahābhārata* are four in number: अश्वक्रन्द (also SA), रेणुक (वेणुक of SA), क्रथन and तपन.

१४ *Vide* fn. 12.

१५ The text has क्रोधेन मर्त्तः which does not yield any sensible meaning. Charpentier (259.33) changes मर्तः into मर्ता which is equally unappealing. Does he mean killer? But how can an

intransitive verb like मृ be combined with an agentive suffix तृच्? It is possible only when the verb is turned into a causative (मार्–मारयिता). For "क्रोधेन मृत्युः" cf. the Vārttika on P.II.3.18 (प्रकृत्यादिभ्य उपसंख्यानम्). I think my *emendatio* suits the context and the meaning best.

All these four verses are blatant examples of the poetic blemish "अकाण्डे प्रथनम्" (unnecessary and useless expansion of a certain event).

१६ The metre would be set right either if we join छिन्ना + अपि (छिन्नापि) as suggested by Negelein (109.25) or delete च which is totally redundant in view of the existence of अपि. Charpentier (263.32) changes ताः into ते which I endorse in view of this new placement of the verse. It was originally the verse 13.6 and referred to the severed throats and smashed heads of Māyā and Lightnings, etc.

१७ For सचन्ते बहुलानि Charpentier (264.1) suggests शयते (he probably means शयन्ते which is misprinted, but even when we make this allowance, the form is terribly wrong. The correct form of third p. pl. Pres. Ind. is शेरते!). His suggestion to change बहुलानि into बहुधाऽपि or बहुधा हि also does not yield any good sense. Rau's interpretation of बहुलानि सचन्ते (without any alteration) is: ["cut apart कृत्ताः] they enter into thick darkness" (*geraten in dichte Finsternisse*). I think he is right and the darkness of death or hell is probably meant to which the warriors sink upon their death. In fact, "to enter into darkness" is an old expression for losing life, to embrace death. Apte's dictionary s.v. तमस् quotes the following hemistich from the *Rāmāyaṇa* which corroborates it: तया भिन्नतनुत्राणः प्राविशद् विपुलं तमः। This verse was originally placed in *sūkta* 13 at no. 6, where it referred to the severed heads of Māyā and Vidyuts!

